नं० ४३-९६-घ

आपस्तम्बीया धूर्तस्वतंत्रव्याख्या प्रयोगरत्नमाला

षष्ठप्रश्नः

पत्राणि ६० (पूर्ण)

योवेदवपुराचारावयवोदर्शनेंद्रियः। मामीस्यन्नंतरास्तेतं विज्ञानंदमुरंभे। कर्मब्रह्माध्वनीनस्यमंत्रिभूपतिभूयते। व्याचष्टेचौउपाचा
र्योयाजमानमयैष्टिकं॥ याजमानंव्याख्यास्यामः। इदानीं दर्शपूर्णमासयोर्याजमानंकर्मव्याख्यायते। प्रसंगाभक्त्याचित्पत्नीकर्मा
पि। यथाजायापतीअग्निमादधीयातामित्यादि। यजमानयोर्वा कर्मयाजमानं। उपहूतेयंयजमानेत्यादौपत्न्यापियजमानव्यप
देशोपलंभात्। यजमानस्यब्रह्मचर्यंदक्षिणादानंद्रव्यप्रकल्पनंकामानांकामनं। ब्रह्मचर्यंव्रतचर्यामैथुनवर्जनादि। दक्षिणादा
नेंऋत्विक्परिक्रयः। द्रव्यप्रकल्पनंयज्ञसाधनंद्रव्याणामुपस्थापनं। काम्यंतइतिकामाः। क्रतुफलान्यंगफलानिच। याजमा
नाधिकारेपुनर्याजमानग्रहणंसार्वत्रिकात्वार्थं। तदयमर्थः। ब्रह्मचर्यादिचतुष्टयमविशेषेणचोदितमपिसर्वत्रयजमानस्यैव
भवंतिनऋत्विजां कुतः। कर्मणस्तदर्थत्वात्तन्नूवचनाद्धत्विजामपिभवंति। यथायोस्याग्निमाधास्यन्स्यात्सएतारात्रिंव्रतंचरति। अ
नड्वान्होत्रादेयइतिकामयेताध्वर्युरात्मानमित्यादि। यावदुक्तमेवकर्मयत्त्यासर्वंचेदंन्यायविदः। सत्याषाढश्चाह। यानदुक्तं
पत्न्याःकर्मणीब्रह्मचर्यंजपाश्चेतिभारद्वाजेनतूक्तं आत्मसंस्कारावपनवर्जंपत्न्याइति। प्रत्यगाशिषा। मेंत्रांजपत्यकरणा
नुपतिष्ठतेनुमंत्रयते। वेदस्याध्वर्यवसमाख्ययासर्वेषांमंत्राणामाध्वर्यवत्वेप्राप्ते उच्यते। यआत्माशीरभिवादिनःअध्वर्य
वेकर्मणिकरणतयाचाविनियुक्तामंत्रास्तान्जयति। तैरुपतिष्ठतेह्यनुमंत्रयतेवायजमानः। नत्वध्वर्युः कुत्तआशासेस्वा।

गामिफलत्वादात्माशिषां। स्वाम्यर्थत्वाच्च सर्वकर्मफलानां अतः सामर्थ्येन समाख्याबाध्यत इति भावः। तदुक्तं जैमिनीनापि। मंत्राश्च

कर्मकरणास्तद्वदिति। येनुकरणमंत्रास्ते प्रत्यगाशीषोपि विनियोगबलादाध्वर्यवा एव यथा ममाग्ने वर्च इत्यादयस्तेषु प्या
शिषो यजमानार्था एवेष्यन्ते भाक्तस्तस्मच्छब्दो भविष्यन्ति जपादीनां तु विषयभागं स्वयमेव तत्र दर्शयिष्यन्ति। यथान्वाधीयमा
ने जपति। अथादित्यमुपतिष्ठते प्रणीताः प्रणीयमाना अनुमंत्रयत इत्यादि। यत्र तु न दर्शयिष्यति। योग्यतयैव तत्र तत्र व्यव
स्थानुसंधेया। प्रवरे प्रव्रीयमाणे इत्यादौ जपः। स्व आयतने मनीषयेति गार्हपत्यमित्यादावुपस्थानमनुमंत्रणं वा वेदिं सम्
ज्यमानामित्यादावनुमंत्रणमिति प्रायिकं चैतज्जयादिष्वव्यं क्रियांतराणामपि क्वचित्प्रदर्शनात्। यथा पुरोडाशमभिमृशती
त्यादि पर्वणि च केशश्मश्रु वापयते। ऐच्छिकत्वाद्वपनस्य पर्वाणि याक्षिकं सन्नियम्यते। वापयते यव पर्वणीति तेनापर्वण्यनि
यमः पर्वण्येव वापयत इति वा नियमः। तदापर्वण्यनियमः। अपर्वणि चाभावः। तच्चापि तु यज्ञवरणं गंसकालविधानात्तेना
करणेपि दर्शपूर्णमासयोः कार्यं। यथा संवत्सरमग्निहोत्रं हुत्वाथ दर्शपूर्णमासावारभेते। त्रिंशतं वा वर्षाणि जीर्णो वा विर

मेदित्यादिकल्पेषु कर्मांगं वा वपनं प्रकरणात्। मृता वा एषा त्वगमेध्या यत् केशश्मश्रु मृतामेव त्वचममेध्यामपहत्य यज्ञि
यो भूत्वा भूत्वा मेधमुपैतीति लिंगाच्च। तदापि पर्वग्रहणात् पाक्षिकं न्युरत्वायां प्रकृतौ विकृतिषु च अपर्वकालासु नेष्यते। यथा

मुंचतस्मादित्यर्थः। ध्रियमाणमभिमंत्रयते सायजमानः सायंरात्र्यायदेनः कृतमस्ति पापं सर्वं॰ तस्मादिति प्रातः। प्रातस्त्वेतस्यैवमंत्रस्य रात्र्या
यदेनइत्येतावान् विकारः। व्याहृतय आधाने व्याख्याताः। वामदेवं त्रिष्टुप्। उद्ध्रियमाण उद्धर पाप्मनो मा यद विद्वान्यच्च विद्वांश्चकार॥
अह्ना यदेनः कृतमस्ति पापं सर्वस्मान्मोद्धृतो मुंचतस्मात्। रात्र्यायदेनइत्यादि। हे आहवनीय उद्ध्रियमाण त्वं मां यजमानं पाप्मनः स
काशादुद्धर। उद्धृतश्च त्वं अहमविद्वानजानानः विद्वांजानानश्च अह्नादिवसे नरात्र्या च यदेनः चकार कृतवानिति यत्पापं कृतमस्ति तस्मा
त्सर्वस्मात्पापान्मां मोचय। अग्निपतये॰ निदधामीति पुरस्तात्परिक्रम्योदङ्मुखः प्रत्यङ्मुखो वासायमायतने ग्निं प्रतिष्ठापयति प्रा
ङ्मुखः प्रातः न पुरस्तात्परिक्रमणं प्रातः। वामदेवो यजुः। अग्निपतयेग्नये मे विध्यग्निपतये ग्नये मे मृड। हे आहवनीय अग्निपतये य
जमानाय मत्त्वं अग्नये गार्हपत्याय विद्धि जानीहि। ज्ञात्वाचाग्निपतये मत्त्वं मग्नये च मृडय। सुखं संपादयेत्यर्थः। त्रिष्टुप्॰ अमृताहु॰ हा।
अमृताहुतिमसि एणाहुतिरूपमग्निं अमृतायां असी यमाण यां पृथिव्यामावयतने अमृतस्य जित्यै अक्षयसुखप्राप्तये जुहोमि
स्थापयामि। तयाहुत्याहमनंतमक्षयं कामं कर्मफलं जयानि प्राप्तवानि। प्रथमः प्रजापतिर्जगत्स्रष्टा नयाहुत्यायं कामं जिगाय प्राप्तवान्
तं कामं जयानीत्यर्थः। यजुः। अग्निमग्नौ स्वाहा। अग्निमाहवनीयमममग्न्यावग्न्यायतने स्वाहा। प्रतिष्ठापयामि। अग्नेसंस्राडिति आधाने
व्याख्यातं। स्वयं यजमानइध्मानाहरति विश्वहानीमा॰ षामे सेतया। इध्मानूएधांसि स्वयमाहइति। नत्वन्ये नाहारयति। वामदेव उष्णि

कृ। विश्वदानीमाभरंतो नातुरेण मनसा। अग्ने मा ते प्रतिवेशा रिषाम। हे अग्ने वयमनातुरेण कृशरहितेन मनसा विश्वदानीमेधो जातिमाहरंतः तेन व प्र
तिवेशाः प्रसंन्नाः संतो मा रिषाम। न विनश्येम। यदग्ने यानि कानि चेत्येताभिः प्रतिमंत्रमग्निषु महतइध्मानादधाती त्याहवनीये वर्षिष्ठं। इदमपि
याजमानमेव। यजमानाधिकारान्। कल्यांतरेषु व्यक्ता ज्ञाः सत्याषाढेन तावद्याजमानकांड एवेध्मानामाहरणमाधानं चोभयमुक्तं। भरद्वाजोप्या
ह। स्वयं यजमान एधानाहृत्याग्निषु महतइध्मानादधातीति। महतइध्मानिति यावंतः समिंधनाय। तावंत एकैकस्मिन्नादधातीति। पंचाग्नेये
पंचमंत्राः स्तेन त्र्यग्नेस्त्वयणं। अग्निरनुष्टुभौ। यदग्ने यानि कानि चा ते दारूणि दध्मसि। तदस्तु तुभ्यमिन्घृतं तज्जुषस्व यविष्ठ्य। हे अग्ने ते त्वदर्थं
यानि कानि चारण्ये पतितानि दारूणि काष्ठान्यानीय आदध्मसि। आदधामीति। यत्तत्तुभ्यं घृतमिव घृतमेवास्तु। हे यविष्ठ्य युवतमाग्नेन। जा
रूजातं जुषस्व। यदत्स्युपजिह्विका यद्वम्रो अतिसर्पति। सर्वं तत्०स्तु। मयानीतेषु दारुषु यद्दारु अरण्ये पदा वाग्ने रूपजिह्विका स्वल्पज्वाला अत्ति। य
द्वम्रः क्षुद्रजंतुः अतिसर्पति अतिशयेन प्राप्नोति भक्षयतीत्यर्थः। सर्वं तदिस्यादि पूर्ववत्०। त्रिष्टुप्०। रात्रिमप्रयावं भ०षाम। हे अग्ने तेन व प्र
तिवेशाः प्रस्यासंत्ताः वयं मा रिषाम हिंसां न प्राप्नुम। किं कुर्वंतः स्तिष्ठंते। शालायां वध्वास्ठापिताश्वाय घासमिव रात्रिं अप्रयावं प्रतिदिनं प्र राम
यत्नावमकृता एकमपि दिनमवर्जयित्वा स्मा। अग्नये घासं समिद्रूपं भक्ष्यं भरंतः तथा रायस्पोषेण धनपुष्ट्या इषा अन्नेन च संमदंतः जगती०। ना २
भा पृथिव्याः० स हिं। बृहते० प्रो ण य रायस्पोषाय अग्निमिमं हवामहे। आह्वयामः। कीदृशं पृथिव्या नाभा समिधानं आयतनमध्ये सम्यग्दी।

प्यमानं। इदं मइरया समिद्रूपेणान्नेन मार्घ्यं तं। बृहदुक्थं प्रौढप्रशंसावंतं यजत्रं यागहेतुं जेतारं राक्षसादिविषयजयशीलं। एतनास्वग्निसमाग
मेष्वग्रे गच्छंतं। सासहिं अस्मदपराधानां अतिशयेन सोढारं। अनुष्टुप्। याः सेनारभी० म्यास्ये। अभीत्वरीरस्मदभिमुखेन गमनशीलाः आ
व्याधिनीः सर्वतोस्मान् ताडयंत्यः उगणाः उत्कृष्टगुणोपेताः बहुस्तोमा इत्यर्थः। एवंविधाया सेना परकीयाः सं-- उतापि ये ये स्तेनाः
गुप्तचोराः ये च तस्कराः प्रकटचोराः स्तैनैस्कै तान् सर्वान् हे अग्ने ते तव आस्ये अपिदधामि प्रक्षिपामि। आहवनीये न र्षिष्ठं। यथान्ये ष्वोव
र्षिष्ठं महत्तरं न वति तथेत्यर्थः। यथा हि तास्सेनानुपूर्वेण हवनीयाद्या प्रक्रम्य इध्मानादृधाती त्यन्वयः। आहवनीयप्रक्रमे पीतरेषां यथा
धानमेव क्रमः। तथाग्निराधेयो यथाहुतिर्नश्यवेयात्। तथाग्निरन्मुखा र्विर्विधातव्यः। यथेध्मुस्यो परिदत्तामाहुतिमिध्मो नश्यवेयात्।
नव्यवदध्यात्। नांतराग्नी संचयरति। अग्नी इति गार्हपत्याहवनीयो गृह्येते प्राधान्यात्तथोनरसूत्रयोर्व्यक्तत्वाच्च त्यादिपूर्वोनुगतः संचर्यपू
र्वस्मिं ध्रियमाणे परा गम्यनुगतावसंच--- र्यं वचनं अन्यथा तदानर्थक्यात्। अत्रैवार्थं दर्शयति। पश्चाद्धि सतर्हिगतः तर्हि तस्मिं न्काले
सोग्निः पश्चाद्गार्हपत्ये स्वनौयो हि गतः। तेन संचर्यमिति। कामं हुते संचर्यमित्येके। अजस्तविषये। सांगाद्धोमादुत्तरकालं मंतराग्न्योरयं सं
चरणविकल्पः। प्रणयनकल्पे पि प्रधानहोमादुत्तरकालमिति केचित्। नक्तमाहवनीयं धारयति। पूर्वेत्ताहवनीयस्य सायंप्रातर्होमयोः एपकू
प्रणयनमुक्तं। यथा चित्रं क्षसूर्य आविः सूर्य इति। तयोदग्धुरवः प्रत्यग्धुरवो वाप्राग्धुरवप्रानरिति वा। इदानीं तु सायमुपक्रम्य प्रातरपवर्गि

णोहोमद्वयस्यएककर्मत्वाभिप्रायेणैकमेव प्रणयनमुच्यते। यथोक्तं बौधायनेन। अथेदमग्निहोत्रं सायमुपक्रमं प्रातरपवर्गमाचार्या ब्रुवते।
द्वयोश्चानयोः प्रणयनकल्पयोः विप्रतिषेधाद्विकल्पः। तथा कात्यायनः। तस्मिन्सायंप्रातर्होममेकमिति। भरद्वाजस्त्वाह। अपि वा सायमु
द्धृत एव स्यात्। आप्रातरग्निहोत्रादिति। तथानक्तं वा धारयेदिति सत्याषाढः। नित्योद्धृतश्च गतश्रियो ध्रियते। गतश्रीर्व्याख्यातस्त्रयो वै गतश्रिय
इत्युक्तमित्यत्र तस्याधानादारभ्य नित्यो ध्रियत आहवनीय इति विपरिणामेन संबंधः। सत्याषाढश्चाजोत्स्नाह तु। नित्यं गतश्रियो धा
र्यन्त आयुष्कामस्य वेति। आश्वलायनमतानुगतश्रियः सर्वेऽपि नित्याः यथाह आधानाद्द्वादशरात्रमजस्रा अत्यन्तं तु गतश्रियः। बौधा
यनमतात्तु गतश्रियोऽपि पक्षे नित्याः सर्वे यथाह। आधानप्रभृत्येव वै ते अजस्राः स्युरिति शालीकिरिति। नित्यं गार्हपत्यं गतश्रिरगश्रितश्च
श्च सर्व एव नित्यं गार्हपत्यं धारयतीत्यर्थः। पुनर्नित्यग्रहणात्। तथान्वाहार्यपचनं यदि मथित्वाहितो भवति। आधानकाले दक्षिणाग्नि
र्यदि मथित्वाहितः तमपि सर्वे नित्यं धारयेत्। सत्याषाढमते त्वाहार्योऽपि नित्यः। यथाहार्यो हरहरेतं दक्षिणत आहरन्ति। यदि तदानीमा
हार्यः स्तदायोनित आहरन्ति। बहुवचनमविवक्षितं। अहरहः कालेऽविवक्षित इत्यर्थः। यदहरहर्यजमानः स्वयमग्निहोत्रं जुहुयादिति॥ राम
दक्षिणत इति दक्षिणाग्न्यायतनानुवादाद्दक्षिणतो देशादाहरणं नियत इति केचित्। उपवसथ एवैनमाहरेयुर्नवसान एवैनमाहरेयुरि 3
ति वाजसनेयकं। उपवसथं अग्न्यन्वाधानकाले वा साधुं देशान्तरप्राप्तिरवसानं स्थानं। इदं श्रेयो वसानं यदागामिति लिङ्गात्। नवमव

सानंनवावसानंपूर्वस्थानास्थानांतरप्राप्तावाहरेयुः नान्यथेत्यः। सभ्यावसथ्ययोस्तेवमुत्पादनावचनादाधानसंपादितानामग्नीनांस्वतोनुज्झित
त्वादनित्यधारणमेवयुक्तं इतिकेचित्। तदयुक्तं। नित्यधार्यमाणानामग्नीनामनुक्रमणेनइतरेषांधारणव्युदासात्। इतरथात्वनुक्रमणान
र्थक्यात्। अर्थायार्थीयाग्निंप्रणयत्यपवृत्तेकर्मणिलौकिकः संपद्यतइत्यधार्येषुनयंमुत्पादनाज्ञानचैतत्प्रणयनीयशब्दादाहवनीयेक
विषयंमंतव्यं। उत्पत्तिप्रदर्शनार्थत्वात्। तस्यान्यदादर्शपूर्णमासादिषुदक्षिणाग्नेराहरणासिद्धिः। शामित्रादीनांधारणप्रसंगश्चतस्मा
दधार्यौसभ्यावसथ्यौआपस्तंबमतात्। सत्याषाढभरद्वाजाभ्यांतुधार्येष्वेवानुक्तौतौयथानित्यौसभ्यावसथ्याविति। परिसमूहनेनाग्नी
नलंकुर्वंति। परिसमूहनंपरितोमार्जनंतेनाग्नीनलंकुर्वंति। सएवालंकारइत्यर्थः। बहुवचनमध्वर्युपत्नीयजमानानामन्यतमप्राप्त्यर्थंद
र्शितंवसमूहं त्यगन्यमारमित्यत्र। पुरस्तादलंकाराः सायमुपरिष्टादलंकाराः प्रातः अग्नयइतिशेषः। तत्रयदाप्युपरिष्टाद्धोमादलंकार
स्तथाप्युपरितनसमिंधनादलंकृतंतरमिष्यते। पूर्वालंकारेतथादर्शनात्। सचोभयत्रपाणिनाकार्यः समिद्धमग्निंपाणिनापरिसमूहे
त्समूहन्येतिवचनात्। एतद्वाविपरीतमुभयतोलंकाराः सायंतथाप्रातरित्येके। अग्नेगृहपतेशुंधस्वेतिगार्हपत्यमग्नेवह्नेशुंधस्वेतिदक्षि
णाग्निमग्नेसम्राडशुंधस्वेतिआहवनीयमग्नेसभ्यशुंधस्वेतिसभ्यमग्नेपरिषद्यशुंधस्वेत्यावसथ्यं। परिसमूहेनअलंकुर्वंतीतिसंबं
धः। वामदेवोयजूंषिअग्नेगृहपतइत्यादि। हेगृहपतेगार्हपत्याग्नेशुंधस्व। अनेनपरिसमूहनेनशोभस्व। एवमुत्तरेष्वपि। उदगग्रैप्रागग्रैः।

श्रदत्तैस्तृणैर्वाग्नीनूपरिस्तृणात्यग्निमग्नीवा। व्याख्यातंप्रागुदगग्रतं। अग्निमित्याहवनीयोगृह्यतेहोमार्थत्वात्। तृणानिदूर्वादयः। स्वादिर
स्रुवोवैकंकतस्याग्निहोत्रहवणीवाहुमात्ररत्निमात्रीवाअन्यएवाग्निहोत्रस्रुवः पुनर्विधानात्। ययाग्निहोत्रंहूयतेसास्रुगग्निहोत्रहवणी॥
तौचदार्शपूर्णमासिकाभ्यांस्रुक्स्रुवाभ्यांव्याख्यातौ। प्रसृताकृतिरार्यकृताग्निहोत्रस्थाल्यूर्ध्वकपालाचक्रवर्तीभवति। प्रसृताकृतिरसं
कुचितबिलाआर्यकृताआर्यैः स्त्रैवर्णिकैः कृताऊर्ध्वकपालाअतिर्यक्वृत्तकपालाअचक्रवर्तीवर्तनंवर्तः नविद्यतेवर्तनंयस्याः सातथो
क्ता। नचक्रभ्रमेणवनिर्मितेत्यर्थः। दक्षिणेनविहारमग्निहोत्रीतिष्ठतितांयजमानोभिमंत्रयते। इडासि०ह्वयामीति। अग्निहोत्रार्थाधे
नुः अग्निहोत्री। वामदेवीयजूंषि। इडासिव्रतभृदहंत्वामुभयोर्व्रतंचरिष्यामि। हेगौस्त्वमिडासि। हविरूपान्नसाधनमसिअहंव्रतभृत्तूह
विस्यागरूपवानस्मि। आवयोरुभयोरुभयोस्तद्व्रतमहंचरिष्यामि। स्करोहिएषहंत्वामुभयोर्व्रतंचरिष्यामि। हेस्करोहिणिशोभनरोहित
वर्णेशोभनसंतानेअहंत्वामित्यादिपूर्ववत्। इडएहिमयिश्रयस्वेउएह्यदितएहिगौरेहिश्रद्धएहिसत्येनत्वाह्वयामि। हेइडेहविरूपे राम
गौरेहिआगच्छ। आगत्यमयियजमानेश्रयस्व। अहंतुत्वांसत्येनयज्ञेननिमित्तेनाह्वयामि। एवमुत्तरत्रापिइरे अन्नरूपेअदितेगौर्गमन ४
शीलेश्रद्धेविश्वासरूपे। अथवेदिममिमृशतीयमसीति। धुक्ष्वेति — — वामदेवीययजुः इयमसितस्यास्तेग्निर्वत्सः सामेस्वर्गंचलोकममृ
तंचधुक्ष्व। हेवेदेत्वमियंपृथिव्यसि। तादृश्यास्ते। यमग्निर्वत्सस्थानीयः। सात्वंमेमह्यंस्वर्गलोकंचअमृतंअक्षयंचलोकंधुक्ष्वसंपाद

य। पूषासीति। दक्षिणतो वत्समुपसृज्य प्राचीमावृत्य दोग्ध्युदीचीं प्रागुदीचीं वा। दक्षिणतो गोर्वत्समुपसृज्य यथा प्राची भवति तथा गां पर्यावृत्य दोग्धि। मंत्रो
दर्शस्यारम्भात्। नः शूद्रो दुह्यात्। श्रुतेः। किमर्थमिति चेत्। असतो वा एष संभूतो यच्छूद्रः। असतो निकृष्टाद्गात्रात् पादादित्यावत्। पद्भ्यां शूद्रो अजाय
तेति श्रुतेः। दुह्याद्वा। नन्विदानीमेवोक्तं असतो वा एष संभूत इति। तत्र परिहारः नचात्र सामान्यवदुक्तत्वेन शुद्धिरस्ति ये नानुज्ञायेतापि शूद्रः।
तथा च ब्राह्मणं। अग्निहोत्रमेव न दुह्याच्छूद्रः। न ह्यितो त्पुनंतीति। तत्राह। यदेव गार्हपत्ये धिश्रयति पवपत्येवैनत्। अतो नुज्ञायते शूद्र इति पै भा
वः। अग्निहोत्रस्थाल्यां दोहनेन च दोग्धि। उभयत्राप्यधिकरणस्य करणत्वविवक्षया। तृतीया। उभयोरपि दोग्धीत्यर्थः। पूर्वो दुह्या ज्येष्ठस्य ज्ये
ष्ठिनेयस्य यो वागतश्री स्यादपरो दुह्यात्कनिष्ठस्य कानिष्ठिनेयस्य यो वानुजावरो यो वा बुभूषेत्। आरम्भात् दर्शपूर्णमासयोरवदानकाल वि
धौ। पूर्वापरा वितिस्तन निर्देशादूर्ति शेषः। नस्तनानु संमृशति। प्रस्नवनार्थं नस्तनान् संमृद्नातीत्यर्थः। यथोपलंभं नित्ये कल्पे दोग्धि। नित्ये
दोहनकल्पे यथोपलंभं योयस्तनः हस्तं प्राप्तः तं दोग्धि। न पूर्वापरादिनियम इत्यर्थः। पूर्ववदुपसृष्टां दुह्यमानां धाराघोषं च यजमानो नुमं
त्रयते। पूर्ववत् सामान्यवत्। मंत्रास्तत्रैव व्याख्याताः। अस्तमिते दोग्धि। अत्र दोहनस्यास्तमनात्परतो नियमात् पूर्वभाविनः समिंधनादेः॥
प्राग्नैगप्यस्तमयात् अनुमतिः सूचिता भवति। अप्परस्तमितेहोतव्यं। श्रमन्नः सद्यः अस्तमितमात्रे दोहनादि प्रतिद्यहोमः कार्य इत्यर्थः॥ ए
तदेव स्तौति। समुद्रो वा एष यदहोरात्रः तस्यैते गाधे तीर्थे यत्संधी तस्मात्संधौ होतव्यमिति शैलालिब्राह्मणं भवति। संधिर्नाम सायं प्रातः स्

यं नक्षत्रयोरन्यतरास्तमयादारभ्येतरोदयावधिकालो तथा संध्योपासनकालं नियच्छतां गोतमेनोक्तं। तिष्ठाज्योतिषेदर्शनात् उदिति। तौ समु
द्रकल्पस्याहोरात्रस्यागाधे तीर्थे तस्मात्संधौ होतव्यं यथा अगाध एव स्थितं न विपद्यते। तथानयोरेव कालयोर्हुतं प्रतिष्ठितं भवति। नान्यत्रे
ति। आन्यैवः। संधी इति हि वचनात्प्रातः संधिरपि स्तुतो भवति। नक्षत्रं दृष्ट्वा प्रदोषे निशायां वा सायं। सायंत्वेते पित्र्यो होमकालाः संधिना
5 सह विकल्प्यन्ते। नक्षत्रदर्शने प्रथम नक्षत्रदर्शने प्रदोषे प्रथमयामे निशायां द्वितीययामे। उषस्युपोदयं समयाविषिते उदिते वा प्रातः
प्रातरप्येते सह संधिकालेन चत्वारो होमकालाः। उषसि प्राच्यां जातप्रकाशयां उपोदयं उदयात्पूर्वस्मिन् दिसमये समयाविषिते ईषदर्वि
मंडले। उदिते सूर्ये। तत्र प्रदोषान्तो होमकालः संगवान्तः प्रातरित्याश्वलायनः। अथापदि कालं तराणामप्यनुग्राहकं ब्राह्मणं दर्शयति॰
यदुदिते जुहोत्यग्निष्टोमं तेनावरुंधे यन्मध्यंदिने जुहोत्युक्थ्यं तेनावरुंधे यदपराह्णे जुहोति षोडशिनं तेनावरुंधे यत्पूर्वरात्रे जुहोति प्र
थमं तेन रात्रिपर्यायमाप्नोति यन्मध्यरात्रे जुहोति मध्यमं तेन रात्रिपर्यायमाप्नोति यदपररात्रे जुहोति जघन्यं तेन रात्रिपर्यायमाप्नोति॥ राम
उदिते पूर्वाह्ण इत्यर्थः। रात्रिपर्यायैः कृत्वधिकारादतिरात्रो लक्ष्यते। तदयमर्थः। एतेषु कालेषु जुहुद्वत्सु एतैर्यज्ञैरिष्टवान् भवतीति। एवं च सर्वम ५
हः सर्वा रात्रिश्च होमकाल इत्युक्तं भवति। तथा च भारद्वाजः। आसायमाहुतिकालात् प्रातराहुतिकालो नातीयात् आप्रातराहुतिकालात् सायमा
हुतिकाल इति। न चैवं पूर्वोक्तैः कालैः सहैषां तुल्यविकल्पता भ्रमितव्येत्याह। स न मन्येत सर्वेष्वेतेषु कालेषु होतव्यमापदि हुतमित्येव प्र

तीयादिति विज्ञायते। सोयं प्रतिपन्नानेवमन्येत। सर्वे अमी होमकाल इति। आपद्यागत्यामीषु कालेषु कालेषु हुतमपि हुमैतं भवति एतावदेव
प्रतीयादित्यर्थः। यो होमकालः सोगानां। सर्वेष्वप्युक्तेषु कालेषु यस्मिन्प्रधानं चिकीर्षति तस्मिंले वांगान्यपि कर्तव्यानि। न तु कालांतरे।
विहरणं तु वचनात्। प्रागुदयास्तमयाभ्यां क्रियते। अत्र प्रयोगः। आरब्धाग्निहोत्री यजमानो न चेत् गतश्री र्न चेदन्यार्थप्रणीतमध्यम
कालो न चेद्द्वादशाहव्रतः कृतावश्यकः। पत्न्यान्वारब्धः सायमधिवृक्षे प्रातरावि: सूर्ये काले प्राणानायम्य देशकालौ संकीर्त्य सायमग्नि
होत्रं होष्यामीति सायं। प्रातरग्निहोत्रं होष्यामीति प्रातः। संकल्पयेत्। स्वर्गकामी तु स्वर्गं लोकमवाप्नवानीति च संकल्प्य। स्वयं पुत्र शिष्यो
वा। आधानकालतः क्षीरहोतावा। धृष्टिरसीति यत्किंचिद्यज्ञियं काष्ठमुपवेषमादाय। सुगार्हपत्य इति गार्हपत्यमभिमंत्र्योद्बुध्यस्वेत्य
स्मिंत्सधस्थ इति गार्हपत्याद्दुतराद्ध्रं प्रत्यग्निं वोधयत्योसुद्धरेति। स्वयमन्यं वा पत्योप्रेषितं नतिवा चालेति गार्हपत्याज्ज्वलंतमग्निमुध्
त्यभूर्भुवः सुवरू ध्रियमाण इति अहा यदेन इति सायं रात्र्या यदेन इति प्रातः। पत्यौ ध्रियमाणानुमंत्रयते। मथित्वाहितान्वाहार्यपचन
व्यतिरिक्तस्यान्येन दक्षिणाग्नेः स्वयोनितो दक्षिणतः आहत्य निहिते परिक्रम्य पुरस्तादाहवनीयस्योदङ्मुखः प्रत्यङ्मुखो वा सायं
पश्चात्प्राङ्मुखः प्रातः। अग्निपतये॰ निर्वामीति आयतने ग्निं प्रप्रतिष्ठाप्य यजमानो विश्वदानीमाभरंत इति स्वयं यज्ञियकाष्ठान्या
हृत्याय दग्ने यानीति गार्हपत्यस्य समिंधनपर्याप्तानि यदस्य पजि ह्विके ति दक्षिणाग्नौ समिंधनपर्याप्तानि रात्रिं रात्रिमित्याहवनीये

6

महत्तमैराणि समिंधनपर्याप्तानि। प्रयद्धायदग्नेयानीत्याहवनीयेयद्त्तीति गार्हपत्येरात्रिंरात्रिमिति दक्षिणाग्नौपूर्ववत्काष्ठानिनाभाद्दधि
व्यादूतिसभ्ये। याः सेनाइत्यावसथ्ये। समिंधनपर्याप्तानिकाष्ठान्याधायाग्नीनुदर्चिषः कुर्यात्। अथांतराहवनीयगार्हपत्ययोराहोमसमा
प्तेर्नसंचरेत्। अपिवोक्तप्रकारेणसायमेवाहवनीयंप्रणीयाप्रातर्होमसमाप्तिंधार्यते। इतरद्यथापूर्वं। गतश्रीर्यजमानोनित्यमाहवनीयं।
धारयेत्। इतरद्यथापूर्वं। यस्यमथित्वानिहितोन्वाहार्यपचनस्तंनित्यंधारयेदितरद्यथापूर्वं। अपिवासर्वंदक्षिणाग्निमन्वाधानकाले
स्वयोनितआहृत्यआन्वाधानकालंधारयेत्। अथवापूर्वस्थानात्स्थानांतरगतप्राप्तौस्वयोनितआहृत्यस्थानांतरप्राप्तिंधारयेत्॥
गार्हपत्यंतुसर्वः सर्वदाधारयेत्। इति अथरवादिरंस्त्रुवंवैकंकतीमग्निहोत्रहवणीमसंकुचितविलांमूर्द्धप्रां चक्रप्रमाननिर्मितांत्रैवर्णि
कक्तामग्निहोत्रस्थालींचसंपाद्यसंपन्नाग्निहोत्रसाधनः सूर्यास्तमयनक्षत्रोदयमध्यकालसंधौप्रथमनक्षत्रदर्शनेवारात्रिप्रथ
मयामेवाद्वितीययामेवाथापद्रित्रेधाविभक्तरात्रेः प्रथमेद्वितीयेवाभागेसायंहोमनक्षत्रास्तमयः सूर्योदयमध्यकालक्षणेसंधौप्राच्यांजा
तप्रकाशायांवोदयपूर्वसमयेयाद्धौदितेसूर्येवाप्रातर्वाथापदित्रेधाविभक्तस्याह्नः प्रथमेद्वितीयेतृतीयेवाभागेप्रातर्होमंनिश्चित्यातः राम
पूर्वकालेध्वर्युः पत्नीयजमानोवासायमेवप्रातरेववासायंप्रातर्वा अग्नेगृहपतेशुंधस्वेतिगार्हपत्यमग्नेवह्नेशुंधस्वेतिदक्षिणाग्निम ६
ग्नेसंम्राट्शुंधस्वेत्याहवनीयं। अथपंचाग्नेः अग्नेसभ्यशुंधस्वेतिसभ्यमग्नेपरिषद्यशुंधस्वेत्यावसथ्यंपरिसमूहनेनालंकुर्यात्।

होतादर्भैर्दूर्वाभिर्वा दर्शपूर्णमासवदाहवनीयमेववा गार्हपत्याहवनीयावपिवाग्नीनपि वापंचाग्नीनूपरिस्तृणाति। अथयजमानो दक्षि-
णेन विहारं उदीचीमवस्थितामग्निहोत्रीं गां इडासि व्रतभृत्ं न त्वाद्ध्यामी त्यभिमंत्र्येयमसीति वेदिदेशमभिमृशति। अथान्यो दोग्धा पूषा
सीति गोदक्षिणतो वत्समुपसृज्योदीचीं प्रागुदीचीं वाकृताग्निहोत्रस्थाल्या दोहनेन वत्सनानभिमृशन् ज्येष्ठस्य ज्येष्ठिनेयस्य गतश्रि
यश्चपूर्वैस्तिनौ कनिष्ठस्य कानिष्ठिनेयस्यानुजावरस्यवापरौ धोक्ष्यामि विभूतिमवाप्रवानीति भूतिकामस्य वापरौ स्तनौ उक्तेतर-
स्य यथाप्राप्तौ स्तनान्यजमानेनायक्ष्मा वइत्युपसृष्टायां द्यौश्चेममितिदुह्यमानायां गोरुत्संदुहंतीतिधारा घोषस्यानुमंत्रणे क्रियमा
णे दोग्धि। गोदोहांतप्रयोगोक्तिमंत्रमारभ्य सुगंधिभिः सूक्तिप्रसूनैः पुष्णातु पुमर्थान् पुरुषोत्तमः॥ ॥इत्यापस्तंबीयाध्वरतंत्रसूत्रव्या
ख्यायां प्रयोगरत्नमालायां षष्ठप्रश्ने प्रथमः पटलः॥ ॥१॥ ॥पत्नीवदस्याग्निहोत्रं भवति। अग्निहोत्रं पत्नीवत्संनिहितपत्नीकं-
भवति। उत्तरसूत्रेण सिद्धे पत्नीवद्वचनमादरार्थं। अस्येतिवचनाद्यजमानस्यैव कर्मणि स्वाम्यं न पत्न्या इति ख्यापितं भवति। तद्वद्दर्शि
तमेवप्राकृस्व आयतने पत्न्युपविशति। उक्तमायतनं पत्न्याः दर्शपूर्णमासयोर्दक्षिणत उदीच्युपविशतीति। पश्चाद्वा गार्हपत्यस्य प्रा
च्युपविशति। तस्मात्पश्चात्प्राचीपत्न्यन्वास्त इत्यनुवादात्। अपरेणाहवनीयं दक्षिणातिक्रम्योपविश्य यजमानो विद्युदसि मयि श्रद्धे
त्यप आचामति। आचामति भक्षयति। श्रद्धा आस्तिक्यं वा बुध्यं द्विर्मय्यस्तु। शेषं दर्शपूर्णमासयोरारभ्यानां। ऋतं त्वा सत्येन परिषिंचामी

तिसायंपरिषिंचतिसत्यंत्वर्तेनपरिषिंचामीतप्राराहवनीयमग्नेथगार्हपत्यमथदक्षिणाग्निंअपिवागार्हपत्यमाहवनीयंदक्षिणाग्निंय
थावाविहिताः।सभ्यावसथ्ययोर्नपरिषेचनंत्रयाणामेवानुक्रमणात्।अग्निर्यजुर्षी।ऋतंत्वासत्येनपरिषिंचामि।हेअग्नेऋतमवाध्य
मग्निरूपंत्वांसत्येनावाध्येनआदित्यरूपेणोदकेनपरिषिंचामि।सायमग्नावादित्यस्यानुप्रवेशात्।सत्यंत्वर्तेनपरिषिंचामि।हेअग्ने
7 सत्यमवाध्यमादित्यरूपंत्वामृतेनाग्निरूपेणोदकेनपरिषिंचामि।प्रातरादित्येग्नेरनुप्रवेशात्।यज्ञस्य० संतनोमीतिगार्हपत्यात्प्र
क्रम्यसंततामुदकधारांऽस्वानयत्वाहवनीयात्।मंत्रस्यादिसंयोगोधारात्वान्मंत्रः सायंदोहेव्याख्यातः ध्रुष्टिरसिब्रह्मयच्छेत्यपवेष
मादायभूतकृत० रीतिरिगार्हपत्यादुदीचोंगाराग्निरूहत्यंतानूगार्हपत्येनकत्वासगरास्थेत्यभिमंत्र्यजपतिअग्नयआदित्यंगृह्णाम्य
हेरात्रिंमितिसायं।आदित्यायाग्निंगृह्णामिरात्र्याअहरितिप्रातः अंतानूगार्हपत्यस्याग्नेरंतानूबहिरायतनगतानित्यर्थः।ध्रुष्टिर
सीतिदर्शपूर्णमासयोर्व्याख्यातः।वामदेवोयजूंषि।भूतकृतस्थापोढंजन्यंभयममपोढाः सेनाअभीत्वरीरिति० हेअंगारापूर्वंभूत
कृतपाकद्वाराघृष्टिव्यादिकर्तारस्थभवदपोहनेनभूतजन्यंभयममपोढं।तथाभीत्वरीः अभिमुखमागच्छंत्यःपरकीयासेनाश्चापोढाः। राम
सगरास्थ।हेअंगाराः पूर्वंगरवर्तीक्षोणीनोक्तेनसहितास्थ।अग्नयआदित्यंगृह्णाम्यहेरात्रिं।सायंहोमदेवतायेअग्नयेआदित्यंगृह्णामि ७
।अग्नावादित्यंभावयामीत्यर्थः।अहेअहरर्थंरात्रिंगृह्णामिरात्र्यावहोभावयामीत्यर्थः।आदित्यायाग्निंगृह्णामिरात्र्याअहः।प्रातर्होमदे

वतायामादित्ये ग्निं भावयामि अग्निं चरात्रिमित्यर्थः। इडायाः पदं० सुवीर्यायेति। तेष्वग्निहोत्रमधिश्रयति। दोहनस्थमपि पयो ग्निहोत्रस्था स्थामानीयता
मधिश्रयति। वामदेवो नि शाक्करी। इडायाः यदंघ्नुतवश्चराचरं जातवेदो हविरिदं जुषस्व। येग्राम्याः पशवो विश्वरूपा विरूपास्तेषां संतानामिहं
तिरस्तु रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय। हे जातवेदो जातवेदो जातप्रज्ञाग्ने इडायाः पदमंत्रस्यास्पदं घृतनिदानतया घृतवन्तो रूपेणाचर
त्वात् पयो रूपेणाचरत्वात् चराचरमिदं पयो रूपं हविर्जुषस्व। विश्वरूपाः सर्वरूपाः विरूपाः विविधाकाराः ग्राम्याः गोमहिष्यादयो ये स्मदीयाः
पशवः संति तेषां सप्तानां गोमहिष्यावीधायनो क्रानागोमहिष्यजाश्ववराहहस्त्यश्वतरी संज्ञानामिहास्मासु रंतिः प्रीतिरस्तु। ममचरायस्पो
षाय स्त्रप्रजास्त्वाय सुवीर्याय धनपुष्ट्ये शोभनप्रजासंपत्त्ये शोभनेंद्रियोदयाय अधिश्रयामीत्यर्थः। रेतो वा अग्निहोत्रं न सुश्रृतं कुर्याद्रेतः कू
लयेलोश्रृतमंतरे वैव स्यात्। सुश्रृतं नेकुर्याद्रेतः कूलयेत्। इहेतु। नोश्रभृतं च भवति यथांतराम ध्ये इव सुभृतयोर्भवति। तथैव स्यात्। समुद्दंतं
होतव्यं। अंते षु समुद्गतः फेनो यस्य न मध्ये तत्समुद्दंतं तावन्मात्रेणाश्रृतं होतव्यमित्यर्थः। उदंती कृत्य प्रतिषिंच्यं। यथोद्दंतं भवति तथा प्रति
षेक्यं। उपरिष्टाद्विंदुक्षेपः प्रतिषेकः तत्प्रकारश्चानंतरमेव वक्ष्यते। अप्रतिषेक्यं स्यात्तेजस्कामस्य ब्रह्मवर्चसकामस्य पाप्मानं तु स्तूर्ष
माणस्याथो सर्वेभ्यः कामेभ्यो थो यः कामयेत वीरो म आजायेतेति। पाप्मानं तु स्तूर्षमाणस्य उकारो वाहुलकं। अस्पृष्टं स्तर्षमाणस्येत्यर्थः॥
पाप्मानं जिघांसत इति यावत्। वीरः पुत्रो यस्य एवं कामानुसाराद निष्टः प्रतिषेकः। तस्याज्यादिना होमं वक्ष्यति। पयसस्तु नित्यः प्रतिषेकः

अग्नेरधिश्रितं वा। उदंतीकृत्य प्रतिषेक्यं अधिश्रितमात्रमेव वेत्यर्थः। अदृष्टेन त्वा चक्षुषावेक्ष इति तृणेन ज्वलतावेक्षत इति। तृणेनोपरिगृ
हीतेन हविरभिद्योतयन् अवेक्षते। अभिद्योतयति। अभ्येवैनद्धारयतीति श्रुतेः। तृणाग्नेः प्रत्यपिसर्गविवनात् उत्सर्गः अदृष्टेनेति प्रा
शित्रवेक्षणो व्याख्यातः। दोहनसंक्षालनं स्रुवमानीय हरस्ते मा विनैषमिति तेन प्रतिषिंचत्यपां वास्तोवृन्नेन। दोहनं संक्षालयतदुदकं के
8 वलं वोदककाले शं सुवेणक्षिपति। वामदेवो यजुः। हरस्ते मा विनैषं। हे पयः स्ते हरस्ते जोहं मा विनैषं मानीतवानस्मि। उन्द्वस्ठो० रोचयेति।
पुनरेवावेक्ष्य। अंतरितं० मृष्ठेति त्रिः पर्यग्निकृत्वा घर्मोसि० दृंहेति वर्त्म कुर्वन् प्रागुद्वासयति। उदक्प्रादुगद्वा। पुनरेवेति पूर्ववत्तृणेन
ज्वलतेत्यर्थः। वर्त्म कुर्वन् कर्षन्। वामदेवो यजूंषि। उन्द्वस्ठोदहं प्रजया प्रपशुभिर्भूयासं हरस्ते मा विगादुद्यन् स्वर्गो लोकस्त्रिपुलोके पुरो
चयाहे पय स्त्वं सर्वेषां कामानां उद्वस्ठ। उत्पत्तिहेतुरसि। तेनाहं प्रजया पशुभिश्च प्रभूयासं। प्रकर्षेणोत्कृष्टो भूयासं। तेन च हरस्ते जोमा।
विगान्मापगच्छतु। स्वर्गो लोकः कर्मफलं त्वत्त उद्यन्नुद्यमाने वर्तते। त्रिषु लोकेषु मह्यं रोचय संपादय। अंतरितं रक्षोंतं० गेन मृच्छा अ
नेन पर्यग्निकरणेन रक्षो यज्ञविघ्नहेतुरंतरितं तिरस्कृतं। तथाराता यो स्मद्द्वेष्टारोंतरिताः। समृद्धिरस्मत्पशुपुत्राद्यसमृद्धिरपहता। अस्म राम
त्कृतं पापं पापसाधनं कर्माभिचारादिकं अपहतं। पापस्यास्मद्विषये पुराचरिताभिचारादेः पापकृतः इदानीमपि पापं कुर्वतः परस्यतत् ८
पापं कर्मापि हतं। द्वेष्टा नोस्मान् प्रतिपापं कर्माभिचारादिकं चिकीर्षति हे पाप प्रस्त कृ मत्तः पराङ्मुखं सदने पापं चिकीर्षुमृच्छ गच्छ। घर्मोसि

रायस्पोषवनिरिहोर्जं दृंह। हे पयस्त्वमग्निसंयोगाद्घर्मोऽसि। त्वं रायस्पोषवनिः धनाभिवृद्धिसंपादकमसि। इहास्मिंन्यजमाने ऊर्जमलं
दृंह दृढय स्थिरं कुर्वित्यर्थः। न वर्त्म करोतीत्येके। उद्धृत्योद्वास्य तद् इत्यर्थः। इह प्रजां पशून् दृंहेति त्रिर्भूमौ प्रतिष्ठाप्य। सुभूत० त्वरीरीति गार्हपत्ये
गारान्प्रस्तृत्य देवस्य त्वा सवितुः प्रसव इति स्रुक्स्रुवावादाय प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इति आहवनीये गार्हपत्ये वा प्रतितप्य अ
रिष्टो यजमानः पत्नी चेति संमृश्य हिरण्यप० यज्ञानामित्यग्निहोत्रहवणीमभिमंत्र्यो मुन्नेष्यामि० मानमिति सायमाहोमुन्नयामीति प्रातः।
तस्मयो यत्रावटेप्यों ल्लयनमिछति तत्र त्रिः प्रतिष्ठापयति। प्रत्युहनं प्रक्षेपः। स्रुक्स्रुवयोरादानं मंत्रस्यावृत्तिः। देवस्य त्वेत्येकलिंगत्वात्। प्र
तितपनसंमर्शने तु तंत्रेण विभवत्वात्। वामदेवोऽयजूंषि। इह प्रजां पशून्दृंह। हे पयः इहास्मिन्यजमाने। प्रजां पशूंश्च दृंह। दृढय। सुभू
तकृत स्थ प्रत्यूढजन्यं भयं प्रत्यूढाः सेना अभीत्वरीः। हे अंगाराः यूयं हविषः सुभूतत्वसंपादकास्थ। हविःपाकविषयजन्यं प्रत्यूढं। प्रतिक्षि
प्तं। अभिमुखमायांत्यः प्रतिपक्षसेनाश्च प्रतिक्षिप्ताः। देवस्य त्वेति प्रत्युष्टं रक्ष इति दर्शपूर्णमासयोर्व्याख्यातौ। अरिष्टो यजमानः।
पत्नी च। स्रुक्स्रुवप्रतितपनेन पत्नीयजमानावरिष्टावहिंसितौ स्यातामित्येनमर्थमभिमृशामीत्यर्थः। हिरण्यपयष्टिरस्यमृतपलाशास्त्रो
तो यज्ञानां। हे अग्निहोत्रहवणि त्वं हिरण्ययष्टिः हिरण्यवद्दर्शनीयकांडासि। तथामृतरूपहविपुक्ताग्रत्वेनामृतपलाशा यज्ञसंतानहेतु
त्वेन यज्ञानां स्रोतश्चासि। ॐ मुन्नेष्यामि ह मं देवेभ्यः पाप्मनो यजमानं। ॐ मं तर्यामिणोनुज्ञाया हं इदं वैदेभ्यो ह मं देवेभ्यो होतुमुन्नेष्या

मियजमानंचपाप्मनः सकाशादुंल्लेप्यामि। ॐ मुंल्लयामिहव्यमित्यादि। स्पष्टं। हविर्देवाना। अस्तित्यपा॒ऽ॑भूत्का। ॐ मुंल्लये सुजैरनुजानाति।
यजमान इति शेषः। वामदेवो यजूंषि। हविर्देवानामसि मृत्योर्मेभयं॒ऽ॑स्वस्ति मे स्वभयं मे अस्तु हे पयः त्वं देवानां हविरसि। मे मृत्योः सकाशं
द्भयमस्तु। मे स्वस्ति स्वस्त्येवास्तु। सर्वतश्चाभयमस्तु। ॐ मुंल्लय। स्पष्टं। अपचारे यजमानस्य स्वयमात्मानमनुजानीयात्। अपचारो
असंनिधिः अनेनैव न्यायेन स्वयं होमे प्यात्मानुज्ञानं यजमानस्य व्याख्यातं भवति। उल्लीयमान उभौ वाचंयच्छत आहोमात्। स्पष्टं। न
9 चाभिमीलते तिष्ठति च यजमानः। नाभिमीलते न मीलये चक्षुः। आहोमा निष्ठति च स्वयं मनुज्ञाय यजमान होमे पि तिष्ठं लेवोन्नयति॥ आ
सीन इत्यपरं। विवाधमान आर्त्विज्यं वलीय इति न्यायात्। उल्लीत उपविशति। व्यक्तं। चतुरुंल्लयति। चतुरवत्तिन इति शेषः। पंचमं जमद
ग्नीनामित्युत्तरत्र वचनात्। यं कामयेत पुत्राणामयमधुया दिति तं प्रतिपूर्णमुंल्लयेत्। यजमानपुत्राणां मध्ये यमध्वर्युः कामयेताय
मृद्धिमान् स्यादिति तं प्रतिपूर्णमुंल्लयेत्। किमुक्तं भवति। तत्समानस्थानं स्कवमितरेभ्यः पूर्णमुंल्लयेदित्यर्थः। पंचमषष्ठादिकं प्रति त्वंत्यमे
वपूर्णमुंल्लयेत्। यदि कामयेत ज्येष्ठतो स्य प्रजा मृध्नुकाम स्यादिति पूर्णं प्रथममुल्लयेत्। तत ऊनतरमूनतरं। कनिष्ठत इत्येतद्वा विपरीतं। राम
सर्वे समावद्वीर्या इति समं। अथ यदि ज्येष्ठो मृद्धिमास्यादिति कामयेत तदा प्रथमादारभ्यक्रमात् स्रुवान् ह्रासयेत्। यदि पुनः कनिष्ठः ९
तदा प्रथमादारभ्यक्रमाद्वर्जयित्वा अत्यंपूर्णमुंल्लयेत्। अथ यदि सर्वे समा वद्वीर्या इति तदा सर्वान् समानुंल्लयेत्सर्वे चैते ध्वर्योर्यजमा

नाभिप्रायं विदुषः कामाः तत्काम्यता कामानां यथोक्तं याजमाने कामानां कामनमिति। यथोपलंभं नित्येकस्यवउंलयति। कामाभावे यथासंभ
वमुंलयति। अग्नये॰ नयामीति प्रथमं वायवे॰ मीति द्वितीयं सूर्याय॰ मीति तृतीयं॰ चंद्रमसे॰ मीति चतुर्थं। उंलयतीत्यन्वयः। उत्तरतस्त्वा
त्वास्तुवमा साधेत्याश्वलायनः। वामदेवोयजूंषि। अग्नये च त्वा पृथिव्यै चौंल्लयामि। हे हविस्त्वामग्नये च पृथिव्यै चौंल्लयामि। अग्नये
प्रत्यक्षाय पृथिव्यै तदंतज्योतिषइत्यर्थः। एवमुत्तरत्रापि। वायवे च त्वांतरिक्षाय चौंल्लयामि। सूर्याय च त्वा दिवे चौंल्लयामि। चंद्रमसे च
त्वा नक्षत्रेभ्यश्चौंल्लयामीति चतुर्थं। प्रथमेन व्याख्यातानि॰ अद्भ्यश्च त्वौषधीभ्यश्चौंल्लयामीति पंचमं जमदग्नीनां। व्यक्तं। मंत्रः पूर्वै
र्व्याख्यातः। भूरिडा॰ पृथगिडेति वा प्रतिमंत्रं। अत्रापि जमदग्नीनां पंचमो मंत्रः। वामदेवोयजूंषि। भूरिडा भुवइडा सुवरिडा करदिडा पृ
थगिडेति वा इडा लरूपमिदं हविर्भूरादि त्रिलोकभूतरूपं करत्तारंकं पृथक् भेदकं पशून्मे यच्छेत्यपरेण गार्हपत्यमुंलयनदेशे भितरां
सादयित्वा गार्हपत्ये हस्तं प्रताप्य संमृशति। सजूर्देवैः॰ दृंहेति सायं सजूर्देवैः प्रातर॰ दृंहेति प्रातः। अभितरामिति संन्निकर्षे गार्हप
त्यस्येत्यर्थः। संमृशति स्रुग्गतं। स्थालीगतं चेति तु कश्यांतरकाराः। वामदेवोयजुः। पशून्मे यच्छ। स्पष्टं। अग्निर्यजुंषि। सजूर्देवैः सायंयाव
भिः सायंयावानो देवाः स्वस्ति संपारयंतु पशुभिः संपृची यप्रजां दृंह। अहं सायंयावभिः सायं हविर्भागत्वेनागतैः देवैः सजूः समानप्रीति
रस्मि। हे सायंयावानो देवाः मत्स्यं स्वस्ति सुखं संपादयंतु अहं तु पशुभिः संपृक्तो भूयासं। प्रजां च दृंह। दृढां करोमि॰ सजूर्देवैः प्रातर्यावभिः॰

© Dharmartha Trust J&K. Digitized by eGangotri

दृंह। पूर्वेणव्याख्यातं। इशहोत्राचाभिमृश्यपात्नीसमिधंप्रादेशमात्रीमुपरिधारयंन्गार्हपत्यस्यसमयाविहरति। समयाविरिविषः
समीपेनतथा। समिधंस्रुचंवाध्वर्युर्गार्हपत्यंदत्वेत्याश्वलायनः। उर्वन्तरिक्षंवीहीत्यद्रवति। उद्रवतिगच्छति। सोत्रंयजुः। उर्वन्तरिक्षं
वीहि। उरुविपुलंअन्तरिक्षमवकाशंप्रतिपद्यवीहि। गच्छ। उद्रवंदशहोतारंव्याचष्टे। व्याचष्टेजपति। समंप्राणेहरति। समंनासिकया
10 हरतीत्यर्थः। स्वाहाग्नयेवैश्वानरायेतिमध्यदेशेनियच्छति। विहारस्यमध्यदेशेनिगृह्णाति। स्पष्टार्थोमंत्रार्थः। वानायत्वेत्युद्गृह्णाति।
पुनःप्राणसमुद्गृह्णाति। उपतेतसंयतध्वं॰यच्छेत्यपरेणाहवनीयंदर्भेषुसादयति। पूर्वत्रचापरत्रचकूर्चेसादयतीतिबोधायनः॥
वामदेवोशक्वरी। उपप्रेतसंयतध्वंमांतर्गातभागिनंभागधेयात्सप्तर्षीणांसुकृतांयत्रलोकस्तत्रेमंयज्ञंयजमानंचधेह्युपप्रेतसु
पभूर्भुवःसुवरायुर्मेयच्छ। हेहविर्भुजोदेवाः उपप्रेतहविःसमीपमागच्छतआगत्यहविरासादनायसंयतध्वं। यत्नंकुरुत। मांअंतर्देवा
नांमध्येभागधेयाद्युष्मभ्यंदत्ताद्धविर्भागात्भागिनंकर्मफलभागिनंगातरव्यापयत। सुकृतांपुण्यकृतांसप्तर्षीणांवसिष्ठादीनांलो॰ राम
कःकर्मफलंयत्रस्वर्गादौवर्ततेतत्रेमंयज्ञंयजमानंचधेहि। स्थापयत। इदंहविरूपप्रलंभवत्समीपेप्रलंभेमत्यंभूरादिलोकत्रयेआयु १०
रूपयच्छ। प्रयच्छत॥ ॥अत्रप्रयोगः॥ ॥दोहनानंतरंपत्नीगार्हपत्यस्यदक्षिणतउदङ्मुखीपश्चात्प्राङ्मुखीवोपविशति। अथय
जमानोपरेणाहवनीयंदक्षिणाहवनीयंदक्षिणातिक्रम्यस्वायतनेउपविश्यविद्युदसि॰अद्भिरित्यथआचामति। अथहोता। ऋतंत्वा॰

सत्येनेतिसायंसत्यंत्वर्तेनेतिप्रातः। आहवनीयंगार्हपत्यंदक्षिणाग्निमपिवागार्हपत्यमाहवनीयंदक्षिणाग्निंयद्वागार्हपत्यंदक्षिणाग्निमाहवनी
यमिति। त्रीनग्नीन्प्रतिपद्यप्रागपवर्गंपरिषिच्ययज्ञस्येतिमंत्रादिसंयोगेनगार्हपत्यात्प्रक्रम्यआहवनीयंसंततामुदकधारांस्रावयित्वावृष्टि
रसीत्युपवेषमादायभूतकृतस्थइतिगार्हपत्यादुदीचोंगारांन्निरूह्यबहिरायतनमंगारान्कृत्वासगरास्थेत्यभिगारानभिमंत्र्यअग्नयआदित्य
मितिसायंआदित्यायाग्निमितिप्रातर्जपित्वादोहनस्थंपयोग्निहोत्रस्थाल्यामानीय। इडायाःपदमित्यंगारेषुस्थालीमधिश्रित्यप्रातेष्ठेवपे
नोद्गमपर्यंतंश्रपयेत्। अधिश्रितमात्रंप्रातोहृतपकंवा। ज्वलतातृणेनोपरिगृहीतेनाभिद्योतयन्अदब्धेनत्वेत्यवेक्ष्यतृणमुत्सृज्यदोहन
संक्षालनमन्यंवोदकलेशंस्रुवेणादायहरस्तेमाविनैषमितिहविःप्रतिषिच्यप्राग्वत्तृणेनाभिद्योतयन्उन्नवस्थेत्यवेक्ष्यांतरितमित्युल्मुकैः
त्रिःपर्यग्निकृत्वाघर्मोसीतिप्रागुदङ्वाकर्षन्उद्धृत्यवोद्वास्यइहप्रजांपशूनितिसकृन्मंत्रेणप्रागाद्यन्यतरदेशेत्रिःप्रतिष्ठाप्यसुभूतकृत
इतिगार्हपत्येगारान्प्रत्यूह्यदेवस्यत्वेतिस्रुवंस्रुचंचमंत्रावृत्त्यादायप्रत्युष्टमित्याहवनीयेगार्हपत्येवातंत्रेणप्रतितप्यारिष्टइतितयासंमृश्य
हिरण्यपयष्टिरित्यग्निहोत्रहवणीमभिमंत्र्योमुन्नेष्यामीतिसायं। ॐमुन्नयामीतिप्रातरुक्त्वायजमानेहविर्देवानामितिकृपाःशृत्क्वोमु
लयेत्तत्मानंहोतारंवानुज्ञातवतीयजमानाभावेहोतेवस्वात्मानमनुज्ञायसहयजमानेनाहोमाद्यागत्यतोयजमानोवाहोमानवाभिमील
त्योंऽरुपनातिष्ठति। स्वयंहोमेतिष्ठत्वासीनेवास्थाल्युत्तरतःस्रुचमासाद्यस्रुवेणस्थाल्याःपयोन्नयेत्। अग्नयेचेतिप्रथमं। वायवेचेतिद्वि

तीयंसूर्यायचेतितृतीयंचंद्रमसेचेतिचतुर्थं। अथजमदग्नीनामध्याश्चेतिपंचममवदायस्रुचंमुलयेत्। अपिवाभूरिडेइतिप्रथमंभुवइडेइति
द्वितीयंसुवरिडेइतितृतीयंकरदिडेइतिचतुर्थं। पथ्यगिडेइतिपंचमंपूर्ववद्दुंलयेत्। यदायजमानःपुत्राणांमध्येयंकंचित्स्रुचंपूर्णंमुन्नेष्येअ
सौपुत्रमृद्धिमान्स्यादिति। यंकामयेततदातस्रुचसमानस्थानस्रुवंपंचमंषष्ठादीनांलंत्यस्रुवंपूर्णंमुलयेत्। अथयदिज्येष्ठतआ
रभ्यप्रजाधृंकामस्यादितिकामयेततदापूर्णंप्रथमंततऊनतरमूनतरंइस्येवंमुलयेत्। अथयदिकनिष्ठतआरभ्यप्रजाधृंकामस्या
दितिकामयेततदाप्रथममूनंततोऽधिकमधिकंअत्यंपूर्णंमुलयेत्। अथयदिसर्वेसमावर्द्धीयांस्युरितिकामयेततदासर्वाणिसमान्युं
लयेत्। सर्वत्रसर्वमन्यद्यथापूर्वं। अथपृथ्व्यन्मेयच्छेत्यपरेणगार्हपत्यमुल्लयनदेशेवागार्हपत्यस्यसंनिकृष्टेचानीतदर्भेषुसादयित्वा
गार्हपत्येहस्तंप्रताप्यसजूर्देवैःसायमितिसायंसजूर्देवैःप्रातरितिप्रातःउन्नीतंसंमृश्यदशहोत्राचाभिमृश्यप्रादेशमात्रीपालाशीस
मिधमेकांदद्येतिस्नोवा। तदुपरिधारयंनूनासासममुद्धृत्यगार्हपत्यार्चिःसमीपेहरन्नुर्वन्तरिक्षमितिगच्छन्दशहोतारंजपंनूस्वाहाग्नये राम
वैश्वानरायेतिविहारमध्यदेशेनिगृह्यवातायत्वेतिपुनःनासासममुद्धृत्योपप्रेतेत्यपरेणाहवनीयंदर्भेषुसादयति॥ ॥इत्थंहविःसाद ११
नांतमंत्रतंत्रसुगंधिभिःसूक्तिप्रसूनैःपुरुषार्थानुपुरुषोत्तमः॥ ॥इत्यापस्तंबीयाध्वरमंत्रसतंत्रव्याख्यायांप्रयोगरत्नमाला
यांपंचप्रश्नेद्वितीयःपटलः॥ ॥अत्राग्न्याहरणेरोदृंगवील्यादिनाग्निहोत्रस्यद्रव्योत्पत्तिप्रभृत्याहोमादवस्थाविशेषाणांमनेकदेवतासं

वंधप्रदर्शनेनाग्निहोत्रस्तुतिमुक्त्वा यदग्निमुद्धरन्ति वसवस्तार्ह्यग्निरित्यादिनाहवनीयेपि तथाकृतं तद्दशानी सूत्रकारो दर्शयति। यस्याग्नावु
ध्रियमाणे हूयते वसुषु हुतं भवति निहितो धूपायंश्चेत् रुद्रेषु प्रथममिध्ममर्चिरालभत आदित्येषु सर्व एव सर्वशः इध्म आदीप्तो भवति विश्वेषु
देवेषु नितरामर्चिरूपा वैतिलोहि केव भवति इन्द्रेषु हुतं भवति अंगाराणां भवने। तंतेभ्योंगारेभ्यो र्चिरुदेति प्रजापतावेव शरोंगारा अध्यूहं तेततनो
नीलोपकाशो र्चिर्मुदेति। ब्रह्मणि हुतं भवति। यस्याग्नावुध्रियमाणे हूयत इतियद्धोमार्थं हूयते उध्रियते वसुषु तेन हुतं भवतीत्यक्र ध्रिय।
माणावस्थासु स्तुतिः। अन्यथो ध्रियमाणे होमासंभवात्। येःस्वाहवनीयायतनस्योपरि ध्रियमाण इति व्याख्यानं तैः भूर्भुवः सुवरु
ध्रिद्रियमाण इति उध्रियमाणमभिमंत्रयते यस्याग्निरुध्धृत इत्याद्यपि न तथाव्याख्यातव्यमिति। आस्तां तावत्। अथ उत्तरे अवस्था।
विशेषाः सोयमुद्धृतोग्निरायतने निहितः सधूमः शेते। ततः प्रथमं काष्ठमर्चिर्गृह्णाति। ततः सर्व एवेध्मः सर्वप्रदेशेषु आदीप्तो भवति ततो
र्चिरूपरिमंदवेगान्नीचैर्गच्छति लोहितश्च भवति ततश्च काष्ठेभ्योंगारा भवति। तेभ्यो र्चिरुत्तिष्ठति ततोंगाराः शरोअध्यूहंते। शरता भस्म।
ता भस्मना सूक्ष्मेण संयोगं प्रपद्यंते ततस्तेभ्यो नीलप्रकाशो र्चिश्चोदेति। ततः रुद्रेष्वादित्येष्वित्यादी नामपि हुतं भवतीत्यन्वयः। एतदुक्तं भवति।
यदेवमनेकविधावस्थाश्रयभूतेग्नौ हूयते तत्तत्सर्वास्ववावस्थासु देवतासु हुतं भवतीति। स्फुटश्चायमर्थो ब्राह्मणे यथा वसुषु रुद्रेष्वादित्ये।
ष्वित्यादि। अथ होमार्थं अवस्थाविधिं दर्शयति। यदंगारेषु प्रवशांतेषु लेलायद्धी वभातितद्धेवा नामास्यं तस्मात्तथाहोतव्यं यथास्येपि

दधात्येवं तदिति विज्ञायते। अवस्थेपं दर्शपूर्णमासयोरेव आख्याता। तद्दत्रापि नित्या च। तथा हरश्च दर्शितो अस्मादेव तास्यत वचनात्।
निद्युद्सीत्ति॰ मुपैमीति होष्यंन्नपउपस्टश्यपालाशीं समिधमादधात्येकां द्वे तिस्रो वा। होष्यंन्निति अनेन होष्यंन्नपउपस्टशेदित्येतत्
ब्राह्मणं व्याचष्टे। सोयं तत्र कालो विवक्षित इति। लो हि नीकेन भवतीद्रेहुतं भवति। पुनः पालाशवचनात् सर्वाः पालाश्यः तथा सर्वासाम
पिस्कवोपरिधारणमुक्तं हिरण्यकेशिना। यथैकां द्वे तिस्रो वेत्यपरिष्टात्स्क द्रं डउपसंगृह्येति। मंत्रो दर्शपूर्णमासयोव्याख्यातः। एषा
ते अग्ने समिदिति हिरण्मयं दधामीति द्वितीयां रजतां त्वा ध्रुवा सीदेति सायं तृतीयां। हरिणी उदधानीति प्रातः। व्यक्तं। एषा ते अग्न
इति अनूयाजे व्याख्याता। वामदेवो यजुः हिरण्मयं त्वा वंशं स्वर्गस्य लोकस्य संक्रमणं दधामि। हे समित्॰ हिरण्मयं पालाशत्वेन हि
रण्यरूपं वंशं अग्निं संतानं स्वर्गस्य लोकस्य संक्रमणं शमनोपायं त्वामादधाति॰ अतिजगत्यौ। रजतां त्वा हरितगर्भां अग्निज्योतिषि
मक्षितिं। कामदुघां स्वर्ग्यां स्वर्गाय लोकाय रात्रिमिष्टकामुपदधे तया देवतयांगिरस्वद्ध्रुवा सीद। हे समित् द्रजतां राजमानां हरितग
र्भां हरितवर्णामिध्मां अग्निज्योतिषं अग्निलक्षणज्योतिर्युक्तां अक्षितिमक्षीणां कामदुघां कामदोग्ध्रीं स्वर्ग्यां स्वर्गसंपादयित्रीं रा राम
त्रिरूपामिष्टकां त्वां स्वर्गाय लोकायमतत्त्विध्यर्थं उपदधे तं च तया देवतया अग्निलक्षणयांगिरस्वत् अंगिरसां चयने इष्टके ध्रुवा स्थि। १२.
सीदेतिष्ट। हरिणीं त्वा रजतगर्भीं सूर्यज्योतिषमक्षितिं। कामदुघां स्वर्ग्यां स्वर्गाय लोकाया हरिष्टकामुपदधे तया देवतया द। हरि

णींहरितवर्णांस्रजतगर्भांराजमानांमध्याह्नेसूर्यलक्षणांज्योतिर्युक्तांअहोरूपांशेषंपूर्वेणव्याख्यातं।समिधमाधायप्राणापानान्यनिमील्यवीक्ष्य
हुत्वाध्यायेद्यत्कामस्स्यात्।प्राणेनमुक्त्वासोपानंनन्निश्वासः।यत्कामस्स्याद्यजमानःसतदध्वर्युर्ध्यायेत्।यथापुत्रोऽस्यास्तीत्यादि।हुत्वामहदभि
वीक्षते।हुत्वातद्देवहुतंमहन्नद्भूपिष्टंअभिवीक्षते।अथवापूर्वाहुत्यर्थंप्रमादान्महधुत्वातद्देवाभिवीक्षते।प्रायश्चित्तार्थमित्यर्थः।आदीप्ता
यांजुहोतिश्यावायांवा।यदावासमतीतार्चिर्लेलायतीवधूयायंतांसांग्रामकामस्यज्वलन्त्यांब्रह्मवर्चसकामस्यांगारेषुतेनस्वकामस्यसमि
धस्त्वाद्याःतिस्रोवस्थानित्याःशेषाःकाम्याःतत्रश्यावाश्यामीभूताव्याख्यातंशेषः।द्वांगुलेमूलात्समिधमभिजुहोति॰समिधमभि॰अ
भिसमिधि॰अग्निकामंसायंजुहोत्यवक्तंप्रातः।अग्निंप्रतिक्रामंसायंअग्नेःप्रतीपंप्रातः।उभयत्रवाभिक्रामं।व्यक्तं।भूर्भुवःसुवरिति
होष्यंजपति।भूर्भुवःसुवर्होष्यन्नितिपुनर्वचनमवश्यकृत्यैरमवायार्थं।अग्नयेस्वाहेतिसायमग्निहोत्रंजुहोतिसूर्योज्यो॰प्रातः।व्य
क्तं।अग्निर्यजुषी।अग्निर्ज्योतिररग्निस्स्वाहायोयमग्निःसएवसूर्यादिलक्षणंज्योतिःयदिदंज्योतिस्सदेवाग्निःएतदाहुतिदेवता।तस्मा
दिदमाहुतमस्तु।सूर्योज्योतिर्ज्योतिःसूर्यःस्वाहासोयंसूर्यःसएवाग्न्यादिलक्षणंज्योतिःतत्रयज्योतिःसदेवायंसूर्यः।तदाहुतिर्देवता
तस्मादिदंस्वाहुतमस्तु।संसृष्टंहोमंवा।अग्नि॰स्वाहेतिसायंजुहोति।सूर्योज्योति॰हेतिप्रातःकुर्यादितिशेषःसंसृष्टेनमंत्रेणहोमः।
संसृष्टहोमः।संसृष्टाभ्यांदेवताभ्यांदेवताभ्यांवा।अग्निर्यजुषी।अग्निर्ज्योतिर्ज्योतिःसूर्यःस्वाहा।सूर्योज्योतिर्ज्योतिरग्निःस्वाहा।अग्नि

सूर्यौ सायंहोमदेवता सूर्याग्नी प्रातरित्यर्थः। इषे त्वेति स्रुक्स्रुवाद् दवाचीनं सायं लेपमवमार्ष्टि ऊर्जे त्वेति हूर्ध्वं प्रातः। अवाचीनमग्रादारभ्य
13 बिलात्। तद्विपरीतमूर्ध्वं। तंडुलादिनिहोमे पार्श्वतो जननं सामर्थ्यात्। अवमार्जनमपादानं। ओषधीभ्यः त्वेति बर्हिषि लेपं निमृज्य वर्चो मे यच्छेति स्रु
वं सादयित्वा अग्ने गृहपते० प्रतीक्ष इति गार्हपत्यं प्रतीक्षते। भूर्भुवः सुवरित्युत्तरामाहुतिं पूर्वार्धे समिधि जुहोति। तूष्णीं वा। पूर्वार्धेऽग्नेः समि
धि जुहोति। समिधि पूर्वार्धे इति केचित्। वामदेवो यजुषी। ॐ ओषधीभ्यः स्तो ओषधी जिन्व। हे लेप त्वामोषधीभ्यो देवेभ्यो निवेदयामि। त्वमोषधीः
जिन्व। प्रीणय। वर्चो मे यच्छ। स्पष्टं। जगती। अग्ने गृहपते मा मा० क्षे। हे गृहपते गार्हपत्याग्ने मा मा संताप्सीः न संतापय अहमा
त्मानं आत्मनि यजमाने अमृतमक्षीणं प्रजाज्योतिः प्रजालक्षणं ज्योतिरधिनिधारयामि। त्वां चादृश्येनानुपहतेन चक्षुषा प्रतीक्षे। व्याहृ
तयो न्वाधाने व्याख्याताः। न समिदग्निहोत्र इत्येके। न वा समिदग्निहोत्रे तत्र्योत्तराहुतिः तथापि पूर्वार्धेन होमः। वर्षीयसीमुत्तरामाहुतिं हु
त्वा भूयो भक्षायावशिनष्टि। पूर्वाहुतेर्भूयस्युत्तराहुतिः। ततोऽपि भूयान् भक्षणार्थः शेषः। यं कामयेत पापीयान् स्यादिति भूयः स्तस्य पूर्वा राम
हुत्वा उत्तरां कनीयो जुहुयादिति। कनीयः अल्पीयः हुत्वा स्रुचमुद्गृह्य रुद्र मृडानेति त्रिः स्रुचाग्निमुदंचमतिवल्गयति। हुत्वेत्येतदसं १३
देहार्थं। असति हि तस्मिन्नुत्तरकालीनो जुहुयात्। स्रुचमुद्गृह्येत्यन्वयः। प्रतीयेत। अतिवल्गयति। कंपयति ज्वालां। वामदेवो यजुः। रुद्र
मृडानं। हे रुद्र गद्गदयितः मृड सुखकर अनाशरहितो भव जगदुन्मादक मृड सुखरूप धूर्तमायाविन् पशुपते देव ते तुभ्यं नमोऽस्तु। एनं यज

मानंत्रायस्वरक्ष। पूर्ववल्लेपमवमृज्य प्राचीनावीती स्वधापितृभ्यः जिन्वेति दक्षिणेन वेदिं भूम्यां लेपमवमृज्य। प्रजां मे यच्छेति स्रुवं सादयित्वा
वृष्टिरसि०गामिति हुत्वाप उपस्पृश्यांतर्वेदिस्रुग्गतां गुल्फापादायपूषासीति लेपं प्राश्याशब्दं कुर्वन्नतिहायद तः। पूर्ववत् पूर्णाहुतिवत्। प्राचीना।
वीतस्मरणार्थं लेपमार्जनोत्तरकालार्थं वा। दक्षिणेन वेदमिति वेदिदेशो लक्ष्यते। वेधमभात्। हुत्वाप उपस्पृश्येति। होष्यं न्नप उपस्पृशेद्धित्वने
नव्याख्यातं। अंतर्वेदिस्रुगिति क्रिया विशेषणं यदांतर्वेदिन तात्तानर्थेत्यर्थः। वा क्य मे देन वा योजमना। अंतर्वेदि स्रुग्भवति अर्थां गुल्फापादा
येति। अंगुल्यानामिकयां अनामिकयेत्येवकालायनः। अशब्दं कुर्वन्नमुखशब्दमकुर्वन्। अतिहायदतः। अतीत्यदंन्। वामदेवोयजूंषि।
स्वधापितृभ्यः पितृन् जिन्व। अयं लेपः पितृभ्यः स्वधादीयते। हे लेप तं पितृन् जिन्व प्रीणय। प्रजां मे यच्छ। हे स्रुक् त्वमेमह्यं प्रजां यच्छ। वृष्टिर
सीति पिंडपितृयज्ञे पूषासीति सां न्नाय्ये व्याख्यातौ। अप आचम्येवंपुनः प्राश्याचम्य। बर्हिषोपयम्योदङ्ङावृत्यो त्सृप्य गर्भेभ्यः स्वाहेति उ
दग्दं डुयाप्राग्दंडयास्रुवा वा मति। अप आचम्येति प्राश्याचम्येति वा पां भक्षण विधिः। न तु शौचार्थं। आचमनानुवाद इति केचित्। बर्हि
षोपयम्य स्रुचा वामती त्यन्वयः। वामदेवो यजुः। गर्भेभ्यस्त्वा गर्भान्प्रीणीहि। हे हविः शेषरूप त्वां गर्भेभ्यो गर्भरूपापत्यार्थं भक्षयामि। त्वं च ग
र्भान्प्रीणय। आग्नेयं हविरिति। सांन्नाय्यप्राशनेव्याख्याते। अयं मंत्रः विशेषः। वामदेवो बृहती। वृष्टिसनि। स्वभक्षणेनास्मदर्थं वृष्टिं भजमा
नमिति। सौर्यं हविरिति प्रातर्मंत्रं संन्नमति। सौर्ये। हविरिसेवत्सूर्यप्रजामित्यस्यापि प्रदर्शनार्थो। तथा सूर्यप्रजामिह्लेवबौधायानः। संस

ष्टहोमेचोभयंभवति। यथाग्नेयपथौ हविः सौर्यंहविरिति। द्विः स्रुचंनिर्लिह्यात् त्रिः स्रुचंपूरयित्वोच्छिष्टभाजो जिन्वेतिपराचीनंनिनीयाचम्याग्ने
एणाहवनीयंदर्भैरग्निहोत्रहवणींप्रक्षालयति। पराचीनमनवाघ्रसासकृदेवापोनिनीयतआचामति। नतुभक्षणानंतरं। सोऽत्रयजुः। उच्छिष्ट
भाजोतिन्व। हेउदकत्वंउच्छिष्टभाजोदेवानूप्रीणय। नमासधौतस्यदेशाभुंजतइतिविज्ञायते। थयदिपात्रंमांसधौतंहस्तधौतंभवतीतित।
थादर्शनात्। स्रुचः स्रुकृअपरिमिताअपः उत्सिच्योध्वंक्षिप्ताअयमेवोध्वीयांसेकः। पत्न्यनेकत्वेतुशेषमंजलिषुविभज्यनिनयति।
वामदेवोयजूंषि। सर्पेभ्यस्त्वासर्पाजिन्व। हेउदकत्वांसर्पेभ्योदिक्षुसर्पत्किभ्योदेवेभ्यउत्सिंचामि। त्वंसर्वान्प्रीणय। सर्पानूपिपीलि।
काजिन्व। हेउदकसर्पानूपिपीलिकाश्चप्राणिविशेषानूप्रीणय। सर्पेतरजनांजिन्व। हेउदकसर्पान्तदितरान्। तउदकापेक्षिणोजनां
श्चप्रीणय। सर्पदेवजनांजिन्व। तथासर्पान्देवपरिजनांश्चप्रीणय। पृथिव्याममृतंजुहोमिस्वाहा। अमृतमुदकंपृथिव्यांजुहोमिनि
नयामिस्वाहेदंनिवेदितमस्तु। गृहेभ्यस्त्वागृहांजिन्व। गृहेभ्योगृहस्वामिभ्योपत्न्यैत्वांनिनयामि। तंचगृहानूपत्नीनूप्रीणय। यदिपत्नी
नानुष्ण्यात् दिवानाम्। हेतिपत्न्यायतनेनिनयेतु। नानुष्ण्यानान्वासीनास्यात्। पूर्ववद्दाळंभुकलादिना। सोऽत्रयजुः। देवानांपत्नीभ्योमृतंजु राम
होमिस्वाहा। अमृतमुदकंदेवपत्नीरूद्दिश्यनिनयामिनत्वसुनीतमस्तु। अपः स्रुच्यानीयविप्रुषंशंतिरसीत्सकंलयनदेशेनिनी। १४
याहवनीयेस्रुचंप्रतप्यहस्तोवधेयोहस्तौवाप्रताप्यस्रुच्यवधेयः। अपरमुदकमितिशेषः। स्रुच्यस्तयोः प्रतापनेविकल्पः। अव

धानमंत्रो उभयत्र हस्तस्यैव। सो ऽत्र यजुः। विप्रुषां शांतिरसीति। तयोर्ध्व उदग्दिशानी तिसप्तर्षिभ्यो जिन्वेति। तथा तथा युक्त हस्तया स्रुचा उदङ्मु
खस्तमूभ्याएं सप्तष ऋनुद्दिनुश्यमं चति + । इति हे उदकविप्रुषां उल्ययनका लेपतितानां हविर्विंदूनां शांति दोषशमन हेतुरसि। तयोदङ्
दिशाति। सप्तर्षीनु द्दिश्य मुंचति सप्तर्षिभ्य स्त्वेति। सो ऽत्र यजुः। सप्तऋषिभ्यस्त्वा सप्तऋषीं जिन्वेति। हे ऊर्ध्वं नु त्वां सप्तर्षिभ्य उद्दिशामि
त्वं सप्तऋषीन् प्रीणय॥ ॥अत्र प्रयोगः॥ ॥हविःसादनानंतरं विघुदसीत्यप उपस्पृश्यैषा ते अग्न इत्येकं। पलाशस मिधं द्वे वाद्दि
रण्मयं त्वेति द्वितीयं तिस्त्र श्रेद्द्रजत त्विति सायं। हररिणी त्वेति प्रातः स्त, तीयामाधाय स्रुचमादाय प्राण्यापान्व निमीस्व वीक्ष्याभिक्रम्य
वीतार्चिषि लेलाय त्यग्नौ समिध्यादीप्रया श्यामायां वावीता र्चिषि लेलायत्यां वाधूपायत्यां होष्यामि ग्रामकाम म वा प्रवानीति ग्रामकाम
स्य धूपायत्वात्तथा ब्रह्मवर्चसकामस्य ज्वलत्यां तेजस्काम स्यांगारेषु सायमग्निं प्रतिक्रांत्वा प्रातः प्रतीपं गत्वो भयत्र वा प्रतिक्रांत्वा भूर्भुवः सु
वरिति जपित्वाग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेति सायं जुहोति सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः। संसृष्टहोमेग्निर्ज्योतिः सूर्यः स्वाहेति
सायं सूर्यज्योतिरग्निस्वाहेति प्रातः। मूलाद्ध्यंगुले समिधममिराहुतेत्यं हुत्वा पुत्रो स्या त्विस्यादिना यजमानकाममभिध्यायन्तदेव हुतं भू
यिष्ठमभिवीक्ष्य यह्वा प्रमादाद्भूयिष्ठं हुतं प्राय श्चित्तार्थमभिवीक्ष्य यजमाने नाग्नय इदं न ममेति सायं सूर्यायेदं न ममेति प्रातः। संसृष्ट
होमेग्निः सूर्याभ्यामिदं न ममेति सायं। सूर्याग्निभ्यामिदं न ममेति प्रातः। क्के इ पे त्वेति स्रुक्स्रुवादर्वाचीनं सायं ऊर्जे त्वेति प्रांचं प्रातः। ले

पमादायौषधीभ्यस्त्वेति बर्हिषि लेपं निमृज्य वर्चो मे यच्छेति स्रुवं सादयित्वाग्ने गृहपत इति गार्हपत्यं प्रतीक्ष्य स्रुवमादाय भूर्भुवः सुवः स्वाहेति
तूष्णीं वा समिध्य समिधि वाग्नेः पूर्वार्द्धे पूर्वाहुतेरधिकं भक्षणार्थमधिकतरं शेषयित्वा प्रपत्य प्रजापतय इदं न ममेत्युक्त्वा वक्ष्यमाणप्र
15 कारेणोपस्थाने क्रियमाणे स्रुवमुद्धृत्य रुद्र मृडेति स्रुचा त्रिरग्निर्ज्वालामुदीचीं कृपयित्वा पूर्ववल्लेपमादाय प्राचीनावीती स्वधा पितृ
भ्य इति दक्षिणेन वेदिदेशं भूम्यां लेपं निमृज्य प्रजां मे यच्छेति स्रुवमंतर्वेदि स्थापयित्वा वृष्टिरसीत्यप उपस्पृश्य स्वयं होत्रे वक्ष्यमाणो
पस्थानं कृत्वा बर्हिर्वेदि सव्यमनामिकया लेपमादायामुरव शब्दमदंते स्पर्शं नं प्राश्यापो भक्षयित्वाचम्य वा पुनः पूर्ववदवदाय लेपं प्रा
श्यापो भक्षयित्वाचम्य च। बर्हिषो पम्य स्रुवं गृहीत्वा सव्यत उदङ्मुखो हुत्वात्सृप्यगभ्येभ्यस्त्वाग्नेयं हविः सूर्यप्रजामिति प्रातः। संसृष्ट
होमे त्वाग्नेयं सौर्यं हविः अग्निः सूर्यप्रजामिति सायं। सौर्यमाग्नेयं हविः सूर्योग्निः प्रजामिति प्रातरुदग्दंड्या प्राग्दंड्या वा स्रुचैव
कृत्वादियुगादिषु शेषं भक्षयित्वाद्भिः स्रुवं निर्लिह्यात्। कलौ तु हस्ते शेषमवदाय भक्षयित्वाद्भिः स्रुवं पूरयित्वोच्छिष्टभाज इत्यपर्या
वर्तयन्नुसकं त्वनीयाचम्य अग्रेण हवनीयं दर्भैरग्निहोत्रहवणीं प्रक्षाल्याद्भिः स्रुवं पूरयित्वा सर्पेभ्यस्त्वेति मंत्राद्वस्त्वाचतसृषु दिक्षु राम
सहोर्ध्वं पंच स्रुवा प्युत्सिच्य पुनः पूरयित्वा सर्पानुपिपीलिका जिन्वेति। पुनः पूरयित्वा सर्पेतरजनां जिन्वेति। पुनः पूरयित्वा सर्प १५
देवजनां जिन्वेति। त्रिरुत्सिच्य पुनः पूरयित्वा पृथिव्याममृतमित्यपरेणाहवनीयं स शेषं निनीय शेषं पत्न्यां नत्वौ। गृहेभ्यस्त्वेति तदने

कलेयथाभागंमंत्रावृत्त्याग्निनयेद्यदिपत्न्यसंन्निधिर्देवानांपत्नीभ्यइतिपत्न्यायतनेग्निनीयांन्यमुदकंस्रुच्यानीयविप्रुषाऽशांतिर
सीसंन्नयनदेशेग्निनीयाहवनीयेस्रुचंहस्तेनाअवधार्योदङ्मुखस्तयास्रुचानदूष्याणांसप्तऋषिभ्यस्वेतिसप्तऋषीनुद्दिश्यसृजति।ऊष्मोदृशांतुतं
त्रो।क्लिमंत्रव्याख्यासुगंधिभिः।सूक्तिप्रसूनैःपुष्णातुपुमर्थानूपुरुषोत्तमः॥ ॥इत्यावीयाध्वरतंत्रस्वतंत्रव्याख्यायांप्रयोगरत्नमालायांषष्ठेप्र
श्नेतृतीयःपटलः॥ ॥अग्नेगृहपते० स्वाहेतिस्रुवेणगार्हपत्येजुहुयात्।एकांद्वेतिस्रोवा।आहुतीरितिशेषः।तास्वशेषादेवस्थालीगता
ञ्जुहोति।द्रव्यांतरावचनात्।तथैवतस्मादेवाग्निहोत्रशेषादेवेतिभारद्वाजः।तत्तस्वशेषकार्यतादासोन्नप्रयोजकत्वमितिसिद्धंभवति।वा
मदेवोयजूंषि।अग्नेगृहपतेपरिषद्यजुषस्वस्वाहा।हेपरिषद्यगार्हपत्याग्नेत्वंइदंहविःसेवस्व।तुभ्यमिदंस्वाहुतमस्तु।अग्नये०स्वाहेत्येता
मेकेसमामनंति।व्यक्तं।अग्नयेगृहपतयेरयिपतयेपुष्टिपतयेकामायान्नाद्यायस्वाहा।धनपालकायपुष्टिपालकायकामप्रदायान्नाद
नसाधनायगृहपतयेग्नयेस्वाहुतमस्तु।समुच्चयवदेके।अस्मिन्पक्षेनैकांसमुच्चयासंभवात्।द्वेचेत्त्वेवसंदेहः।तिस्रःश्चेदग्धेनद्वेअ
द्वितीनवाद्वेअंत्ये।चतस्रश्चेद्वाभ्यांरसकृत्सकृदेकैकयाद्विर्द्विर्वाहोमः।अग्नेदाभ्य०हेतिस्रुवेणान्वाहार्यपचनेजुहोत्येकांद्वेतिस्रःश्चतस्रो
वा।व्यक्तं।अग्नेदाभ्यपरिषद्यजुषस्वस्वाहा।हेअदाभ्यानुपहतव्यापरिषद्योग्यदक्षिणाग्नेइदंहविःसेवस्वेत्यादि।अंन्नपते०स्वाहेतिद्विती
यां।द्वितादिकल्पेद्वितीयामनेनमंत्रेजुहोति।ततोन्यांपूर्वेण।अग्निर्वृहतीः अंन्नपतेन्नस्यनोदेह्यनमीवस्यसुष्मिणः।प्रप्रदातारंतारिष।

ऊर्जं नो धेहि द्विपदे चतुष्पदे स्वाहा। हे अन्नपते अग्ने अनमीवस्य रोगरहितस्य शुष्मिणो बलहेतोरन्नस्य प्राप्तिं नो अस्मभ्यं धेहि। प्रदातारं
प्रकर्षेण हविषो दातारं यजमानं प्रतारिषः प्रकर्षेण पूरितात्तारय। नो अस्माकं द्विपदे चतुष्पदे मनुष्याय पशवे च ऊर्जं बलं धेहि। संपा
दय। अग्नाश्यवापरयोर्जुहुयात्। यथा स्वर्गो लोकात्स्य स्यवरोहेत्ताहृक् तदिति विज्ञायते। व्यक्तं। किमेवं निंदितादरणीय एवापरा
16 ग्निहोमः नेत्याह। सर्वे वा एते होमार्था आधीयंते च तस्मो गार्हपत्ये जुहोति च तस्मोन्वाहार्यपचने द्वे आहवनीये दश संपद्यंते दश
क्षरा विराड्विराजा यज्ञः संमित इति च ब्राह्मणं भवति। एवं होमो पिशाखां जनरैश्रूयते। ततो याथाकामी होमयोरिति भावः। बहुष्वेतुप
राग्न्याश्वतस्रश्च तस्र आहुतयो नियताः। दीदिहि दीदिदायैत्येषोग्न्युपसमिंधने आम्नातः। सर्वेषामग्नीनामेष उपसमिंधनो मंत्रः। दी
दिहि दीदिहासि दीदाय। निरुक्तिः सर्वाग्न्यर्थः। हे अग्नयो दीप्यध्वमित्यर्थः। दीद्यास संदीप्यस्वेति वा प्रतिमंत्रं। पंच चैते मंत्राः पवानामेकैक
स्यानस्युः। दीदिहि दीदिदासि दीदाय दीद्यास संदीप्यस्व। स्पष्टार्थः। यथाहितास्तेनानुपूर्वेणाहवनीयाद्यप्रक्रमः। उपसमिंधयतीतिशे
षः। अंतर्वेद्यपो निनीय पूर्ववदग्नीनुपरिषिंचति। व्यक्तं। नधारांस्त्रावयतीति शेषः। अत एव प्रतिषेधाज्जानीमः। परिषेचनागंधारेति। राम
अतः बहुविदुद्धरणे वीकूपरिषेचनान्न्हवति। अपिप्रे० धेह्यग्निहोत्रस्थाल्यां तृणमंडूत्वानुप्रहरति। अग्निहोत्रसादनार्थात्तृणं बर्हिष १६
एकं तृणमंत्का ज्ञाहवनीयेनुप्रहरति। द्विपदा जगती० अपिप्रे रग्नेस्वां तनुवमयाहू द्यावापृथिवी ऊर्जमस्मासु धेहि। साल्यग्निहोत्र।

स्यास्थितिः। तृणप्रहरणस्यैव स्तुतिरियं। यथादर्शपूर्णमासयोः। बर्हिःप्रहरणेन संस्थाभवति। एवमग्निहोत्रस्यापीति। न बर्हिरनुप्रहरेदसं
स्थितो वा एष यज्ञो यदग्निहोत्रमित्युक्तं। शाखांतरे तु न बर्हिरनुप्रहरेदिति प्रकृत्यां संस्थितं इत्यादिनानुप्रहरणं निषिद्धं तस्मान्नानुप्र
हृत्यमित्युपसंहृतः। अतो वैकल्पिकं तृणप्रहरणमिति भावः। अग्निहोत्रस्थालीप्रक्षाल्याक्षितं॰ स्वाहेत्यन्नयनं देशे निनयत्यं तर्वे
दिवा। व्युक्तं। यज॰ अक्षितमक्षित्यै जुहोमि स्वाहा। अक्षिणमिदमुदकं अक्षीणत्वाय निनयामि। इदस्वानीतमस्तु। वृष्टिरसीति॰ श्रद्धे
ति अप आचम्य यजमानोऽन्तर्वेदि मार्जयंते न्नादश्च श्रद्धिषीयेति। आचम्य भक्षयित्वां तर्वेदि मार्जयते। वेद्यां हस्तं प्रसार्य तस्मिन्नप आ
सिंचन्। तथा आश्वलायनः। हस्ते प आसेचतेतन्मार्जनं। वृष्टिरसीति व्याख्यातं। प्रागुक्तं॰। अन्नादास्थान्नादो भूयासं यशस्व यशस्वी
भूयासं श्रद्धास्थ श्रद्धिषीय। आपो ह श्लेष्म प्रथमं संबभूव। हे उभे आपो यूयं मन्नादः अन्नादस्थ अपोहमन्नादो भूयासं। यशोस्थ अहं
यशस्वी भूयासं। श्रद्धा श्रद्धाते तस्थ श्रद्धषीये श्रद्धावानहं भूयासं। आपो ह श्च वर्चस इति शिरस्यप आनयापः शिरस्याप आनयने वा
व भूयं भवतीति। तथा च श्रुतिः अपो निनयत्यव भृथस्यैव रूपमकरिति। जगती॰ आपो ह श्लेष्म प्रथमं संबभूव येन धृतो वरुणो येन मित्रः।
येनेंद्रं देवा अभ्यषिंचंतरा ज्यायते नाहं मामभिषिंचामि वर्चसे। आपो ह आपो नाम श्लेष्म सर्वपदार्थश्लेष्मकं वस्तु प्रथमं सर्वज्येष्ठं संबभूव।
येन वस्तुना धस्ता द्वरुण उपरिष्टा न्मित्रश्च धृतं। येन च देवा इंद्रं राज्याया भिषिंचत। तेनोदकेन वर्चसिध्यर्थं मामभिषिंचामि। अथाग्निहोत्रे।

काम्यानुकल्पानाह। द्वयोः पयसा पशुकामस्य जुहुयात्। अग्निहोत्रस्थाल्यां पूर्वं दिग्धदोहनेनोत्तरां। पृथग्गुभाभ्यां उन्नेदुस्थात्। ननु पूर्ववत्तत्समुचि
ताभ्यां अधिश्रितपूर्वमानयनमुत्तरमानयते पूर्वं दुग्धमग्निहोत्रस्थाल्यीगतं। पूर्वमधिश्रित्य तस्मिंन्नपरं दुग्धमानयति। यस्य रुद्रः पशू
छमायेत्तेनैवावृता द्वयोः पयसा सायंप्रातर्जुहुयात्। तच्चेदतिहन्यात्सजूः स्वाहेति सायंप्रातराज्येन जुहुयात्। रुद्रो ज्वरः। शमायेत
17 शमयेत्। हन्यात्। एतयैवावृता उक्तेन दोहनप्रकारेण तच्चेदतिहन्यात्। सायंप्रातः हुतमतीत्य पुनश्चेद्रुद्रो हन्यात्। ततः सायंप्रातः आज्ये
नह विषाग्निहोत्रं जुहुयात्। सजूरितिमंत्रेण पूर्वाहुतिः। जातवेदसं हविरितिजातवेदाः। प्रजामितिवीहः। गायत्री। सजूर्जातवेदो दिव आ
पृथिव्या अस्य हविषो घृतस्य वीहि स्वाहा। हे जातवेदो जातप्रज्ञाग्नि त्वं दिवः पृथिव्याश्च समंतात् सजूः सामानप्रीतिः एतत् घृतरूपं हविः
वीहि पिव। इदं हविः स्वाहुतमस्तु। अनारमस्यग्ने स्वाहेति द्वादशाहमाज्येन हुतात्तत ऊर्ध्वेन सूक्षेत्। पुनरप्य विरमतिरुद्रे द्वादशाहमने
न स्रुवेणाज्येनैव जुहुयात्ततः परमप्यनुपरमेन सूक्षेत्। नाद्रियेत कर्म। तावतैव कृतेन स्वयंमारंस्यति न वदारंस्यति। प्रवलाहष्टप्रयुक्त
तात्। नैताहशेन कर्मणासौ शक्यमनाइत्यालोच्य तदनुगुणमारंभेतेइतिभावः। न च कर्मानर्थक्यं भवांतरे पिफलदानोपपत्तेः यजुः। राम १०
अग्नेदुशीर्तनोत्तेजुषस्व स्वाहेति। हे दुशीर्तनतनो दुसहशीर्णतनो अग्ने इदं आज्यं जुषस्व स्वाहा। पयसा पशुकास्य जुहुयात्। दध्नेद्रियका
मस्य यवाग्वा ग्रामकामस्यौदनेनांन्नाद्यकामस्य तंडुलैरोजस्कामस्य वलकामस्य त्येकेमांसेन यशस्कामस्य सोमेन ब्रह्मवर्चसका

मस्याज्येनतेजस्कामस्यपयसोन्नियस्यैवामन्तिकामेफलवत्तं अन्येसर्वेगुणकामाइतिशेषः। इन्द्रियंप्रजाहेतुग्रामः प्रसिद्धः। अन्नाद्यं अन्नाद
नशक्तिः। ओजः पराभिभवसहनशक्तिः। बलमभिभवनशक्तिः। यशः कीर्तिः। ब्रह्मवर्चसंत्रैसंपन्न्। तेजः कान्तिः। प्रतिषेकंयवाग्वांश्रपयति। यवा
ग्वांश्रपयतितूष्णीमुदकेनप्रतिषिच्यश्रपयति। एतांयजुषाप्रतिषिंचतीत्यर्थः। ततः श्रुतांसतींपुनर्यजुषाहरस्तेमाविनैषमित्यनेनप्रतिषिं
चतीत्यर्थः। एवंमांसंव्यक्तं। आज्यंप्रतिषिंचति। हरस्तेमाविनैषमितिहृद्दर्भाग्रेप्रत्यस्यत्येकंवा। आज्यंनप्रतितत्स्थानेतुदर्भाग्रंप्रत्यस्यति।
मंत्राः प्रतिषेकेव्याख्याताः। नदध्यधिश्रयतिशृतंहितन्नप्रतिषिंचति। प्रतिषिक्तंहितद्दातंचनेनेतिविज्ञायते। व्यक्तं। एवंतंडुलानोदनंसो
मंच। एवंश्रयतिषंनप्रतिषिंचतीत्यर्थः। दध्यादिषुश्रपणप्रतिषेधादेवाप्रतिषेकसिद्धेः पुनः स्तत्प्रतिषेधादतोन्येषां। श्रपणसहमुवां
ज्वलतावेक्षणादीनामनिवृत्तिः। तथाचदध्यादिप्रकृत्यभारद्वाजादयः। यदन्याधिश्रपणत्प्रतिषेचनादिसर्वंतत्क्रियतइति। आज्येनतंडुले
रोदनेनसोमेनवाजुहुयात्। यस्याप्रतिषेक्यंस्यात् यस्यतेजस्कामादेरप्रतिषेकउक्तः। सएतेषांप्रतिषेक्याणामन्यतमेनजुहुयात्। नतुप
यवाग्वादिनाप्रतिषेक्येणतत्रपशुग्रामादिगुणकामाभवंति। आज्येनतेजस्कामस्यसंवत्सरंजुहुयाद्द्वादशाहंवा। फलंवैषम्यंतुकालयोः।
कर्मवैषम्यादनुसंधातव्यं। नराजन्यस्यजुहुयात्। राजस्याग्निहोत्रनिषेधेपिगतश्रीत्वादाहवनीयोनित्योधार्यते। होमकालेगृहेभ्योब्राह्मणा
यान्नंप्रहिणुयात्तेनोहैवास्यहुतंभवति। गृहेभ्यइत्यनेनपाक्यतामस्येवद्दर्शयति। होमकालेगृहेभ्योपकृष्यान्नंब्राह्मणायप्रहिणुयादिति

दिशेत्। उमेतिनिपातसमुदायः। प्रसिद्धोतेनैवास्य हुतं भवति। सहोमप्रत्याम्नायइत्यर्थः। नित्यमग्न्युपस्थानंवाचयितव्यः। अग्न्युपस्थानंतु
मंत्रमध्वर्युणानित्यंकालेवाचयतव्यः। योवासोमयाजीसत्यवादीतस्यजुहुयात्। यएवमुभयगुणोराजन्यः सस्यजुहुयाद्वा। अथाग्निहो
त्रकर्तृविकल्पानाह। अहरहर्यजमानः स्वयमग्निहोत्रंजुहुयात्सर्वत्रिवा। अहन्यहर्यजमानःनित्यंयजमानः स्वयंजुहुयात्। पर्वणिवास्व
18 यमेवजुहुयात् अथापर्वणितुवक्ष्यमाणेब्रह्मचार्यादिरित्यर्थः। तथाचाश्वलायनः। स्वयंपर्वणिजुहुयात्। ऋत्विजामेकइतरंवाकालमिति।
पर्वणिस्वयंजुहुयात्। अपर्वण्यनियमइत्यर्थः। तथाचकात्यायनः। स्वयंवाजुहुयादुपवसथेनियमइति। ब्रह्मचारीवाजुहुयात्। ब्रह्मणा
हिसपरिक्रीतोभवतिक्षीरहोताजुहुयाद्येनसपरिक्रीतोभवतीतिवह्वृचब्राह्मणं। ब्रह्मचार्यत्रांतेवासीगृह्यते। ब्रह्मणाहिसपरिक्रीत
इतिलिंगात्। बौधायनस्त्वाह। पुत्रोंतेवासीवेदीयोस्याग्न्याधेयएवर्त्विक्तेनपरिगृहीतोसक्षीरहोताधनेनहिसपरिक्रीतइतिलिंगात्। हा
रीतस्त्वाह। योस्याग्नीनाधत्तेसक्षीरहोतेति। द्वयमप्येतदुक्तमाश्वलायनेन। अथर्त्विजामेकइतरंकालमंतेवासीवेतितयोरन्यत राम
रोजुहुयादपर्वण्यपीत्यपरं। अविशेषाच्छास्त्रांतरविधित्वाच्च। तत्रप्रथमोवाशब्दोवैचित्र्यार्थः। यजमानेनसहविकल्पार्थोवा। अत्रप्रयो १८
गः। उक्तोद्देशांतरमपरेणगार्हपत्यंस्थालीगतात्क्षेपादग्नेगृहपतेइत्येकामंत्राहुत्याद्वेतिस्त्रः श्रुतस्तोवागार्हपत्येस्रुवाहुतीर्जुहोति। यद्वा।
अग्नेगृहपतयइतिपूर्ववज्जुहुयात्। समुच्चयेद्वेवेदग्नेगृहपतइतिप्रथमामग्नयेगृहपतयइतिद्वितीयांतिस्त्रश्चेदग्नेगृहपतइतिद्वे। अ

ग्नयेगृहपतयइतितृतीयां।यद्वाग्नयेगृहपतयेइत्याद्यामग्नयेगृहपतयइतिइतरे च।तस्यश्रेहग्नेगृहपतयइतिद्वेअग्नेइतिद्वेअग्नेइतिद्वेयदिवा
ग्नेगृहपतइतिप्रथमतृतीये अग्नयइति द्वितीयचतुर्थेपूर्ववज्जुहुयाज्जयजमानोग्नयेगृहपतयेपरिषद्यायेदं।ममइतिप्रथममंत्राहुतौ
।अग्नयेगृहपतयेरयिपतयेपुष्टिपतयेकामायांन्नाद्यायेदंनममेतिद्वितीयमंत्राहुतौ।वदेत्।अथापरेणदक्षिणाग्निस्थालीशेषाद्ग्ने
र्दोम्येत्येकांद्वेतिस्त्रः अनतसोवा।सर्वत्रान्नपतयइति द्वितीयामितिदक्षिणाग्नौपूर्ववत्स्रुवाहुतीजुहुयात्।अथयजमानोग्नयेदान्नाय
परिषद्यायेदंनममेतिप्रथममंत्राहुतौ अंन्नपतयेग्नयइदंन्नममेतिद्वितीयाहुतौवदेदिति।यदिवाप्राकूप्राशनादुक्तप्रकारेणगार्हपत्य
दक्षिणाग्निहोमः।सर्वमन्यप्रथापूर्वमिति।अपिवानपराग्न्योर्होमः।सहमन्यघथापूर्वमिति।अथदीदिहिदीदिदासिदीदायेतिसर्वा
नग्नीनिंधनैरुपसमिध्य।यद्वादीदिहीतिपंचभिगार्हपत्याद्याहवनीयादीन्वापंचाग्नीनुउपसमिध्यपुरस्तादलंकाराभावेउभयतो।
लंकारपक्षेपरिसमूहनेनाग्नीनलंकुर्वंस्यंतवेद्यायोन्निनीयपूर्ववदग्नीनंतरेणधारांपरिषिच्यापिप्रेरितिसादनबर्हिषकंतृणंस्थाल्यामं
त्काहवनीयेनुप्रहरेत्।ततास्थालींप्रक्षाल्याक्षितमिरंन्नयदेशेनिनयस्यंतर्वेदिवा।यजमानोवृष्टिरसुक्षुअद्देत्यपोभक्षयितांन्तर्वेदि।
हस्तंप्रसार्यअंन्नादइत्यपआसिच्य।योहेतिशिरस्यपआनयतइति।अथकाम्यानेमितिकाश्रगुणविकाराः।ततःद्वयोःपयसाहोमः।
पशुकामस्यद्वयोःपयसाहोष्यामिपशूनवाप्रजानीतिसंकल्प्यः।अग्निहोत्रस्थाल्यापूर्वांगोदोग्धिदोहनेनोत्तरां।याजमानस्यावृत्तिः।

स्थालीगतमधिश्रित्य तत्रपयो दोहनस्यास्थमानयति। सर्वमन्यद्यथापूर्वमिति। ज्वरश्चेत्पशून्हन्यात्। तदाकामसंकल्पं विनापशुकामस्य
द्वयोः। पयसा सायंप्रातर्जुहुयात्। यदि तावताप्यशांतो ज्वरः पुनर्हन्यात्तदा सायंप्रातराज्येन होमः। लेपभक्षानप्रतिषिंचेत्। हरस्तेमा विनै
षमिति द्विदर्भाग्रेएकंवा प्रत्यस्यति। सजूर्जातवेदा इति प्रथमाहुतीः। जातवेदसइदंनमम। जातवेदसंहविर्जातवेदाः। प्रजामितिद्वोहः। स
र्वममन्यद्यथापूर्वमिति। यदि तावताप्यशांतः पुनर्हन्यात्तदापूर्ववद्दादशाहं सायंप्रातराज्येन जुहुयात्। ततः परंचेद्धन्यात्तदास्वयमेवा
रंस्यत्कपेक्षेततदर्थनान्यत्कुर्यादिति। अथपशुकामस्यपयसाग्निहोत्रं होष्यामिपशूनवाप्नवानीतिसंकल्पः। सर्वमन्यं नित्यहोमवदि
ति। अथेंद्रियकामस्यदध्नाग्निहोत्रंहोष्यामिवीर्यमवाप्नवानीतिसंकल्पः। दध्नाहोमे लेपभक्षानाधिश्रपणप्रतिषेकौ। ज्वलतावेक्षणा
दिसर्वमन्यद्यथापूर्वं। अथग्रामकामस्ययवाग्वाग्निहोत्रंहोष्यामिग्राममवाप्नवानीतिसंकल्पः। यवाग्वाहोमलेपभक्षाः। तूष्णीमुदकेनप्र
तिषिच्ययवागूंपचेत्। श्रितांहरस्तेमाविनैषमितिप्रतिषिंचेत्। सर्वमन्यद्यथापूर्वं। अथान्नाद्यकामस्यौदनेनाग्निहोत्रंहोष्यामीति।
अन्नाद्यमवाप्नवानीतिसंकल्पः। ओदनेनहोमलेपभक्षाः। जुहूपार्श्वतोपादानं। सर्वमन्यद्यथाग्निहोत्रवत्। अथौजस्कामस्यबलकामस्य राम
वतंडुलैरग्निहोत्रंहोष्यामिओजोवाप्नवानिबलमवाप्नवानीतिवासंकल्पः। तंडुलैर्होमे लेपभक्षाः। सर्वमन्यदोदनहोमवत्। अथयशस्का १९
मस्यमांसेनाग्निहोत्रंहोष्यामियशोवाप्नवानिमांसेनहोमलेपभक्षाः। पार्श्वतोपादानं सर्वमन्यद्यवागूहोमवत्। अथब्रह्मवर्चसकामस्य

सोमेनाग्निहोत्रं होष्यामि। ब्रह्मवर्चसमवाप्नवानीति। सोमेन होमः शेषभक्षाः सर्वमन्यद्दधिहोमवत्। अथ तेजस्कामस्याज्येनाग्निहोत्रं हो-
ष्यामि तेजो वाप्नवानि। आज्येन होमः शेषभक्षाः न प्रतिषेकः। हरस्तेमा विनैष मिति द्विर्दर्भाग्रे एवं वा प्रत्यस्यति। सर्वमन्यं नित्यहोमवत्। एवं
संवत्सरं द्वादशाहं वा जुहुयात्। अथ तेजस्कामादेरप्रतिषेक्यहोमः। अप्रतिषेक्यं होष्यामि तेजो वाप्नवानीति ब्रह्मवर्चसमवाप्नवानीति वा।
पाप्मानं हन्यामीति वा सर्वान्नु कामानवाप्नवानीति वा वीरमाजनयानीति वा संकल्प्यः। आज्यं तंडुलौदनसोमानामन्यतमेन होमः शेषभक्षा-
ः सर्वमन्यत्तत्तद्द्रव्यहोमवत्। राजन्यस्य नित्यं धृताग्नेः नाग्निहोत्रहोमेकाले गृहपक्वमन्नं ब्राह्मणाय प्रयच्छेत् काले काले ग्न्युपस्थानमध्व-
र्युणा वाचितो वदेत्। यद्वा सोमयाजिनः सत्यवादिनो राजन्यस्य जुहुयाद्वाग्निहोत्रमध्वर्युरिति॥ ॥इत्थं राजाग्निहोत्रांतमेवं तंत्र सुगंधि-
भिः सूक्तिप्रसूनैः पुष्णातु पुमर्थानूपुरुषोत्तमः॥ ॥इत्यापस्तंबीयाध्वरतंत्रे स्वतंत्रव्याख्यायां प्रयोगरत्नमालायां षष्ठप्रश्ने चतुर्थः पट-
लः॥ ॥अग्न्युपस्थानानि व्याख्यास्यामः। अधिकारप्रदर्शनं सुखग्रहणार्थं। अग्न्युपस्थानवदत्र समिद्ध इत्यादौ विशिष्टकर्मसंप्रत्ययार्थं
च। उपतिष्ठत इति चोद्यमानमाहवनीयमेवोपतिष्ठेत वचनादन्य। अस्मिन्नधिकारे अविशेषितायामुपस्थानचोदनायामाहवनीयमे-
वोपतिष्ठेत वचनात्वन्यं गार्हपत्यमित्यादि। उत्तरामाहुतिमुपोत्थाय कृत्वा तिर्यङ्ङ्वोपतिष्ठेत। उत्तरामाहुतिं हुत्वा प्रत्याहवनीयसमीप।
उत्थायेत्यर्थः। कृत्वा तिर्यङ् ईषत्तिर्यङ् प्राङ्मुखः संनग्निं प्रत्यभि। ईषदभिमुखस्तिष्ठेतियावत्। अत्रोपोत्थानवचनादन्यत्रासीनस्योपस्था।

नविधावासीनएवोपतिष्ठते। उपप्रयंतो अध्वरमितिषड्भिः। आहवनीयमुपतिष्ठत इति शेषः। अग्निर्गायत्र्यः। उपप्रयंतो अध्वरंमंत्रंवोचेमाग्न
ये। आरे अस्मे च शृण्वते। अध्वरंयज्ञमुपप्रयंतोप्राप्नुवंतो वयं अग्नये तोषार्थं उपस्थानंमंत्रं वोचेम वक्तारो भूयास्म। कीदृशायाग्नये आरेप्य
स्मेनुग्रहे तास्मदीयं वचः शृण्वते। अस्मप्रत्नामनुद्युतं शुक्रं दुदुह्रे अह्रयः। पयः सहस्रसामृषिं। अस्याग्नेप्रत्नांपुराद्युतिमनुकूल्यदीप्तिंसो
20 स्थानीयमह्रयो लज्जां कुर्वंतस्त्विजः। पयः क्षीरादिस्थानीयं सहस्रसां बहुधनप्रदं ऋषिमंतं। द्विपग्नामज्ञानप्रदं शुक्रं ज्योतिर्दुदुह्रे दुहंति। अ
ग्निर्मूर्द्धेति पूर्णमासयोर्व्याख्याताः। जगती। अयमिह प्रथमो धायिधातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः। यमप्नवानो भृगवो विरुरुचुर्व
नेषु चित्रं विभ्वं विशे विशे। अथमग्निरिह कर्मणि प्रथमः प्रधानभूतो धातृभिर्धारणाय प्रयतमानैरस्माभिर्धायि धार्यते। कीदृशोग्निः॥
होता। देवानामाहूता यजिष्ठो मनुष्येभ्योतिशयेन यष्टा। अध्वरेषु यज्ञेष्वीड्यः स्तोतव्यः। किंच आप्नवानसंज्ञका भृगुसंज्ञका ऋमुनयो वनेषुअ्र
प्रमेषु विशे विशे जनतस्प्रजानामुदयार्थं यमग्निं चित्रं बहुधा गाथात्वेन विचित्रं विभुं व्याप्तं विरुरुचुः विशेषेण दीप्तिमंतः। त्रिष्टुप्। उभा वामिंद्राग्नी। हु राम
वेवां। हे इंद्राग्नी युवां उभा हि मुख्येन होम मिच्छामि। पुनरपि युवां मुभौ सहराधसौ श्रीनेन मादयितुमिच्छामि। यस्माद्युवामन्नानां धनानां २०
वदातारौ तस्मादन्नस्य लाभाय युवामाह्वयामि। अयंतेयोनिरिति आधाने व्याख्याताः। अग्नीषोमाविमं सुमइति सप्तम्यापूर्वपक्षे द्राग्न्या
सप्तम्यापरपक्षे। तीद्राग्न्या उभावामिंद्राग्नी त्यनयाद्रीप्रकरणात्। तयोभावामिंद्राग्नी इत्येनयाद्राग्नी त्येवमत्यापाठः। तम्ूर्वा सुषदू स्म

पश्चितासेव पुनरावर्तनीया। विश्वेदेवाः अनुष्टुप्। अग्नीषोमाविमसुमेश्रृ॰ णेमयः। हे अग्नीषोमौ वृषणा इयं वर्षंतौ युवां मदीयमिमं हवमाह्वा
नं शृणुतं। मदीयानि सूक्तानि प्रति – – – प्रतिशृणुतं। दाशुषे यजमानाय सुखं भवति तं भावयतं। ऐंद्राग्न्यं त्रैव व्याख्याता। दधिक्राव्णो
अकारिषमित्यत्र जाष्टम्यां। उभयत्र उभयोः पक्षयोः दधिक्राव्ण इति दर्शपूर्णमासयोर्व्याख्याताः। ममाग्ने वर्चो विहवेष्वस्त्विति चत
स्रः पुरस्तादग्नीषोमीयाद्याः पूर्वपक्षे तथैंद्राग्न्या अपरपक्षे। सप्तम्याः पुरस्ताच्च तस्र एताः उपस्थानास्तु रिक्तार्थः। जपार्था नोपस्था
नार्था इति केचित्। तदयुक्तं। उपस्थानाधिकारात्। प्रातरवने केचन ममाग्ने वर्चो विहवेष्वस्त्विति चतस्रः। अग्नीषोमाविमं सुमे सं षेत्य
त्र उपस्थानार्थतायाः व्यक्तत्वात्। ममाग्ने वर्चो विहवेष्वस्त्विति चतस्रो जपितेति कचिद्विशेषप्रदर्शनात्। त्र्य। तथा चतसृभिरुपतिष्ठते।
सेवसत्याषाढभरद्वाजौ। तत्रा दितः षड्भ्यो नंतरमेता श्च तस्र उत्क्रांततो ग्नीषोमीयैंद्राग्नीपक्षवशादेकादश्यो नियम्यंते। ततो दधिक्रा
व्ण इति द्वादशी। ननु नैवमनुक्तिः पर्यनुयोज्या विचित्रत्वात् सूत्रकृतो याः मंत्राः व्याख्याताः। अग्न आयूंषि पवस इति षड्भिः संव
त्सरे सदा वा। प्रतिसंवत्सरं सकृत् सकृद्देता भिराहवनीयमुपतिष्ठते। अहरहर्वा। मंत्राः दर्शपूर्णमासयोर्व्याख्याताः। पवमानहवी षि
वा संवत्सरे निर्वपेद्देवा सोः स्थाने। अथवा नैता भिरुपतिष्ठते किंतु प्रत्याम्नायत्वेन संवत्सरे पवमानहवीषि समानतंत्राणि निर्वपेत्।
उक्तं पवमानहविषां प्रयोग आधाने। आयुर्दा अग्न इति सिद्धमा चित्रावसोः। चित्रावसु शब्दे न तदादिमंत्रो लक्ष्यते। आयुर्दा इत्यादि

चित्रावसोस्वस्ति तेपारमशीयेत्यंतो मंत्रात्पूर्वं मंत्रचतुष्टयं सिद्धमुपस्थानेन तत्रक्रमविशेष इत्यर्थः। अग्निर्यजूंषि। आयुर्दा अग्नेस्यायुर्मे दे
हि। वर्चोदा अग्नेसि वर्चो मे देधेहि। तनूपा अग्नेसि तन्वं मे पाहि। अग्ने यन्मे तनुवा ऊनं तन्म आपृण। हे अग्ने आयुष्प्रदस्त्वं मह्यमा
युर्धेहि। एवं वर्चोदास्त्वं मह्यं वर्चो धेहि। शरीरपालकस्त्वं मम शरीरं पालय। तदा मदीयायास्तन्वाः यद्वैकल्यं तत्पूरय। त्रिः चित्रावसुनास्याय
२१ मुपतिष्ठते त्रिरर्वाग्वसुना प्रातः। वी। मशीयइति करणीं तेद्रष्टव्यः। अर्वाग्वसुना प्रातरिति। अर्वाग्वसुवचनेन चप्रसंगात्प्रातरवनेकार्थे
नत्वस्मिन्नेवोपस्थाने। प्रातर्विशेषप्रदर्शनार्थं सायंकाल एवास्य नियोक्ष्यमाणत्वात्। तथा र्वाग्वसोः स्वस्ति तेपारमशीयेति प्रातः।
प्रातरवनेकु इति भरद्वाजः। चित्रावसोः स्वस्ति तेपारमशीय चित्रं नक्षत्रादिरूपमस्यां वसतीति चित्रावसूरात्रिः। तथाविधे रात्रे हं स्वस्ति
सुखेन तव पारं प्रभातं अशीय प्राप्नवानि। सौत्रं यजुः। अर्वाग्वसोः स्वस्ति तेपारमशीय। अर्वाग् अर्वाचीनं प्राणिजातं स्वस्वव्यवहारार्थं
वसत्यस्मिन्निति। अर्वाग्वसुर्दिवसः। हे तथाविधा दिवस सुखेन ते पारं प्रदोषं इंधानास्त्वा शतं हिमा इत्युपस्थायाग्नेः समिदसि स्याभि
शस्त्या मा पाहीति च तस्याः समिध एकैकस्मिन्नाधाय सत्वं मग्ने व्रताइत्यनुवाकशेषेणोपस्थाय वयं सोम॰ अशीमहीति मुखं वि राम
मृष्ट। इंधानास्त्वेत्यनया सप्तपदैर्वा प्रथममाहवनीयमुपस्थाय पुनरनयोः परैस्त्रिभिर्यजुर्भिः रेकैकत्राग्नौ च तस्याः श्वतस्याः समिध २१
अग्निः शाक्वरी। इंधानास्त्वा शतं हि॰ अदाभ्यं। अग्ने स॰ नाके। हे अग्ने त्वां समिद्धिरिंधाना वयं शतसंख्यान् हेमंतोपलक्षितान् संव

त्सरानूद्युमंतोदीप्तिमंतः समिधीमहि। लोके सम्यक् प्रख्याता भूयासं। कीदृशं तां वयस्कृतमं अन्नस्य कर्तारं यशस्कृतं कीर्तिप्रदं अदाभ्यं केनाप्य।
तिरस्कार्यं। वर्षिष्ठ धिनाके अतिप्रौढः स्वर्गविषये सपत्नदंभनं विरोधिनाशनं कीदृशा वयं वयस्वंतो अन्नवंतः यशस्वंतः कीर्तिमंतः सुवीरा
सः शोभनपुत्रादियुक्ताः। सौत्रामणीयजूंषि। अग्नेः समिदस्य भिशस्त्या मा पाहि। तं अग्नेः समिंधनार्थी असि। अभिशस्त्याः परप्रयु
क्ताभियोगसकाशान्मां पाहि। अग्निर्जगती। सं त्वमग्ने सूर्यस्य वर्चसागथा इत्यनुवाकशेषेण। समृषीणां स्तुतेन संप्रियेणधाम्ना
। त्वमग्ने सूर्यवर्चा असि सं मामायुषा वर्चसा प्रजया सृजहि अग्ने त्वं सूर्यस्य वर्चसा समगथाः संगतोसि। ऋषीणां स्तोत्रेण संगतोसि प्रि
येण स्थानेनाहवनीयलक्षणेन संगतोसि। हे अग्ने त्वं सूर्यसमानतेजा असि मामायुरादिभिः संयोजय। अग्नीः गायत्रीः। वयं सोम
व्रते तव मनस्तनूषु बिभ्रतः प्रजावंतो अशीमहि। हे सोम तव व्रते त्वदर्थ नियमे विषये तनुषु मनो धारयंतः। वयं प्रजावंतः संतः सुखं प्राप्न
वामः। संपश्यामि प्रजा अहमिति गृहान् प्रसीतीक्षते। गृह एव गृहाः। अग्निर्गायत्री। संपश्यामि प्रजा अहमिडप्रजसो मानवीः। सर्वा भवं
तु नो गृहे। अहं मनुष्यः प्रजा दूरप्रजसश्च सम्यक् पश्यामि। इडा धेनूस्तस्याः प्रजाः सः मनुष्यरूपाः पशुरूपाश्च सर्वाः प्रजा अस्माकं गृहे ति
ष्ठंतु। अंभस्थांभो वो भक्षीयेति गोष्ठमुपतिष्ठते। गोसमूहो गोष्ठं न तु गोस्थानं। अंभो वो भक्षिषीयेति लिंगात्। अग्निर्यजूंषि। अंभस्थांभो वो भ
क्षीय महस्थ महो वो भक्षीय सहस्थ सहो वो भक्षीयोर्जस्थोर्जं वो भक्षीय। अंभः पीतोदकसारं भः पूज्यं सर्वैराहरणीयं सहो बलकरं ऊर्जं स्वादु

तमंरसरूपंयक्षीराद्दित्तकारणत्वेनहेपशवः स्तद्रूपास्थ अतोयुष्मदीयंतनूक्षीरादिकमस्माकंभक्ष्यमस्तु। रेवतीरमध्वमित्यंतराग्नीत्रिष्ठंजपति॥
व्यक्तं। रेवतीरमध्वमस्मिंल्लोके। स्मिंनूगोष्ठेस्मिन्नूक्षयेस्मिन्नूयोनाविहैवस्ततोमापगातनवह्वीर्मेभूयास्त। रेवतीपशवोस्मिंभूलोकेगोष्ठगृहविशे
षयोनौस्थानविशेषेरमध्वंक्रीडध्वं। इहैवयोनौस्तसर्वदातिष्ठत। इहस्थानात्मापगातमागच्छत। मेमदर्थंअपसर्पपरंपरयावह्व्योभूया
स्त। सꣳहितासिविश्वरूपीरितिवत्समभिमृशति। वत्संयंकंचिदभिमृशति। अविशेषात्। अग्निहोत्रियाएववत्समितिबौधायनः। सꣳ
हितासिविश्वरूपीरा० अयंतां। हेवत्सत्वंसंहितोसिमात्रासंयुक्तोसिविश्वरूपीः। आदरेणस्तनंपातुंवामतोदक्षिणतश्चपुनःपुनर्वाव
तःबहुरूपवद्वभाससे। तादृशस्त्वंऊर्जक्षीरादिरसनिमित्तेनमामाविश। मत्समीपमागच्छ। गोपत्येनमदीयंबहुपशुस्वामित्वीकृत्य।
रायस्पोषेणधनपुष्टिनिमित्तेनापिमामाविश। सहस्रसंख्यायः पुष्टिर्यथाभवतितथायुष्मानुपुष्यासं। मयियुष्मदीयानिक्षीरवना
निश्रयंतां। सꣳहितासिविश्वरूपेतिवत्सं। तेनैववत्समप्यभिमृशति। विश्वरूपेतितुविकारः मंत्रार्थः पूर्ववत्। भुवनमसिसहस्रपोषंपु
षेमेतिवावत्सं। वत्समितिवचनाद्वत्सायामयंमंत्रः। सोत्रंयजुः। भुवनमसिसहस्रपोषंपुषेम। हेसहस्रसंख्यायाः पशुपोषस्यपोषक राम
वत्सत्वंत्यामत्वेनभुवनमसि। उपत्वाग्नेदिवेदिवइतितिसृभिर्गायत्रीभिः गार्हपत्यमुपतिष्ठतेग्नेत्वंनोअंतमइतिचतसृभिश्चद्विपदा २२
भिरितिचग्राह्मणानुकरणार्थंतद्व्याख्यार्थंवा। अग्निर्गायत्र्यः। उपत्वाग्नेदिवेदिवे० एमसि। हेअग्नेप्रतिदिनंवयंदोषावस्तः सायंप्रात

तैश्च धियानमो भरंतो नमस्कारं प्रापादयंतः त्वामुपैमसि। उपगच्छामः। राजंतमध्वराणां गोपामृतस्य दीदिविं। वर्धमानं स्वेदमे। कीदृशं त्वां अ-
ध्वराणां राजंतं यज्ञ राजं गोपां गवां पालकं। ऋतस्य दीदिविं। सत्येन द्योतमानं। स्वे दमे स्वकीये अग्निहोत्र गृहे हविर्भिर्वर्धमानं। स नः पितेव
सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये। हे अग्ने स त्वं पिता पुत्रार्थमिव नोस्मदर्थे सूपायनः सुखेन प्राप्तुं शक्यो भव। अस्माकं स्वस्तये
क्षेमाय सचस्व समवेतो भव। द्विपदा विराजः। अग्ने त्वं नो अंतमः। उत त्राता शिवो भव वरूथ्यः। हे अग्ने त्वं नोस्माकं अंतमो भव। उत अपि च
वरूथ्यः वरूथे गृहे नित्यं सन्निहितो गृहरक्षकः। शिवं शिवः सुखप्रदश्च भव। तं त्वा शोचिष्ठ० वः। सुम्नाय नू० भ्यः। हे शोचिष्ठ दीदिवः॥
शुद्धतम दीप्यमानाग्ने सखिभ्यः सखीनामस्माकं सुम्नाय सुखाय नं पूर्वोक्तगुणं त्वामीमहि। प्राप्नुमः। वसुरग्निर्वसुश्रवाः। अच्छा नक्षि
द्युमत्तमो रयिं दाः। वसुर्वसुमानग्निः वसुरुद्रादिदेवैरादरेण श्रूयत इति वसुश्रवाः। हे तादृशाग्ने अच्छ अस्मदाभिमुख्येन नक्षि प्राप्नु-
हि। द्युमत्तमो अतिशयेन दीप्यमानो रयिं दाः। धनं देहि। स नो बोधि० समस्मात्। इत्येषा चतुर्थी भवति। द्विपदेति शेषः। वामदेवो द्विपदाः।
स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात्। ऊर्जीवः पश्यपतेति गृहान् प्रेक्षते पशून्वा। यं कं। ऊर्जीव इति यजुः। इडास्थेत्यनु-
ष्टुप्। ऊर्जा वः पश्याम्यू० मा पश्यत। हे गृहाः पशवो वा ऊर्जा अन्नेन क्षीरादिना वा निमित्तेन धनपुष्टिनिमित्तेन च युष्मानहं पश्यामि। यूय-
मपि तथा मा पश्यत। इडा स्थ मधुकृत स्योना० दः। सहस्र० प्यासंमपि वो रायः श्रयंतां। हे इडा अन्नवंतो गृहाः गावो वा यूयं मधुकृता मधु-

रवस्तुसंपादनंसमर्थास्तस्योनासुखकराइडाअंन्नयुक्तामदोमदहेतवोमाविशन्त।सहस्रसंख्यधापुष्टिर्यथाभवतितथायुष्मान्पु।
ष्यासं।युष्माकंधनानिक्षीरादीनिमयिश्रयंतां।महहित्रीणां॰वार्याणीतिप्राजापत्येनतृचेनोपतिष्ठते।आहवनीयमितिशेषः।
प्रजापतिर्गायत्र्यः।महित्रीणामवोअस्तुद्युक्षंमित्रस्यार्यम्णः।दुराधर्षंवरुणस्य।यंकामयेतस्वस्तिपुनरागच्छेदितिसतंप्रस्थि
तमेतेनतृचेनान्वीक्षेतस्वस्त्येवपुनरागच्छेति।सर्वदावायंकल्पोनयजमानस्यैवेत्यर्थः।उक्तार्थाःमंत्राः।मानःशम्भुषे।तत्सवि
तुर्वरेण्यंसोमानंस्वरणंमित्रस्यचर्षणीधृतप्रससमित्रकद्वावनस्तरीरसिकदावनप्रयुक्तत्सिपरित्वाग्नेपुरंवयमित्यपस्थायआ
हवनीयमितिशेषः।वामदेवोगायत्र्यः।मानःशंसोअररुषोधूर्तिःप्रणङ्मर्त्यस्यरक्षाणोब्रह्मणस्पते।शंसोवोदिताःअररु
षोभ्रातृव्यःमर्त्यस्यमर्त्यशरीरधारिणोधूर्तिःहिंसावनोस्मान्माप्रणक्।माप्राप्नोतु।ब्रह्मणःपरिवृढस्यकर्मणःपतेस्वामिन्नं
ग्नेनोस्मान्रक्ष।योरेवान्योअमीवहासवसुवित्पुष्टिवर्धनः।सनःसिषक्तुयस्तुरः।योग्नेरेवान्धनवान्।अमीवहादोषापहंताव
सुवित्।वसुनाऽलंभवितापुष्टिंवर्धयितातुरःत्वरवान्नूवर्तते।सोयंत्वोस्मान्सिषक्तुइष्टेनसंयोजयतु।परितेदूडभोरथोस्मान् राम
अश्नोतुविश्वतःयेनरक्षसिदाशुषे।हेअग्नेतेतवदीयोदूडभोमारवाहनसमर्थोरथोस्मान्सर्वतःपरिव्याप्नोतु।येनरथेनत्वंदाशु २२
षेयजमानायरक्षसि।तत्सवितुरितिगायत्रीकल्पेव्याख्याता।सोमानंस्वरणं॰शिजं।ब्रह्मणःपरिवृढेषुअस्यकर्मणःपतेस्वामिं

न्नग्नयः त्वं औशिजं उशिजकः पिपुत्रकक्षीवंतंकः पिंकर्मप्रवर्तकंकृतवानसि स त्वं मा सोमानं सोमयागानां स्वरणं उद्देष्टारं कुरु। विश्वेदेवाः।
मित्रस्य चर्ष० सस्वं चि० मं। चर्षणीधृ तो मनुष्याणां धारयितुः मित्रस्य देवस्य श्रवः कीर्तयः रूपं सानसिं छलदानशीलं सत्यम वितथं।
चित्रश्रवस्तमं चित्रं श्रवः कीर्तिर्यस्यासौ चित्रश्रवाः। अतिशयेन तादृशमग्निमुपतिष्ठतइति शेषः। प्रसमित्रे लक्ष त्सगेष्टीव्याख्याताः।
अग्निर्वृहती। कदाचनस्तरीरसि० च्यते। हेइंद्र परमैश्वर्ययुक्ताग्ने कदाचन स्तरी हिंसको न असि किंच दाशुषे हविर्दत्तवते यजमाना।
यउपोपेन्नु अत्यंतं समीप एव सश्चसि। समवेतोसि। हे मघवन्निंद्र सदृशाग्ने भूयइन्नुपुनरपि देवस्य तव दानं पृच्यते। फलदानसमस्मा
भिः संयुज्यते। कदाचनप्रयु० नी। तुरीया० दिवि। हे अग्ने त्वं कदाचिदपि प्र युच्छसि। यागसावधानेप्रयासि प्रस्थितमितिवा। अत्र
उपसर्गो धात्वर्थनिवृत्तिद्योतकः। अप्रमाद एवोच्यते। उभेजन्मनि यजमानस्येहिकामुष्मिके निपासि नियमेन रक्षसि। हे तुरी
य आसं न्नतरआदित्यादिती ट्रभाग्ने ते तव सवनं कर्मइंद्रिय मिंद्रानुकूलं आतस्थ आस्थितं। किंचि दिविदेवानां सर्वेनं पौ भम तंम
मन्त्रणं वास्थितं। अग्निरनुष्टुप्। परिवाग्ने पुरं० हि। धृषद्व० वतः हे सहस्य बलप्रभावाग्ने पुरमभिमतानां पूरकं विप्रं ब्राह्मणमि
मानिनं घृषद्वर्णं वेदीधर्षिकारं भंगुरावतो भंजनशीलव्यापारो एतस्यरक्षसो भेत्तारं त्वां वयंप्र तिदिनं परिधीमहि परितोधारया
म। निर्मृदोसि० द्विषमइतिदक्षिणस्य पदः पाष्र्ण्या निमृद्गीयाद्व दिपायीयमास्य पार्जेत प्रभुरसि० द्विषमइतिदक्षिणतः पादो निगृह्णी

याघदि सदृशो नाभिभूर्द्विष्मइति प्रपदेन यदि श्रेयसा। काम्योऽयं प्रयोगः। यदि पापीयसा आत्मनो हीनर्द्धिना स्पर्धेत। नाशी लोयमस्म
तुल्यस्यादि तितदादक्षिणस्यपदः पार्ष्ण्यापश्चिमभागेन विमृद्गीयान्निपीडयेद्भूमिः। यदि सदृशेन स्पर्धेत कथं किंलायं मम तुल्यः।
संवृत इति तदा दक्षिणस्यपदो दक्षिणतः दक्षिणभागेन निगृह्णीयान्निपीडयेत्। यदि श्रेयसा स्वर्द्धिना स्पर्धेत हा धिगयं मदधिकः पापइ
तितदा प्रपदेन पादाग्रेण निगृह्णीयात्। एवं कृते स सत्यहृतो भवतीति भावः। सौत्रामणियजूंषि। निर्भृद्दोसि न्यहं तं मृधासं योस्मां द्वेष्टि यं च
44 वयं द्विष्मः। हे अग्ने निर्मृद्दोसि नितरां मर्दयितासि। यः पापीयानस्मद्द्वेष्टा स्मद्द्वेष्यश्च तमहमृध्यासं नितरां मर्दितवानस्मि। प्रभुरसि प्रभा
हनमभिभूयासं योस्मानित्यादि। हे अग्ने त्वं प्रभूः प्रभविता असि यः सदृशो द्वेष्टा द्वेष्यश्च तमहं भूयासं प्रकर्षेणातिशयितो भूयासं। अभिभू
रस्यभ्यहं तं भूयासं योस्मानित्यादि। हे अग्ने त्वमभिभूः अभिभावनोसि पोधिको द्वेष्टा द्वेष्यश्च तमहमभिभूयासं। अभिभवामि। पू
षामापातिति श्लोकानुपस्थाय प्राची॰ भिदासतीति यथालिंगं दिशा उपस्थाय अग्निमुपसमाधाय धर्मो मा॰ गमेमहि इत्युपस्थाया
ग्न आयूंषि पवस इत्याग्निपावमानीभ्यां गार्हपत्यमुपतिष्ठते। लोकोपस्थानमेकैकस्यैकेन मंत्रेण। एकलिंगत्वाच्चतुर्थीनिकस्वार्थः। राम
सर्वैः सर्वानितिकेचित्। उपसमाधानं काष्ठैरुपसमिंधनं। धर्मो मेत्युपस्थानमाहवनीयस्यैव। अथ प्रकृतत्वात् सर्वाग्नीनामित्यन्ये। २४
सौत्रामणियजूंषि। पूषा मा पशुपाः पातु पूषा माधिपाः पातु पूर्षा माधिपतिः पातु। पूषा पोषयिता देवः पशुपाः पालकाः पधिपाः मा

गैपालकाः अधिपाः अधिकं पालकाः अधिपतिः सर्वलोकपालको मां पालयतु। प्राची दिगग्निर्देवताग्निं स ऋच्छतु यो मैतस्यै दिशोऽभिदा-
सति। दक्षिणा दिगिन्द्रो देवतेन्द्रं स ऋच्छतु यो० ति। प्रतीची दिक् सोमो देवता सोमं स ऋच्छतु यो मैत० ति। ऊर्ध्वा दिक् बृहस्पतिं स दिशां देवं०
ति। इयं दिगदितिर्देवतादितिं स ऋच्छत्वित्यादि। इयं प्राची दिगुपस्थीयते। अस्याः दिशोऽग्निर्देवता। यः शत्रुरस्यां दिशि वर्तमानो मा
मभिदासति हिनस्ति स एतद्दिग्देवतामग्निमेव प्राप्नोतु। तमग्निमेव निवारयत्वित्यर्थः। एवमुत्तरेष्वपि। धर्मो मा धर्मणः पातु वि
धर्मो मा विधर्मणः पात्वायुश्च प्राणश्च चक्षुश्च विचक्षुश्च प्राणा वां चो रुगग उरुगस्य तेना चावयं संभक्तेन गमेमहीति। धर्मो मा धर्मतो
हेतोः पातु पालयतु। विधर्मो विविधधर्मो मां विविधधर्मतो हेतोः पातु। आयुः पुरुषायुषं। प्रायुः स्ततोऽधिकमायुश्च चक्षुर्दर्शनचक्षु
र्विज्ञानं च प्राणा वां च पूर्ववरा देवदेवताः पान्त्वित्यर्थः। हे उरुग उरुगातस्याग्ने तेन ते रुगातस्यस्य वा चोपस्थानेन वयं भक्तेनाश्येन संग
मेमहिं संगताः स्मः। अग्निपावमान्यौ दर्शपूर्णमासयोर्व्याख्याते। अग्ने गृहपत इति। पुत्रस्य नाम गृह्णाति तामाशिषमाशासे तं त
वद्दस्याजतस्य अमुष्या इति जातस्य। व्याख्याता नं याजमाने सहमन्त्रार्थेन। यत्किंचाग्निहोत्री कामयेत तदग्नीन्धा चेतोपैनं नमतीति दे
गाभुंजत इति विज्ञायते। अग्न्युपस्थानं ते यजमानो हि तमर्थमग्नीन्धा चेतसोऽर्थो स्यस्य यमागच्छति। एवमुपस्थानमुक्तं। तस्यानित्य
त्वमपि दर्शयति। ब्राह्मणे तद्दिदानीं दर्शयन्ति। उपस्थेयोऽग्नी नोपस्थेया३ इत्युक्तं। ब्राह्मणेष्वुपस्थेयोऽग्निः स्यान्नोपस्थेय इति वि

चार्येपस्थानं तावन्निहित्वा तस्मान्नोपस्थेय इति निषिध्यते तत उपस्थानपुरःसरमुक्तं तदुपस्थेय इति। तेनैवं विहितप्रसिक्ति षिद्धमुपस्थानं वै
कल्पिकमिति भावः। अथोपस्थानकल्पेपि सायमेवोपस्थानं न प्रातरित्युक्तं ब्राह्मणे तदपि दर्शयति। नक्तमुपतिष्ठते न प्रातः एवं च यथो
क्तमेतदुपस्थानं प्रातःकाले लक्ष्यत इति सिद्धं भवति। अत एवोत्तरस्मिन् कल्पे सायंप्रातरिति वक्ष्यति। सुव्यक्तं चैतत्सूत्रान्तरेषु यथैव
25 मेव सायं सायमुपतिष्ठते प्येवमादि। शाखान्तराभिप्रायेण यजमानान्तरस्यापि प्रातर्निवृत्तिं दर्शयति। न प्रातरग्निरूपचनावरो
हेन्न प्रातराहिताग्निश्च न मन्येते ति वाजसनेयकं च नेति। नियतोप्यर्थे प्रातरग्निमपि नोपगच्छेदाहिताग्निः रस्मिं न्नित्यमपि न म
न्येत च। नेति पूर्ववत्। काकथा याजमाने ष्विस्यर्थः। भूर्भुवः सुवः सुप्रजाः प्र॰ पोषैरित्येवोपतिष्ठते ति वाजसनेयकं। भर्भु॰ व्यगादि
ति च। इमावपि कल्पौ सायंकालिकावेवोत्तरत्र सायंप्रातर्ग्रहणात्। एवकारः सर्वैरेतैरेवोपस्थानं तंत्र निवृत्यर्थः। व्याख्यातयोर्व्या
ख्याताः। सौनेयजुषी। सुप्रजाः प्रजया भूयासं सुवीरो वीरैः सुवर्चा वर्चसा सुपोषः पोषैः। हे अग्ने प्रजयापत्य परयाहं सुप्रजाः शोभनापत्यो
भूयासं। तथा वीरैः पुमपत्यैः सुवीराः वर्चसा तेजसा सुवर्चाः पशुपुत्रादिपोषैः सुपोषश्च भूयासं। भर्भुवः शकेयं सविता मेमा व्यगादिति। राम
हे अग्ने सुष्मानहं परिचरितं शक्तो भूयासं। मदीयास्ति क्षयं बुद्धिं मापगच्छतु। वात्सप्रेणैव सायंप्रातरूपतिष्ठत इत्येको वात्सप्रं दिवस्परीत्य २५
नुवाकः। सूत्रब्राह्मणप्रसिद्धेः। तस्य सायंप्रातर्ग्रहणात्त्स्मात पि प्रातरनेकेन विकल्प्यते। पूर्ववदेवकारार्थः यथा सायमुपस्थानं वात्स

प्रेणतथाप्रातरपितेनैवेत्येवकारार्थइत्यपरं।वत्सप्रेत्रिष्टुप्।दिवस्परिप्र०द्वाः।तृती०ध्याः।अग्निःप्रथमंदिवस्परिद्युलोकस्योपरिजज्ञे।सू
र्येणोत्पन्नः।अस्मत्परिअस्मदीयस्यमनुष्यलोकस्योपरिजातवेदाःद्वितीयंजज्ञे।प्रसिद्धवह्निरूपेणद्वितीयंजन्मप्राप्तवान्।अप्सु
समुद्रःस्तृतीयंजज्ञे।वडवानलरूपेणोत्पन्नः।अजस्रंनिरंतरंजन्मसुनृमणानृषुयजमानेषुमनोनुग्रहबुद्धिःयस्याःनृमणाः।एन
मीदृशमग्निंमिंधानोदीपयंन्स्वाधीःस्वायत्तचित्तःजरतेजीर्यतेजरापर्यंतंपरिचरतीत्यर्थः।विद्मातेअग्ने०जगंथ।हेअग्नेयानि
पूर्वस्मिन्मंत्रेदिवस्परीत्यादिनात्रेधाविश्वरूपाण्युक्तानि।आदित्याग्निवडवानलरूपाणितानित्रयाणित्रिसंख्याकानिवयंविद्मः।
ज्ञातुमर्हः।किंचानेनवपुरुत्रापुरूणुगार्हपत्यादिगार्हपत्यादिप्रदेशेषुविभृतंसंपादितंसमअवस्थानमपिविद्मः।तेतवपरमसुत्कृ
ष्टंगुहागुह्यंविद्मः।विद्मेत्यादिकंयन्नामतदपिविद्मः।यतउत्साहात्वृष्टिरूपात्प्रस्रवणाद्वाजगंथदैद्युतरूपेणत्वमागतोसि।।त्व
मप्सुत्वंविद्मः।समुद्रेत्वानृमणा०।अहिन्वंनृ।हेअग्नेनृमणामनुष्यस्यूलिक्षकमीनसंधानलक्षणमनोयुक्तः।नृचक्षाःनृषुवेद्या
गेषुचष्टेविस्पष्टमंत्राःनृचक्षाः।अहंयजमानःसमुद्रेवडवानलरूपेणअप्स्वंतःवृहदुदकमध्येवैद्युतरूपेणदिविद्युलोकस्यऊधंन्
ऊर्ध्वस्थानीयेसमुद्रवृष्ट्यपेक्षयातृतीयेरजसिरंजनात्मकेतेजोमंडलसूर्यरूपेणतस्थिवांसमास्थितंत्वामीधेदीपयामि।तथामहि
षामहांतोयजमानाःऋतस्ययोनौयज्ञसंबंधिनिवेदिदेशेअहिन्वंनृप्रीणयंति।अक्रंदग्निः०भ्रातृसंतः।अयमग्निरक्रंदत्अस्मद

रिष्टवारणार्थं गर्जन्। किमिव स्तनयन्निव द्यौः यथा द्युलोकस्थो मेघो गर्जन् सस्यशोषभीतिं निवारयति। तद्वत् किं कुर्वन्। क्षामदाहकमस्म
द्विरुद्धं रेरिहन् लेलिहानः वीरुधः समंजन् पुष्कलतावस्मदनुकूलानि सम्यगभिव्यंजयन् हि यस्मात् जन उत्पद्यमानः सद्यो विहित तदानी
मेव इद्धो दीप्तो व्यख्यत् विविधं जगत्प्रख्यापयन् रोदसी द्यावापृथिव्योरंतर्भानुना रश्मिना स्वयमाभाति समंतात्प्रकाशते। उशिक्पा
वको अरतिः ०मिनक्षन्। उशिक् कामयमानः पावकः शोधकः अरतिर्यागरहितेषु प्रीतिरहितः सुमेधाः शोभनमेधा सेवकाभिप्रा
२१ यधारणशक्तिर्यस्यासौ सुमेधाः अमृतो मरणरहितः एतादृशाग्निः मर्त्येषु यजमानेषु यजमानेषु निधायि निहितः। अरुषः रोग
वक्रूपाद्युपद्रवरहितधूमं भरिभ्रदतिशयेन धारयन् इयर्ति ऊर्ध्वं प्रसारयति। शुक्रेण शोचिषा निर्मलतेजसा प्रभावरूपेण द्या
माकाशमिनक्षत् रक्षति व्याप्नोति। विश्वस्य केतुर्भुवनस्य गर्भ० तपंच। विश्वस्य केतुः जगतो ज्ञाता भुवनस्य लोकस्य गर्भो गर्भवदंतरे
वस्थितः। जायमानो जातमात्र एव रोदसी द्यावापृथिव्यौ आपृणत् सर्वतः स्वतेजसा पूरयति। यद्यदा पंच यजमानसहिता ऋत्विज
गृहपाः पंचसंख्याका जनाः अग्निमयजंत। तदानीं परायन् आहुतीरूपेणादित्यसमीपं गच्छन् वीडुं चिद्दृढं मेघाद्रिं पर्वतसमानमेघ राम
मभिनत्। श्रीणामुदारो धरुणो० मिधानः। धरुणो धारयिता मनीषाणामपेक्षितानां स्वर्गादिफलानां प्रार्पणः प्रापयिता सोमगो २
पाः सोमयागस्य रक्षिता वसो निवासहेतोः सहसो मथनेन वेगरूपस्य बलस्य सूनुः अप्सु वृष्टिरूपासु राजा वैद्युतरूपेण राजमानः

उषसामग्नेप्रातःकालेइंधानः अग्निहोत्रिभिर्दरूप्यमानोविभाति। यस्तेअद्यकृणवद्भद्र० पविष्ठ। भद्रशोचेगणनांदीप्तेअग्नेदेवतेत
वाद्यास्मिंदिनेघृतवत्तमपूपमुपस्तरणाभिघारणोपेतंपुराडाशंयोयजमानःअकृणवत्करोति। हेयविष्ठयुवतमदेवेषुभक्ति
युक्तंतंपुरोडाशकारिणंयजमानमभिप्रेतंअष्टमभिमतधनंप्राप्तुंप्रकर्षेणनयप्रापय। कीदृशंद्युम्नंप्रतरांउत्कृष्टतरं। वस्योअति
शयेननिवासकारणं। आतंभजसौश्रव०ने। प्रियः सू० नित्यैः। शोभनंश्रवः कीर्तिः सुश्रवः तस्यसंबंधीनितत्कारणानिकर्माणिसौ
श्रवसानिहेअग्नेतेषुकर्मसुतंदेवभक्तंयजमानंआभजसर्वतःप्रेरय। उक्थउक्थेनिष्केवल्यप्रउगादिरूपेतत्तच्छस्त्रेशस्यमाने
तंआभजप्रेरय। अयंयजमानंसूर्येप्रियोभवातिभवतु। अग्नेवृद्धावपिप्रियोभवतु। तथाजातेनोपजन्त्रेनपुत्रेणउद्भिनदत्। उद्भे
दमतिहृदंप्राप्नोतु। तथाजनित्वैर्जनिष्यमाणैःपौत्रादिभिश्चउद्भिनत्। तामग्नेयजमानाअनुद्यून्विश्वावसूनिदधिरे०जोविवव्रुः
हेअग्नेयजमानाःसर्वेअनुद्यून्प्रतिदिनंत्वामेवानुगच्छंतोवार्याणिवरणीयानिविश्वावसूनिसर्वाणिधनानिदधिरेधावतत्वया
सहावस्थिताःतेयजमानाःपुनरप्यधिकंद्रव्यंकांक्षंतः उशिजोधनधान्यानिकर्माणिकामयमानाःगोमंतंबहुभिर्गोभिर्युक्तंव्रजंगोनि
वासस्थानंविवव्रुःविशेषेणप्रवंतः। दृशानोरुक्मः०रेताः। दृशानोदर्शनीयरूपः रुक्मःसुवर्णसदृशः उर्व्यामहत्यादीप्त्याअद्योतविद्योत
तते। किंकुर्वन्दुर्मर्षइतरैरनिरस्कार्यंआयुजघ्नंश्रियेरुचयितुंरुचानोवांछन्तथाविधोग्निर्वयोभिरंमृतैःहविर्भिरमृतोभवतुय

यस्मादेनमग्निर्द्योर्भुर्लोकवासी देवगणः सुरेताः संतोजनयतु। तस्मादमृतत्वंयुक्तः। गोषूक्तेनाश्वसूक्तेनवा। गोषूक्तेनदृष्टंसामगोषू
क्तं। अश्वसूक्तेनदृष्टंसाम अश्वसूक्तं। तथाछंदोगप्रसिद्धेः तयोश्चाद्यमाग्नेयंसौर्यमितरत्। अतः सायंप्रातर्मुपतिष्ठते। गोसूक्तंआ
गावो अग्मन्नित्यनुवाकशेषः षकारः श्लोकादसः यदृक्तं दृइत्यनुवाकत्रयाः अश्वसूक्तमित्यन्ये। गोषूक्तमश्वसूक्तंचसामहृदयंयदिं
27 सहमित्यस्यामृचिचतुर्थमंत्रादिकंप्रथमंद्वितीयः स्तृतीयादिकं। द्वितीयमिति। द्वे एते ग्रामसामनीक्रमेणानयोः। गोषूक्तस्यसूक्त
ऋषिः। छंदोगायत्री। यथादिंद्राहंयथात्वमीशीयवस्वएकइत्। स्तोतामेवोषरव्यास्यात्। हे इंद्र यथात्वंत्वमिवयत् यदि अह एकइत्
एकएववस्वोवसोरशीय। ईशस्व। तथामेममस्तोतागोसखागोमास्यात्। अतस्तवस्तोत्रेमत्यंगवादिदेयमित्यर्थः। विश्वेदेवाः त्रि
ष्टुप्। आगावो अग्मन्नुत० दुहानाः। गावः अग्मन् आगच्छंतु उतापिचभद्रंकल्याणंकुर्वंतु। गोष्ठेगोस्थानेसीदंतुतिष्ठंतुअस्मेअस्मा
नुरणयंतु। रमयंतु। इंद्रायैश्वर्यवते अग्नये उषसः प्रागुदयात्पूर्वः प्रथमाः क्षीरंदुहानाः। प्रजावतीरपत्यवत्यः पुरुरूपाबहुरूपा
श्च इहास्मगृहेस्युः। जगती। इंद्रोयज्वने० देवयुं। इंद्रः परमंददाति। इष्टमुपहरत्येव। ततत्स्वंनमुषायतिनापहारयति। अस्ययजमा राम
नस्यरयिंधनंभूयोभूयोवर्धयन्देवयुंदेवसस्वंएनंअभिंन्नेनोपहन्ते विंन्नेखिले अयज्वभिरष्टणात्। अयज्वभिश्चानाक्रांतेस्व २७
गादिस्थानेनिदधातिस्थापयति। नतानशंतिनदभातितस्करोनैना० सह। गोपतिः गोस्वामीइत् यजमानोयाभिर्गोभिर्देवान्यजते।

याश्चगा ददाति ताभिः गोभिः सह सहैव ज्योक्चिरं सचते संगतो भवति। नाः गावो न नश्यंति। ता गास्तस्करो न दभाति। नापहरति। एनाः गाः अध्यिव्यथ
थिताः अमित्रः शत्रुर्नादधर्षति। नापादत्ते। नता अर्वा रेणु॰ यज्वनः रेणुककाटो भूमिरेणुः अश्नुते। अदुर्दीतावीश्वास्तागानाश्नुतेनभिभ
वति। ता गा अभिलक्ष्य असं॰ स्कृतत्रं आलभ्य संकर्तुं संस्कर्तारो नोपयंति। यस्य मर्त्यस्य यजमानो मानुषस्याय जमानस्य विचरंति। कर्म
सु देवतार्थं विविधं चरंति। तस्य यजमानस्य ता गा अनुलक्ष्य उरुगायं बहुधावर्णनीयमिहायमेव भवति। त्रिष्टुप्। गावो भगो॰ वि दिद्रं। गा
एव भगो धनं इंद्रो मे मम गावो अच्छान्। अच्छानु रक्षंतु इति कामयतां गावः प्रथमस्य अभिषुतस्य सोमस्य भाजनीयं दधाति। तद्वैतुला
नुः। किं बहुना। हे जनासः इमाः याः गावो लोके चरंति ता एव स प्रसिद्ध इंद्रः तदभिमतता तु अतश्च तद्धृदा अंतःकरणेन मनसा विद्विचारे
णेंद्रमेवेच्छामि। यूयं गावो मेदयथा॰ स मा सु हे गावो यूयं कृशं चित्कृशमपि पुरुषं मेदयथ क्षीरादिना मेदसाणं कुरुथ। अथाश्रीलं चि
त्तनिश्रीकमपि सुप्रतीकं स्वर्गं कुरुथ। तथास्मदीयं भद्रं गृहं कृणुथ। हे भद्रवाचः वो युष्मदीयं यस्वयोन्नं क्षीरादि तत्सभासु जनसंघेषु बृ
हन्महदुच्यते अहो क्षीराज्यं दध्यादि बहुमिति। प्रजावतीः सूयवसं॰ रिशंतीः शुद्धा॰ वृंज्यात्। एताः गावः प्रजावतीः बहुवत्सोपेताः सूय
वसं शोभनं तृणादिकं रिशंतीः भक्षयंत्यः सुप्रपाणे सुष्ठु प्रकर्षेणापातुं शक्ये तयगादौ शुद्धाः आपः पिबंत्यो वर्तंतां। हे गावः स्तेनः श्चो
रो वो युष्मान् अपहर्तुं माईशत। ईश्वरो मा भूत्। अघशं॰ सो वाक्यारुष्य मेशत। तथा रुद्रस्य क्रूरस्य हेतिरायुधं वः परिवृंज्यात्। यु

ष्मादिकं परितो वर्जनं करोतु। अनुष्टुप्। उपेदमुपवर्चनमा शुगोषूपपृच्यतां। उपर्षभस्यरेतस्युपेंद्र तववीर्ये। इदं वक्ष्यमाणं सर्वमुपपृच्यतां। स
मीपे युज्यतां। ऋषभस्य स्वस्ति उपपृच्यती गर्भ इति शेषः। हे इंद्र तव वीर्ये रक्षण सामर्थ्ये उपपृच्यतां गाव इति शेषः। अग्निस्त्रिष्टुप्॰ यदक्रंद
२८ इत्याधाने व्याख्याताः। अयं मंत्रः विशेषः। उपस्तुत्यं महि जातं ते अर्वन्। तवजातं जन्म महीमहत् अत एवोपस्तुत्यं सर्वैः समीचीनमिति।
स्तोतव्यं मासी इति। यमेन दत्तं॰ तष्ट। यमोग्निः अग्निर्वा वयम इति श्रु त्यंतरात्। त्रिषु लोकेषु त्रायते विस्तार्यत इति त्रिलो वायुः। य
मेनाग्निना दत्तं एनं अश्वं त्रिलो वायुरनुयुनक् यथा योजितवान् ततः इंद्रः प्रथमः सर्वेषु देवेषु मध्ये प्रथमः प्रवृत्तसन् एनमश्वं अध्य
तिष्ठत्। अधिष्ठितवान्। तद्या गक्षेमो न कृतवानित्यर्थः। गंधर्वः कश्चिदस्याश्वस्य रशनां बंधन रज्जुं अगृह्णात् स्वीकृतवान्। हे वसवो
यूयं शूरादित्या दिमाश्वं निरतवष्ट निः शेषेण प्रकाशितवंतः। एवं प्रशस्तोश्व इत्यर्थः। असि यमो॰ बंधनानि। हे अर्वन् त्वमश्व त्वं यमो
ग्निरसि आदित्योसि त्रितो वायुरसि। पूर्वोक्त प्रकारेणाग्नि वायुरादित्यैरनुगृहीतत्वात् तद्रूपत्वं। तथा गुह्येन व्रतेन गोप्येनाश्वमेधाख्ये
न कर्मणा तत्रत्येन सोमेन च समया समये प्राप्तकाले विपृक्त विशेषेण युक्तासि इह शस्य ते तव दिवि द्युलोके बंधन साधनानि त्रीण्येवा राम
भिज्ञा आहुः। वाहकाहि रात्त्याधिक्येन अत्क्रम अश्वं नियमं पाश्ययो रुरसि च त्रिभिर्दामभिर्बध्नंति। तदिदं बंधनत्रयं। यद्वा शास्त्रसि २८
द्धं किंचिकारणत्रयं द्रष्टव्यं। त्रीणि त आहुर्दिवि॰ जनित्रं। यथा द्युलोके अतीवो ज्ञैः श्रवो रूपस्य बंधनत्रयमभिज्ञा आहुः। तथैवाप्सु समुद्र

चैः। यथा वाजपेये अश्वं तरमिति मंत्रेण श्वमप्सु अपयंतीति। तथापि पूर्वोक्तं बंधनत्रयमपेक्षितं। तथा समुद्रमध्ये स्थितायाः वडबायाः बं
धनत्रयमित्येवमभिज्ञा आहुः। उतापि च हे अर्वन् तेन त्वयस्मिं प्रितुवी येपरमं जनित्रमुत मंजन्ये स्ये वमश्वलक्षणा अभिज्ञा आहुः।
तस्मिन्नु वीर्यं तामेव वर्णं स्त्रि भिर्बंधनैः निवारणी यो भूत्वा मे मह्यं त्वं सीव कथयसीव। इमा ते वाजिन्न० गोपाः। हे वाजिन् त्वप्रक्षेपुंव शद्दे मे
नपरिहारार्थमिमानि धनानि एतानि लोहमयो ह्यावरण विशेषरूपाणि निधायं ते शफाएष्विति निधानानि। किंच तेत्र व भद्राः सुव
र्णादिरवचितत्वेन कल्याणरूपा रशनात्व खलिनो रिवध कक्ष्योपु ह्च वध्र रव्या अत्रास्मिन्ने वदेशे स्थापिताहमवश्यं। कीदृशस्य तत्व ऋत
स्य सत्यस्य बहुमूल्यार्हस्येत्यर्थः। कीदृशाः येरशनाः गोपाः एष्टदेशे व्यधादि परिहारेण श्वं गोपयत्व भिरक्षंत्ति अभितः सादिन
मपिरक्षंतीत्यर्थः। आत्मानं ते मनसा० तं गं। शिरो० नत्रि। हे अश्व अवः आरू रक्षकं दिवा पतयंतं भुवः अस्पर्शनेनाकाशे अवग
च्छंतं। अतएव पतंगं पक्षसदृशं ते तवात्मानं सरूपमारात् समीप एव मनसा चित्तेन अजानां ज्ञातवानस्मि। तथा सुगेभिः जैर्गंतुशक्यैः
अरेणुभिर्धूलीरहितैः पथिभिराकाशमार्गैः जेह्मानं शीघ्रगतियुक्तं। अतएव पतत्री पक्षसदृशं तदीयं शिरोप्यहं अवश्यं उन्नत
त्वादृजो भावाद्वा। अत्रा ते रूपमुत्त० रजीगः। हे अश्व यदा यस्मिन्काले तव भोगं धृतमुद्गादिभक्षणरूपं मर्तो मनुष्यः सपरिवारः आ
नट् भोगं प्राप्तवान्। तस्यपरिचर्यया परिवारकोपि भोगं प्राप्तवान्। आदित् ईदृशवृत्तां तादनंतरमेवग्रसिष्टः अतिशयेन ग्रसितुका

मस्त्वं ओषधीः श्रणकाद्याः अजीगः प्रापितोसि। अत्रास्मिन्नवसरे ते रूपमुत्तमं सर्वोत्कृष्टमिव अवश्यमहं निश्चितवानस्मि। कीदृश
स्य तव इषोन्नस्य समंतात् उपदप्राप्तं भोगे गच्छतः कीदृशं रूपं जिगीषमाणं जेतुमिच्छायुक्तं। अनु त्वा रथो० ममिरे वीर्यं ते। हे अर्वन् त्वां अनु
29 रथः प्रवर्तते। मर्यो अश्ववारः त्वामनुजीवति गावोपि त्वामनुजीवंति। तव क्षीरनवनीतघृतार्थं गवेषणात्। कनीनां कन्यकानां बा
लानां दासीनां भगः सौभाग्यं मत्वामनुसंपद्यते। अश्वशालापरिचर्यया वस्त्रान्नादिप्राप्तेः व्रातासो व्रातासनरूपाः मनुष्यसंघाः।
तव सख्यं त्वदीयं साहाय्यं मनुपश्चादीयुः। जेयं प्राप्नुवंति देवाः प्राजापत्यादयः ते तवदीयं वीर्यं सामर्थ्यं अनुलक्ष्य ममिरे। स्वकीयं
हविः सेवनं प्रमितवंतः। हिरण्यशृंगोयो अस्य० तिष्ठत्। अयमश्वो हिरण्यशृंगः हिरण्यसमानवर्णः शृंगस्थानीयो मूर्द्धप्रदेशोय
स्यासौ हिरण्यशृंगः। भास्वच्छिर इत्यर्थः। अयो लोहवद्दृढं तं दृढः अस्याश्वस्य पादाः मनोजवा मनोवृत्तिसदृशेन वेगेनातिशयेन यु
क्ताः। एतेनाश्वेनोत्त्रैः श्रवसा विना इंद्रोप्यवरो निकृष्ट एवासीत्। देवाः इत्सर्वेपि देवाः स्वयमश्वस्य संबंधि हविरद्य हविर्भक्षणं आयं राम
न् प्राप्तवंतः। एतदीयमेव हविरभक्तुयोग्यमिति निश्चितवंतः प्रथमाः आद्यो यः प्रजावतीः अर्वंतमश्वं अध्यतिष्ठत्। स्वकीयत्वेनेकीकृ २९
तवान्। सोप्येतदीयमेव हविराद्यमिति निश्चितवान्। ईर्मांतासः० मश्वाः। सर्वेप्यश्वा एवं विधाः ईर्मांतासः। गच्छभाजो नथनभागश्च
एषां ते ईर्मांतासः। सिलिकं संकुचितं निम्नं मध्यं पृष्ठभागो येषां ते सिलिकमध्यमासः। सं शूरणासः युद्धे जयहेतु

तेनसम्यक्शूराः।दिव्यासोअश्वाः।गमनादिव्यवहारनिष्पादकाः।अत्यास्तत्रगमनशीलाःतेचहंसाइवश्रेणिशःसंध्रसायतंते।य
थाहंसाःपंक्तिवद्धाःआकाशेगछंतिएवमश्वाअपिसंहताःयुद्धायप्रयतंते।यद्यस्मात्कारणादश्वादिव्यक्रीडाविजीगीषाद्यर्थयोग्यं
अज्मंगमनमादिष्टःव्याप्नुवंतः।तवशरीरं॰चरंति।हेअर्वन्तवशरीरंपतयिष्णुशीघ्रगमनशीलंतवचित्तंध्रजीमान्गतिमान्वा
तद्रुववायुसदृशं।तवशृंगाणिशृंगस्थानीयानिपरिप्रक्षिप्तान्यायुधानिविष्टिताविशेषेणतत्रतत्रस्थितानिपुरुत्रावहुधारण्ये
षुग्राम्येभ्योवहिर्युद्धप्रदेशेषुजर्भुराणापरसैन्यमतिशयेनहरमाणानिचरंतिप्रवर्तंते।उपप्रागाछसनं॰रेफाःवाजीकृतुद्धारान्त्र
हेतुअर्वायमश्वःशासनमस्मिन्नक्रतौविशसनस्थानंप्रत्यक्षपप्रागात्।समीपंप्राप्तवान्।किंकुर्वन्।देवानूद्रवतिप्राप्नोतीतिदेव
द्रियंतादृशेनमनसादीध्यानःध्यानंकुर्वन्अजःप्रजापतिःपुरोनीयतेअस्मादश्वात्पूर्वमृत्विग्भिःनीयंते।प्रजापतिपुरोनियं
ताअस्मादश्वात्पूर्वमृत्विग्भिर्नीयंते।प्रजापतिंपुरोगछंतमृत्विजोध्यायंतीत्यर्थः।यद्वा।छागमःसप्तश्वस्यपुरतोनीयते।अस्या
श्वस्यनाभिर्नाभ्युपलक्षितशरीरंप्रजापतिंनीयते।अस्याश्वस्यपश्चात्पृष्ठभागेकवयोविद्वांसऋत्विजोरेभाःयंतिस्तुतिंकुर्वाणाग
छंति।उपप्रागात्परमं॰वाजीणि।अर्वागमनवानयमश्वःपरंउत्कृष्टंयत्सधस्थंशत्रुभिःसहस्थातुंयोग्यंयत्स्थानमस्तितदुपप्रागा
त्।तत्समीपंप्राप्तवान्।किमर्थंमातरंपितरंच।प्राप्तुंस्वर्गलोकेदिव्योपभोगेपितामातारउभौप्राप्तुंदेवतायेत्यर्थः।हेअश्वअद्यअस्मिन्दि

नेजुष्टतमो अतिशयेन प्रीतः सन् देवान् गम्याः प्राप्नुहि। अथानन्तरं दाश्रुषेह विर्दत्तवते यजमानाय वार्याणि वरणीयानि फलान्ययमृत्विक् सं
घो आशास्ते प्रार्थयते। मो नो वरूणो अ० वीर्याणि। मित्रादयः प्रसिद्धाः एति सर्वदा गच्छत्यायुर्वायुः ऋभुक्षो देवाः क्षीयंन्ति निवसंत्यस्मिन्नित्यु
30 भुक्षाः प्रजापतिः महतो देवाः ते सर्वेपि नो स्मान् मापरिख्यन् मा दैन्निंदु। यद्यस्माद्वाजिनो यागद्वारान्नसाधनस्य देवजातस्य देवार्थमु
सन्नस्य सप्तेरश्वस्य वीर्याणि सामर्थ्यानि विदधे अस्मिन् यज्ञे प्रवक्ष्यामः। यन्निर्णिजा० पाथः। निर्णिजा प्रोक्षणाद्दिहृतया श्रुध्या रेक्ण
सासुवर्णरजतादिमणिरूपेण धनेन प्रावृतस्य प्रकर्षेण सर्वतो वेष्टितस्य चतारऋत्विजः समुखं तिहिरण्मयाः का वा भवंतीति अश्वमे
धे अश्वग्रहणात्। तथाविधस्याश्वस्य संबंधिनी गृहीता हस्ते गृहीतां राति ह विषोदानं मुखतोग्रे यद्यदानयति ऋत्विजः संपादयंति तदानीम
जो गतिमान् अश्वः सुप्राङ् सुष्टु प्रकर्षेण स्थानं प्राप्नुवंन्। मेम्यत् मङ्गति हेषशब्दस्यानुकरणं विश्वरूपो नानावर्णः० सइंद्रापूष्णोः इंद्रापूषप्र
भृतीनां देवतानां प्रियं पाथोप्येति प्रीतिकरमन्नं भावं प्राप्नोति। एषश्छागः पुरो० जिन्वति। वाजिनान्नसाधनेनाश्वेन सह एषः छागः
कश्चिदजः पुरो नीयते। तस्मादश्वात्पूर्वभागे प्राप्यते। कीदृशं पूष्णो भागः पूषदेवताभागरूपः विश्वदेव्यः। विश्वेभ्यो देवेभ्यो हितः। अभि राम
प्रियं सर्वतः प्रीतिकरं पुरोडाशवत्स्वादु येन मजं अर्वताश्वेन सह त्वष्टे तु त्वष्टेव सौश्रवसाय श्रूयते सर्वैरपि जनैः प्रीतिपूर्वकमिति। ३०
श्रवसमन्नं सुष्टु श्रवः सुश्रवः सत्यंभावः सौश्रवसं तस्मै सम्यग् अन्नभागाय यद्यस्मात्कारणात् जिन्वति प्रीणयति तस्मादयमजः प्रेरय

ते। यद्धविष्यम् ऋतुशः०न्नजः। यद्यत्र मानुषा ऋत्विजः अश्वं त्रिः परिणयंति त्रिवारं प्रदक्षिणीकुर्वंति। कीदृशम् अश्वं हविष्यं हविषो योग्यं ऋतुशो देवा
नां ऋतावृत्तौ देवानु गच्छंतं अत्रास्मिन्देशे अजः प्रथम एति। कीदृशोजः पूष्णो भागः। किं कुर्वन् देवेभ्यो भागं यज्ञं प्रतिवेदयन् हे देवाः यज्ञो
वर्तत इत्येवं॥ होताध्वर्युरा०ध्वं। योयस्मिन् यज्ञे होता विद्यते यश्चाध्वर्युरावया आसमंताद्देदिंगछति तत्र तत्रानुष्ठानाय शीघ्रं प्रवर्तत
इत्यावयाः योप्योग्निमिंधः। अग्निदः उपधिता आग्नीध्रः यश्च ग्रावग्राभः ग्रावस्तुत् उक्तापि च यः शास्ता प्रशास्ता यश्च सुविप्रः प्रस्तो
ता एते सर्वेपि स्वरंकृतेन सुष्ठु अलंकृतेन अपेक्षितद्रव्यैः संपूर्णेनेत्यर्थः। स्विष्टेन सुष्ठु अनुष्ठितेन तेन यज्ञेनाश्वमेधेन वक्षणाः फलवा
हिनीः घृतकुल्या आपृणध्वं। होत्रादयः सर्वेप्यापूरयध्वं। यूपव्रस्का०न्वतु। यूपव्रस्काः यज्ञार्थं सुयूपं व्रश्चंति उतापि च ये यूप
वाहाः छिन्नयूपं यज्ञमावहंति येप्यन्ये अश्वयूपार्थं चषालं यूपकटकं तक्षति तक्षणेन संस्कुर्वंति उतापि च येप्यन्ये पुरुषाः अर्वते अ
श्वार्थं पचनपाकसाधनके ष्ठ संभरंति संपादयंति तेषामभिगूर्तिसंकल्पा नोस्मान् इन्वतु। प्रीणयतु। उपप्रागात्सुमन्मे० सुबंधुं। सुष्ठु
मद्देहे तु रितिहर्षकारणं फलं सुमत् तस्मादुपप्रागात्। समीपे प्राप्नोतु। मम दायं फलं मे मदर्थः अथादिदेवैः संपादितः उपवीतपृष्ठः। कमनी
यपृष्ठभागो यश्च देवानामाशादैवैराशासनीयानि हवींष्युपप्रागात्। देवहविष्टं प्राप्नोतीत्यर्थः। ऋषयो विप्रा अभिज्ञाता रक्षंति ज एनमश्व
मनुमदंति। अनुकूले हर्षयंतु। देवानां पुष्टार्थं सुबंधुं चकृम एनमश्वं बंधुवत्स्थितं प्रियं चकृम। यद्वाजिनो दाम०ष्यस्तु। वाजिनोस्याश्वस्य यद्दा

मगलंबंधनमस्तियच्चसंदानंपृष्ठभागवंधनंदामयाचार्वतोऽश्वस्यशीर्षण्यारशनाशिरःसंवद्धारज्जुःयाप्यन्याःपुच्छलग्नारज्ज्वाश्वस्यर
ज्जुःयद्वाघास्याश्वस्यआस्येमुखेप्रभृतंप्रक्षिप्तंतृणंसर्वातातत्सर्वमपिदेवेष्वपिप्राप्तस्यत्तेतवयजमानस्यास्तुविद्यतां।यथेहलोके
सर्वसाधनसंपन्नोऽश्वस्तथास्तितद्वत्स्वर्गलोकेप्यस्त्वित्यर्थः।यदश्वस्यक्रविष्णोमक्षिकाश०देवेष्वस्तु।अश्वास्यस्यसंबंधीक्रविषःक्र
31 व्यंयन्मासंमक्षिकाशमक्षिकाभक्षितवती।यद्वायच्चसर्वंस्वरावंजनार्थंशकलेस्वधितौछेदनहेतौशस्त्रेचरिप्तमीषद्विप्तमस्तियद्
पिशमितुर्हस्तयोर्लिप्तंयच्चनदीयेषुनखेषुलिप्तंहेअश्वतेतदीयंसर्वातातत्सर्वंदेवेषुअप्यस्तु।देवेष्वेवहुतंभवतु।यदूवध्यं०
पवंतु।उदरस्यमध्येयदूवध्यंअर्धजीर्णंअपक्वंशकृतादिदुर्गंधिरूपेणवायुनासहगच्छति।यश्चामस्यापक्वस्यक्रविषोमांसस्यगं
धोदुस्सहोस्तितत्सर्वंसुकृतासुकृतंयथाशमितारःकृण्वंतुकुर्वंतु।उतापिचमेधयज्ञयोग्यंश्रितपाकंअपाकमपिपाकोपरित्यज्यस
म्यक्पक्वंयथाभवतितथापचंतु।यत्तेगात्रादग्निना०राततमस्तु।हेअश्वअग्निनापच्यमानात्तेगात्राज्वलितावयवाद्यद्रस्मवधावति
अज्ञातंसद्भूमौपतति।निहतस्यनितरांहन्यमानस्यअभिशूलंशूले सघदंगंमभिवधावतितद्भूम्यामपिमाश्लिषत्।श्लिष्टंमाभू राम
त्।तृणेष्वपिलग्नंमाभूत्।किंतुतदुशद्भ्यःकामयमानेभ्योदेवेभ्योरातंदत्तमस्तु।येवाजिनंपरि०इन्वंतु।येपुरुषाःवाजिनमश्वंपक्वंपरि ३१
पश्यंतिपरितःआदरेणपश्यंति येप्यन्येसुरभीःसुगंधोयमश्वःनिर्हरअस्मान्निक्रूष्यास्यमाहरेत्याहुः।उतापिचयेचान्येअर्वतो

श्वस्य संबंधिनी मांसभिक्षां उपासते प्रार्थयंते तेषां सर्वेषामभिगूर्तिः संकल्पो नोस्मान् इन्वतु प्राप्नोतु। अस्माकं श्रेयसे भवत्वित्यर्थः। य
न्नीक्षणं० स्यश्वं। मांसंपच्यते यस्यामुखायां सा मांसस्पचनी तस्याः उखायाः नीक्षणं आदरेण ईक्षणं यद्दस्तिया निचपात्राणि
पूष्णोर स्य आसेचनानि सर्वतः सेचनाधारभूतानि चरूणां मांसस्थाली नाम पिधाना आच्छादनपात्राणि ऊष्मण्या उष्मलक्ष
णार्थानि यानि संति अंका मांसलेशेमांकिताः सूनास्वधितिवेत सशाखाद्योये संति तानि सर्वाण्यश्वं परिभूषंति परितोलंकु
र्वंति। निक्रमणं निषदनं० देवेष्वस्तु। अर्वतोश्वस्य यन्निष्क्रमणं पादप्रक्षेपस्थानं निषदनमुपवेशनस्थानं विवर्तनं परिवर्तनस्थानं
यच्चपड्बीशंपादबंधनस्थानं पदे क्षुद्रजो वास्ति। यच्च जल्मश्वः पपौ यच्चघासिंतृणादिकं जघास भक्षितवा नूनं तदीयं सर्वा ता तत्सं
र्वं देवेष्वप्यस्तु। देवेष्वेव समर्पितं भवतु। मात्वाग्निर्ध्वनय० त्यश्वं। हे अश्व धूमगंधिः धूमगंधापादको ग्निः मा ध्वनयत्। पादजन्यश
ब्दो पितं माकरोतु। धूमगंधि दुष्पाकश्चनिश्वासा मा भूदित्यर्थः। किंच भ्राजंती अत्यंतं स्थाली मा विभक्त अतिपाकेनाभितो विभक्तं विदग्धं
माकरोतु। त्वं तु जघ्रिः राघ्राणयोग्यः। सुगंधो भव। इष्टमिच्छाविषयं वीतं एकांतरमणीयं पाकं अभिगूर्तं देवयोग्यं अस्त्वितियजमानैः
संकल्पितं वषट्कृतं वषट्कारेणाहूतमश्वं देवासः प्रतिगृह्णंतु। देवाः स्वीकुर्वंतु। यदश्वाय वास० यामयंति। यद्वासो श्वार्थमुपस्तृणंति अधः
प्रसारयंति यच्चाधिवासमुपर्याच्छादयंति यानि वहिरण्यानि मण्यादीनि अश्वार्थं संपादितानि अर्वतोश्वस्य यत्संदानं बंधनदाम

यज्ञपट्टी संपादवंधनस्थानगतं रज्जुतानि सर्वाणि देवेषु प्रियाणि भूता आयामयंतिसर्वतः प्रसादयंतु। यत्ते सादे॰ सूदयामि। हे अश्व ते तव
सादे गमने महसा वलेन भूकारशब्दानुकरणं तेन युक्तस्य यच्छीघ्रगमनाय योपर्यारूढः पार्ष्णिया स्वकीयपादापरभागेन वा हस्ते धृत
32 याकशया वा तुतोद व्यथां चकार। तेत्वदीयं सर्वा तान्तत्सर्वं ब्रह्मणा मंत्रेण सूदयामि। जुहोमि। तत्र दृष्टांतः। अध्वरेषु यज्ञेषु हविषः सं
वंधीनि आज्यादि वस्तूनि स्रुचेव यथा स्रुवा जुहूनि तद्वत्। चतुस्त्रिंशद्वा॰ विशस्त। वाजिनो त्नसाधनस्य देववंधोर्देवप्रियस्य देवता
र्थं वध्यमानस्याश्वस्य संवंधिनीर्वंक्रीर्वंक्राणि पार्श्वहृदयगतान्यस्थीनि एकैकस्मिन्पार्श्वे सप्तदशास्थेवं चतुस्त्रिंशत्संख्याकाः अन्य
स्य तु पशोः षड्विंशतिरेव। अतः सावधाना स्वधितिरश्वं समेति संगच्छतां। हे शमितारो गात्रात् हृदयाद्यंगानि अच्छिद्रा वयुनाछिद्रर
हिता निप्रज्ञातानि यथा भवंति तथा कृणोत कुरुत। तत्र चायमुपायः। परुष्परुरनुघुष्य तत्सर्वानुक्रमेणेदमीदृशमिति कथयित्वा वि
शस्ता विसशनं कुरुत। एकस्त्वष्टुरश्वस्या॰ म्यमौ। त्वष्टुदर्प्तिमतो श्वस्य ऋतूपलक्षितः काशने एको विशस्ता हिंसिता तथा द्वावयंतारावि
शसनकाले यथा इतः स्ततः धर्तुः तान च रुतिनद्वा नियामकौ द्वौ। अत एवाप्यत्राम्नातं। अध्रिगुश्चापापश्च उभौ देवानां शमितारौ राम
तावियं पश्वस्यप॰ सावित्याहि। हे अश्व ते तव गात्राणां यान्यंगानि ऋतूपलक्षितेन तत्काले कृणोमि। आच्छिनमि। पिंडानां मांसपिंडा ३२
नां मध्ये तातातानि निगान्यंगानि अग्नौ प्रकर्षेण जुहोमि। मा त्वा तपत्प्रि॰ मिथूकः। हे अश्व अपियंतां शरीरं विसृज्य देवानुगच्छं तं

त्वां प्रियः आत्मा प्रीतहेतुर्विग्रहो मा न पत् संतापं मा कार्षत्। तथा स्वधितिः तव तनुवो गात्राणि मा तिष्ठिपत्। मा स्थापयतु सर्वो छिन्नत्वित्यर्थः। अ
विशस्ता विशस्ता विशसनकालरहितगृध्नुः केवलं मांसतृष्णावान् अतिहाय विशसनकालमतिलंघ्य ते गात्राणि तवांगानि असिना शस्त्रेण
मिथ्यैव छिद्राणि मिथूकृः मा करोतु। न वा उ वेतं म्रिः। हरी ते युंजा॰ भस्य। हे अश्व यदेतत् त्वं म्रियसे हिंस्यसि न वा उ वे न म्रियसे। एतन्म
रणमेव न भवति। न रिष्यसि ना विशस्त्रीभिः हिंसितोसि किंतु सुगेभिः पथिभिः सुगममार्गैः देवान् इदेषि देवानेव प्राप्तोसि तत्र देवेषु मध्ये दु
द्रत्वं प्राप्तस्य ते हरी हरिणा युंजा युक्तावभूतां सर्वथा भविष्यत। एवं सर्वथा रुद्ररूपं प्राप्तस्य ते पृषती चित्रवर्णौ स्त्रियुजा अभूतां। रथं यु
क्तं भविष्यतः इदानीं रासभस्य धुरि वर्तमानस्य गर्दभवतू भारवाहिनस्तव वाजी उपास्थानात् वाजी। कश्चित्सा श्वप्राप्तो भविष्यति। सुगव्यं
नो वाजी॰ष्मान्। अयं वाजी नो अस्माकं कल्याणगोसमूहं स रवी कल्याणाश्वसमूहं पुंसः पुत्रान् पुत्रसंपन्नान् उतापि वा विश्वापुषं वि
श्वं पोषयितुं पर्याप्तरयिं धनं कणोतु। करोतु। अदितिरियं भूमिर्नोस्माकं अनागास्त्वं अपराधराहित्यं करोतु हविष्मान् हविस्वरूपेण निष्वं
नो श्वः नोस्माकं क्षत्रं बलं वनतां संपादयतु। अत्र प्रयोगः। सायमग्निहोत्रे अध्वर्युर्होमे द्वितीयाहुत्यूर्द्ध्वं शान्त्यागानंतरं स्वयं होमे तु दृष्टिरसी
त्यनंतरं आहव+यम+ नीयदेनै ऋतदेशे ईषदाहवनीयाभिमुखः प्रतिष्ठन्। उपप्रयंत इति षड्भिर्मामग्नेवर्च इति चतसृभिरथ पूर्वपक्षेग्नी
षोमा विम भिस्वे कुयाहवनीयमुपस्थाय थ निमुमग्न आयूंषी ति षड्भिरुपतिष्ठेत यद्वा प्रतिसंवत्सरं सकृत् सकृदेताभिः षड्भिरुपतिष्ठेत।

33

यद्वा एता उपस्थाने विहाय तत्प्रत्याम्नानतया प्रतिसंवत्सरं समानतंत्रा णि पवमानहवींषि आधानप्रतिपादितप्रकारेण निर्वपेत्। आयुर्दा अग्ने
ति चतुर्भिर्ऋग्भिः चित्रावसो स्वस्ती ति त्रिरुक्तेन इंधानास्त्वा इत्येकया आहवनीयमुपस्थाय ऊधेयानास्त्वेति अग्नेः समिदसी ति सोमस्य समिदसी
ति यम + सी + स्यस मिदसी ति चतुर्षु उपदाधाने एकैकत्राग्नौ च तस्रः २ समिध आधाय संत्वमग्न इत्याहवनीयमुपस्थाय वयं सोमेति हा
स्ते न मुखं निमृज्यापस्त्वश्यसंपश्यामि प्रजा अहमिति गृहं प्रेक्ष्यां नस्थं भो गो इति गोष्ठसमूहमुपस्थाय रेवती रमध्वमित्यंतराग्नी तिष्ठं
जपित्वा संहितासि विश्वरूपी रिति भुवनमसि सहस्रेति वा वत्सं वत्सा वेत्संहितासि विश्वरूपेत्यभिमृश्य उपत्वाग्ने इति तिसृभिरग्ने
तं न्न इति सि तिसृभिः सनो बोधी त्येकया वा परेण गार्हपत्यं गार्हपत्य उपस्थाय पूर्ववत्तिष्ठं जपित्वा रायस्पो॰ पश्यामि॰ अयतामिति गृहा
न् पशून् वा प्रेक्ष्य महि त्रीणामिति नहि तेषा॰ संसो॰ ते ह पुत्रासो॰ मा नः शंसो नतत्सवितु॰ सोमानं स्वरणं मित्रस्य चर्षणि प्रसमित्रक
दा चन स्तरीः कदाचन प्रयुक्त सि परि त्वाग्ने पुरं वयमित्येताभिराहवनीयमुपस्थाय यदि आत्मनो निहितधिना स्पर्धते न कि लायमस्म
तुल्यः स्यादिति त दानिर्मदोसी ति दक्षिणस्य पदः पार्ष्ण्या भूमिं निपीडयेच यदि स हृशेन स्पर्धेत कथं कि लायमस्मत्तुल्यः संप्रवृत्त इति राम
तदा प्रभूरसी ति दक्षिणस्य पदो दक्षिणेन पादेन भागेन भूमिं पीडयेच यदि यः स्पर्धेत भो धिग यं मदधिक इत्यर्थः। तदाभि भूरसी ति दक्षि ३३
णेन पादाग्रेण भूमिं निपीडयेदथ पूषा मा पथ्यु पा इति चतुर्भिर्यजुर्भिर्लोकानुपस्थाय प्राचीं दिगि ति षड्भिः यथालिंगं दिश उपस्थाय

अग्नीनुपसमिध्य धर्मोमा० गमेमही आहवनीयमग्नीन्वा उपस्थाय अपरेण गार्हपत्यमग्न आयूंषीति द्वाभ्यां अग्ने गृहपत इति नंतवेज्योतिष्मतीमि
त्यृक्‌द्वाविद्यमानपूतस्ता माशिषमाशासे मुष्मैज्योतिष्मतीमित्यमुष्मा इत्यत्र च तुर्थ्यंतं पुत्रनामगृह्णन् पुत्रवानाहेकमेणनामाम्नुत्काया वसुत्रं
मन्त्रमावर्तयंत् गार्हपत्यमुपस्थायस्वा जिमनमर्थमग्नीनुपान्वेतस्वयमेवाभिगच्छतिय दिवा भूर्भुवः सुवः सुप्रजा इत्येवोपतिष्ठते। यदिवा
भर्तुवः शाकेयमित्येवोपतिष्ठते अपिवा दिवस्परीत्यनुवाकेनोपतिष्ठते। अथ वागोपूक्तेन साम्ना उपतिष्ठते दिवा। आगावो अग्मन्नि
त्यनुवाकशेषेणोपतिष्ठते। यद्दक्कं द इत्यनुवाकत्रयेणोपतिष्ठते। विना वोपस्थानेनाग्निहोत्रमेव जुहुयात्। इत्थं सायमुपस्थानमंत्रव्या
ख्यासुगंधिभिः सूक्तिप्रसूनैः पुष्लातु पुमर्थानू पुरुषोत्तमः॥ ॥इत्यापस्तंबीयाध्वरतंत्रव्याख्यायां प्रयोगरत्नमालायां षष्ठे
प्रश्ने पंचमः पटलः॥ ॥प्रातरवनेके न प्रातरुप० प्रातरवनेको नाम शांखांतरमुपस्थानं प्रातः कालसंबंधाच्चतेन प्रातरुपस्थेयोग्निः
नसायं। अधिश्रितउन्नीयमानेवाममाग्ने वर्चो विहवेष्वस्त्विति जापं त्वा यांपते० अरातय इति त्रिभूमोप्रतिषिच्यकालाय यं० दिवोहकमि
तिहस्तौ प्रक्षाल्य श्रियं धातः यशसा नय दिति जपिताघ मुष्टा० अधीयुद्दामा वर्म्यंद्रिय वती० मा हिंसिष्टेति यथा लिंगमंगानि संमृश्य व
चोसि० यष्ठेति सर्वानुपस्थायोत्तरेणानुवाकेनाहवनीयं धर्मीजठरां न्नादं० असौ स्वस्तिते स्त्विति पुत्राणां नामानि गृह्णाति त्रिस्त्रिरेकैकस्य स्वस्ति
वोस्तु० इहे क वृद्धि त्यक् पस्थायाग्नेस्तृणान्परिच्छिनोति तेजस्वी ह ब्रह्मवर्चसी भवतीति विज्ञायते। प्रतिषिक्ता अरातय इति प्रस्यन्वा संभूमा वप० आ

सिंच्येति अभ्यस्तरूपनिर्देशः। प्रतिप्रतिषेकं मंत्रावृत्त्यर्थः। असर्वी मंत्रावृत्त्यर्थश्च। स्नावनेजमहस्यष्टार्थी। अघमर्षुष्टा इत्याचमनं अपांभक्षणं। इं
द्रियवती मित्यस्य संमार्जने दर्शनात्। दीर्घप्राण इति नसि। अजस्रमिति चक्षुषोः सुश्रुता विति कर्णयोः केशा इति केशानां शिखा इति शि
खायां यथास्थानमिति हृदयस्य। वर्चोसीत्यादिना सर्वानग्नीनुपस्थाय। उत्तरामाहुतिमुपोक्षाय घर्मो जठरेत्यादिना इहैक इति दक्षिणं तेनाहव
34 नीयमुपस्थायेति वक्ष्यमाणेन संबंधः। त्रिरर्वाग्वसुना प्रातरिति प्रागुक्ताभ्यासदर्शनेनार्वाग्वसोस्वस्तीति तं तु रसीत्येतस्तु तेभ्यो वर्तते॥ त
त्राभ्यस्तरूपनिर्देशः प्रतिषेकवद्व्याख्येयः। दधिक्राव्णो अकारिषमिति द्वे इति। दधिक्राव्ण आ दधिक्रा इत्यनयोर्ग्रहणं। अग्नेस्तृणान्यपरि
चिनोति यान्यग्नीनां परिस्तरणान् तृणानि तानि तेभ्यः स्वयमुपोहति नाध्वर्युः। प्रकरणात्। प्रातरवने के एवायं नियमः। अन्यत्र अध्वर्युरेव परि
समूहनकालेपोहति। अथात्रत्यमंत्रार्थः। ममाग्न इति च तस्मोन्वाधाने व्याख्यातः। सोत्रं यजुः। अपांपते यो पां भागः। स त एष प्रतिषिक्ता
अरातयः। हे अपांपते वरुण यो सावपां भागः प्रतिषिच्यते स एष ते तवैव तेनास्मदरातयः प्रतिषिक्ताः पराभूता भवंतु॥ कालाय वाजे त्राय
वामंन्नाद्याय वामवने निजे सुकृताय वां। इदमहं दुरमन्यां निष्पलावया मि भ्रातृव्याणां सपत्नानामहं भूयासमुत्तमः। हे हस्तौ वां युवां काला राम
य आयुरर्थं जैत्राय जयार्थं औभेत्रियाय उम्देदनाय अनिष्टनिवृत्त्यर्थं अन्नाद्याय अन्नार्थं सुकृताय सुकृतसिध्यर्थं चावने निजे क्षालये। ३४
यामीत्यभ्यासो नावमेदार्थः। अहमिदं दुरमन्यां हस्तगतं दुरन्नादनदोषं निष्पावया मि प्रक्षालयामि तेनाहं भ्रातृव्याणां शत्रूणां सपत्नानां

ज्ञातीनांचमध्येउत्तमोभूयासं।यजुः।अपांमेत्वादिवौदकं॰अपामेकदेशरूपमिदमुदकंमदीयंकर्मत्रादिवत्रायतीव।अनुष्टुभः।श्रियंधातर्मयि
धेहि॰नयतु।हेधातर्विधातर्विधातर्देवमयिश्रियंधेहि।तथामांश्रियाअधिपतिमधिष्ठातारंकुरु।विशांप्रजानामीशानईशितामघवाघ
नप्रदइन्द्रोमायशसानयतु।मासंयोजयतु।अघमृष्टा॰अघि।अघमृष्टापापपरहितादेवजूतादेवसरस्मःवीडुत्पथजंभनिःदृढपापाप
हांस्मीः।अस्मस्त्वधिअस्मासुवर्तमानान्शपथान्पापानिमलमिवपंकादिमलमिवप्राणिजंभनीःप्रकर्षेणशोधितवस्त्रः।यजुःइन्द्रियव
तीमद्याहं॰मामाहिंसिष्ट।अहमद्यास्मिन्होमकालेइन्द्रियवतीमिन्द्रियरूपांहद्देहेतुंवाचमुद्यासंउच्चारयामिदीर्घप्राणश्चिरंजीवीअछिन्नो
नुपहतः।अरध्यःअहिंसितःगोपारक्षकश्चभूयासं।चक्षुरजस्त्रंसनातनंदेवंदेवयोग्यंज्योतिस्तेनोरूपंसोवर्णंशोभनलक्ष्मयुक्तंचास्तु।
मदीयोकर्णौवसुश्रुतौशोभनश्रोतारौदेवश्रुतौदेवेषुआख्यातौवस्यातां।द्विरुक्तिरादरार्था।मदीयाःकेशाःबर्हिस्थानीयाःशिखाप्रस्तरस्था
नीयाःसर्वाणींद्रियाणियथास्थानंस्वेस्वेकालेकल्पयध्वं।स्वस्वव्यापारसमर्थानिभवंतु।ममहृदयंशंसुखंभवतु।अथोहृदयधर्मीमांमा
हासिष्टमाव्यजनु।गायत्री॰वर्चोसिवर्चोमयिधेह्मायुष्कृदायुष्पत्नीस्वधाविनोगोप्योमस्थगोहेअग्नेवोयूयंवर्चोसिअतःवर्चोबलंमयिधे
हिधत्त।ममआयुःकृतु।आयुःकृतोभव।ततथाआयुपत्नीआयुःपालकाभवत।वोयुष्मभ्यंस्वधानमोस्तु।यूयंममगोप्त्रोरक्षकास्थ।उत्क्षिकृगो
पायतमारक्षतमात्मसदोमेस्थमानःकश्चित्सघासंमाप्रमेष्महि।हेअग्नयोयूयंगोपायत।अनिष्टपरिहारेणपालयत।तथाइन्द्रष्ट्राप्रोमार

क्षतमेममात्मसहः शक्तिरादौवर्तमानाः। तत्रतुष्टिहे ववस्तुकश्चिदनिष्टकारीनोस्मान्‌माप्रधात्‌माहन्यात्‌। वयंवमाप्रमेष्महि। माम्रियेमहि। उपप्रलमिति
अग्निहोत्रेव्याख्यातः। यज्ञेति। या यजूंषिघर्माजठरांन्नादं० द्वेष्टि। हेघर्मौदीप्तिमंतौजठराद्वक जठराग्निमुक्तौधिष्ठाताद्वेष्टि। हेक्रुवीकांतेद
र्शनौमातरिश्वानौवायूवात्याभ्यंतररूपौअंतरिक्षाधिष्ठातारौयुवांशेषंपूर्वेणव्याख्यातं। यमांगिरसायशस्विनमामघास्मिंजनेकुरु। तंयशस्व
35 हमघास्मिंजनेभूयासमयासयोस्मांन्द्वेष्टि। हेयमौनियामकावंगिरसौस्वर्गाधिष्ठातारौदेवौयुवांशेषंपूर्वतरेणव्याख्यातौ। त्रिष्टुप्‌द्विपदा। अ
ग्नेयोनोअंतिशपतियश्चदूरेसततानोग्नेअरणेदुरस्युः। वैश्वानरेणसयुजासजोषास्तंप्रत्यंचंसदहः जातवेदः। हेअग्नयः शत्रुर्नोस्मान्‌अंतिअं
तिकेशपतियश्चदूरेशपतिहेअग्नेयश्चास्मान्‌प्रतिसमानउदासीनइवारणेप्रीतिर्दुरस्युः। दुरभिसंधिर्वर्तते। हेजातवेदोजातप्रज्ञाग्निलत्स
युक्तेनवैश्वानरेणाग्निनासजोषाः समानप्रीतिःसंनूप्रत्यंचंप्रतिकूलंसर्वंशत्रुंसदहः। यजूंषि। अग्नेयत्तेअर्चिःस्तेनतंप्रत्यर्चयोस्मान्द्वेष्टियं
चवयंद्विष्मः। हेअग्नेतवार्चिर्यदर्चिर्यः प्रकाशः प्रतिकूलोस्तितेनप्रकाशेनास्मद्द्वेष्टारमांन्द्वेष्यंचतंचशत्रुंप्रत्यर्च। प्रकाशस्व। यग्नेयत्तेशो।
चिस्तेनतंप्रतिशोचयोस्मानिस्याद्दि। हेअग्नेतवयच्छोचिशोषणसामर्थ्यंतेनोभयविधंतंशत्रुंप्रतिशोचशोचय। अग्नेयत्तेतपः स्तेनतंप्रति राम
तपयोस्मांन्द्वेष्टीस्याद्दि। हेअग्नेतेतवयत्संतापसामर्थ्यंतेनतंशत्रुंसंतापय। अग्नेयत्तेहरः स्तेनतंप्रतिहरयोस्मानिस्याद्दि। हेअग्नेतवयत्‌ ३५
हरःप्रतितपनंतेनतंशत्रुंप्रतितप। अग्नेरुचांपतेनमस्तेरुचेरुचंमयिधेहि। हेरुचांपतेस्वामिन्नग्नेतस्त्वदीयायैरुचेनमोस्तुताःरुचोमयि

निधेहि। अर्वागसोरितिसायमुपस्थानेव्याख्यातं। गायत्री। तंतुरसिन तो मा विश्थाः। असौ स्वस्तितेस्तु। स्वस्तिवो स्तुयेवामनुस्थाः। हे असौ यज्ञशर्मन् पुत्रं तंतं तुं कुलस्य विस्तारयितासि। नतो मा विश्थाः छिन्नो मा भूः। ते तुभ्यं स्वस्तिस्त्वमस्तु। हे सर्वे पुत्राः ये यूयं मा मनुस्थ म तो जाताः स्तेभ्यो वो युष्मभ्यं स्त्वमस्तु। पर्ण्मो वः रंहसः स्पांतु द्यौश्च पृथिवी चापश्चौषधयश्चोर्क् सूनृता च। द्यौरादयः उर्वैः महत्यः षट् देव्यो मा मां अंहसः पापात् स्पांतु रक्षंतु। ऊर्क् अन्नं सूनृता प्रियसत्यवाक्। इतराः प्रसिद्धाः। यथाह तद्वसवो॰ त्राः। एवो यास्मान्मुंचथ्यं हसः प्राप्तार्यग्नेप्रतरां न आयुः। हे तद्वसवो एवमेवास्मान्यहो विगतपापं यथा भवति तथा स्त्वमुंच। स्त्वष्टुमुक्तान् कुरु। शेषं गणहोमे व्याख्यातं। त्रिष्टुप्। वयः सुपर्णा॰ वद्धान्। प्रियमेधाकां क्षितकर्मफलाः ऋषयो अतींद्रियद्रष्टारो नुष्ठातारः सुपर्णाः। शोभनपक्षाः वयः पक्षिणो भूत्वा इंद्रं ऐश्वर्ययुक्तं मग्निमुपसेदुः। किं कुर्वंतः ध्वांतमस्मदज्ञानमपोर्णुहि अपनय। चक्षुः विज्ञानं पूर्धि पूरय। निध येव बंधन रज्जेवा विध्यया वद्धानस्मादज्ञानान्मुमुग्धि। मोचय येत्तिनाधमानायाचमाना। नादृशो ग्निरस्मान् बंधनान्मोचयत्विति सर्थः। अग्न आयूंषिदधिक्राव्णइतिचदर्शपूर्णमासयोर्व्याख्यातौ। त्रिष्टुप्। आदधिक्राः शवसा॰ वचांसि। दधिक्रामतिप्राप्नोतीतिदधिक्राः दधिप्रियो देवाः। पंचकृष्टीः सहनिषादैः पंचविधान्मनुष्यान्। शवसाग्नेयत्नेन संयोज्य ततान विस्तारितवान्। यथा सूर्यो ज्योतिषा रश्मिभिर्भूसारमादायवर्षणैः सिदृष्टिस्यद्धारा सस्यानुत्पादयतितद्वत्। किंच। सहस्रसं सर्व्यंधनं सः नोददातीति। सहस्रा वाजी अंन्नवान् अर्वा

कृ।कर्मभूमीःगतादृध्निक्कादेवंतुदेवस्यभोजनंभक्तिसाधनंश्रेष्ठंप्रशस्यतमंरत्नधातमंकर्मफलधारयितृतमं।भगस्यैश्वर्यस्यतुरंशीघ्रप्रा
पकंततेजःप्रश्नेमहि।प्रपद्यामहे।धीमहि।सदाध्यायामश्च।गायत्री।अस्यहिस्वयशास्तरंसवितुःकश्चनप्रियंनमिनंतिस्वराज्यं।हि
36 यस्मादस्यसवितुरनुज्ञा। रशीघ्रंकश्चनमपिस्वयशःस्वकीयंतेजोध्यायमानाःयजमानाःप्रियंइष्टंस्वाराज्यमपिनमनंतिन
मन्यंते।अद्यानोदेवस०सुव।हेदेवसवितुरनुज्ञातःअद्यास्मिन्नहनिअस्मभ्यंप्रजावत्प्रजासमृद्धिमत्सौभाग्यंसुश्रीकृतंसावीःअ
नुजानीहि।किंचदुःष्वप्नियंदुःस्वप्नप्रभवंपरासुवनाशय।विश्वानिदेवस०सुव।हेदेवसवितविश्वानिवसूनिदुरितानिपरासुवनाशय।
यभ्द्रंकल्याणंतत्सर्वंमेआसुव।मदीयतेनानुजानीहि।आनागसोअदितयेवयंदेवस्यसवितुःसवे।विश्वावामानिधीमहि।अना
गसोदोषरहिताःवयंसवितुर्देवस्यसवेविश्वाअनुज्ञायविश्वासर्वाणिवामानिवर्णनीयानिवस्तूनिआदितयेअदितेयायधीम
हि।अस्मदीयत्वेनध्यायाम।सहिरत्नानिदाशुषेसुवातिसविताभगः।तंभागंचित्रमीमहे।हियस्माद्भगःसश्रीःसवितादेवोदाशु
षेयजमानायरत्नानिरमणीयानिधनानिसुवातिअनुजानाति।चित्रंअनेकरूपंभागवंतंतदेवाभीमहेप्रार्थुमः।त्रिष्टुप्।वाममद्य। एम
सवितर्वा०स्याम।हेसवितरद्यास्मिन्दिनेस्मभ्यंवामंवननीयसौभाग्यंसावीः।अनुजानीहि।श्वःपरेद्युरपिवामंउवाममेवसावीः।दिवे ३६
अनुदिनंवामंसौभाग्यंसावीः।हेदेवहियस्मात्क्षयस्यसर्वाश्रयभूरेरपारस्यवामस्यवननीयस्यवस्तुनोयाभाविकयाधियाबुद्ध्याव

यंत्वामामभाजः सौभाग्यभाजिनः स्याम। दीक्षातपोमनसो मातरिश्वा बृहस्पतिर्वाचो अग्नाः सयोनिः। वेदांसि विद्यामयि संतिवारुवोग्नी
षोमायशो अस्मासु दत्तं। दीक्षातपादिरूपा तपोदानादिरूपमनसः सयोनिमनसा सहोत्पन्नो मातरिश्वा प्राणः अस्यां अस्याः। वा
चः सयोनिरनया वाचा सहोत्पन्नो बृहस्पतिः वेदांसि वेदाः चारवो वै दिव्यो विद्याश्च मयि संतु। हे अग्नीषोमौ अस्मासु यशो धत्तं।
यजुः। अग्निर्येन विराजति सोमो येन विराजति सूर्यो येन विराजति विराड्येन विराजति तेनाहं विश्वतः स्परि विराज्यासमिहैकहृ
त्। विराट् हिरण्यगर्भः अग्न्यादयो येन तेजसा विविधं राजंति तेन तेजसा महमिहास्मिंल्लोके विश्वतः सर्वतः एकहृत् एक एव परि
विराज्यासम्। अतिशयेन दीप्यामि। अत्र प्रयोगः। प्रातर्हविष्याधिश्रित उन्नीयमाने वाममम्गे वर्चो इति वतस्तोजपित्वा अपापते
एष इस्मा क्राप्रतिपिक्ष्मा अरातय इति त्रिरुक्षा भूमौ त्रिरुदकं प्रतिषिच्यकालायवां अपां मेध्राव दिवोदकमिति हस्तौ प्रक्षाल्याग्नि
यंधातः मायश्वासानय दितिजपित्वा धर्मुष्टा इत्यप आचम्यैंद्रियवतीमित्यास्यं दीर्घं प्राण इति घ्राणमजस्रमिति चक्षुषी सुश्रुता
विति कर्णौ केशा इति केशान् शिरं वेति शिरं वायापथास्थानमिति हृदयं संमृश्य वर्चोसि गोपायतमा उपमलमिति सर्वानग्नीनुप
स्थाय अध्वर्युर्होमितुर्हविती यो हि शत्या गानंतरं स्वयं होमे तु वृष्टिरसीत्यनंतरं आहवनीय नैर्ऋति देशे तिष्ठन् धर्मीजठराः कवीमात
रिश्वा० यमांगिरसायश० अग्नेयानः० अग्नेयत्तेवर्चः अग्नेयत्तेशोचिः अग्नेयत्तेतपः अग्नेयत्तेहरः अग्नेयत्तेतेजः अग्नेर्ऋचां। अर्वा

ग्वसो रिनित्रिः तंतुरसित नो मा त्विष्या इत्युक्त्वा सा वितिस्थाने संबुध्यं तं पुत्रनाम निर्दिशं नृप्रतिमंत्रं त्रिस्त्रिरुक्त्वा स्वस्ति वो स्तु प्राणो मोनः यथा
हततूवयः सुपर्णा अग्न आयूंषि पिदधिक्त्वा वृण आदधिक्त्वा ममाग्न इति वतत्सः अग्नीषोमाविमं तत्सवितुर्वृणीमहे अस्य दिसयशः
अद्या नः विश्वानि देव सवितः अनागसो अदितये सहिरत्नानि वाममद्य सवितः दीक्षा तपः अग्निर्येन विराजती सुपस्थाय स्वयमग्नेः
37 परिस्तरणतृणान्यपनयंतु अर्वांतरेण जपादिकामुत्तरामाहुती मुपोत्थाय दिव स्परीत्यनुवाकेनोपतिष्ठते। यदि वाश्वसूक्तेन सामो
पतिष्ठेत। अपि वा आगावो अग्मन्नितित्यनुवाकशेषेणोपतिष्ठेत। अथवा यदक्रंद इत्यनुवाकत्रयेणोपतिष्ठेत। विनायोपस्थानमग्नि
होत्रमेव जुहुयात् नापि वाग्निहोत्रं जुहुयात्। इत्थं प्रातरुपस्थाय मंत्रव्याख्यासुगंधिभिः। सूक्तिप्रसूनैः पुष्णातु पुमर्थानू पुरुषोत्त
मः॥ ॥इत्यापस्तंबीयाध्वरतंत्रसतंत्रव्याख्यायां प्रयोगरत्नमालायां षष्ठे प्रश्ने षष्ठः पटलः॥ ॥प्रवत्स्यंतं संप्रेष्यत्यग्नीत्समा
धेहीति। ग्रामांतरे वान्यत्र वा वासः प्रवासः। तं करिष्यंतं अग्नीन् समादेहीति विहृत्य प्रज्वलयेति अग्निहोतारं परिकर्मिणं वा संप्रेष्य
ति। स्पष्टार्थो मंत्रः। ज्वलतोपतिष्ठते मंत्रं। पशून्मे आगमदित्याहवनीयं प्रजां नो आगमदिति गार्हपत्यं अन्नं नो आगमदित्यन्वाहा राम
र्यपचनं उपतिष्ठत इत्यनुषंगः। सौत्रो विराजः। पशून्नः शंस्यपाहि तं नो गोपाय अस्माकं पुनरागमतु। हे शंस्य स्तोतव्याहवनीयाग्ने नो ३०
स्मदीयान्पशून्याहि पुष्ट्यादिना पालय। अस्माकं पुनरागमदस्मत्पुनरागमनपर्यंतं नोस्मान्पशून् गोपाय व्याधिचोरादिभ्यो रक्ष।

प्रजां नो नर्यपाहि तां नो गोपायेत्यादि। अं नं नो बुध्न्यपाहि तं न्नो गोपायेत्यादि। प्रजां पुत्रादिरूपां। नर्यं नृषु वर्तमान गार्हपत्याग्ने तान् प्रजां अग्ने
प्रसिद्धं। बुध्न्य धिष्ण्यान्तादक्षिणाग्ने तदं न्नं शेषं पूर्वेणाव्याख्यातं। अंतराग्नी तिष्ठंजपति इमां न्नो आगमदिति। अग्नि गार्हपत्याहवनीयो इमां
न्नो आगमतां पंक्तिः। इमां न्नो मित्रावरुणा गृहान् गोपायतं युवं। अविनष्टान विह्रुतान् पूषैनानभिरक्षतस्माकं पुनरागमत्। हे मित्रावरु
णौ युवां नोस्मदीयानिमान् गृहान् गोपायत रक्षतं। किंच पूषा पोषको देवः पुनरस्मदागमनपर्यंतं एतान् गृहान विनष्टानं नपह्रुतानृ
ताभिरक्षतु। पूर्ववद्विराट्क्रमेरुपस्थायासित्वा प्रवसथमेष्यं न्नाहाग्नीन् समाधेहीति पूर्ववदग्न्याधेयवद्विराट्क्रमेरुपस्थाने कृते अशि
त्वा गमनकाले अग्नीन् पुनरपि अग्नीन् समाधेहीत्याहयद्यसित्वा गच्छति। अनशित्वागमने तु न पुनः समाधानं। उपस्थानमेव तत्रो
नरकार्यमविच्छेदात्। आगतोपस्थाने तथा दर्शनाच्च। अशनं पुनः समाधापनं पुनरुपस्थानमिति त्रयमपि नित्यमेवेत्यपरे। पुनः समा
धाने विहृतानामेव ज्वलनं न पुनर्विहरणं मेककर्म्यात्। विराट्क्रमाः अग्न्याधेयाः संप्रत्यत्रैव व्याख्याताः। ज्वलत उपतिष्ठते। प्रजां मेत्रा
गमदिति गार्हपत्यं अन्नं मे आगमदित्यन्वाहार्यपचनं पशून्मे आगमदित्याहवनीयं। व्यक्तं। मंत्रस्तूक्तार्थाः। पूर्वमंत्रे। अयमत्र विशेषः।
न इति पदस्थाने मे पदमिति। मम नाम प्रथमं जातवेद इति च। आनंतर्यादाहवनीयमुपतिष्ठत इत्यन्वयः। अग्निस्त्रिष्टुप्। मम नाम प्र
थमं जातवेदः० आपग्ने। हे जातवेदो जातप्रज्ञाग्ने अग्ने जन्मकाले मम पिता व उपाध्यायादिना अतः प्रथमं पूर्वं यद्देवदत्तादिकं नामदध

तुश्चक्रतुः तंन्त्वामपुनरामदेवोः आमदीयपुनरागमनातूधारय अहमपितवनामधारयामि। त्वमत्र कर्त्यंपरिहरंनूमदीयेना कुरु।
ममतुत्वंन्त्वामधारिणोगंतव्यदेशो कैवल्यमेवसंभवती त्यर्थः। वाग्यतो भिप्रव्रजति माप्रगामवहूनूकृधीति मंत्रांते विहारंन्निर्गच्छति। वाम
देवः गायत्री। माप्रगामपथोवयंमायज्ञादिंद्रसोमिनः। मांतस्थुर्नोअरातयः। हे इंद्र सोमिंन्नग्ने प्रवसंतोवयंपथोमार्गात् प्रच्युताः प्र
38 भ्रष्टाः मागच्छेम। सोमिनः सोमवतो यज्ञो दिविप्रच्युताः मागच्छेम। अंतरायः शत्रवो नोस्माकं अंतंमातस्थुः। मातिष्ठेयुः। अनुष्टुप्। उ
दस्माँ उत्तराग्ने घृतेनाहुत। रायस्पोषेण संँसृज प्रजयाच बहून्कृधि। घृतेनाहुत हे समिद्धाग्ने अस्मानुत्तरानुन्नयस्व सर्वोत्कृष्टान्कुरु॥
धनपुष्ट्या संयोजय। प्रजयापत्यपरंपरया बहून्कुरु। आरादग्निभ्यो वाचंविसृजते। आराद्दूराद्दागच्छंनु निर्गच्छेदिति यावत्। तथोत्तरत्र
मंत्रंभविष्यति। प्रवसनकाले विहाराभिमुखोग्न्युपस्थानंजपति। प्रवसंन्नग्निहोत्रकाले यत्र विहारस्तां दिशमभिवीक्षमाणः सर्वाना
ग्न्युपस्थानाधिकारविहितान्मंत्रान् जपतीत्यर्थः। तथाचाग्न्युपस्थानांते भरद्वाजः। एवंविहितमेवास्य प्रवसतोप्यग्न्युपस्थानंभवति। ए राम
तावंन्त्वानायानिसंस्पृश्य कर्माण्यध्वर्युः स्वानिकुर्यात्। यजमानः काले तां दिशमभिमुखो मंत्रान्। जपेदिति। इहैव संन्। उपतिष्ठत इ ३९
तिष्ठेयघनुपस्थाय प्रवसेदेनमेषोपतिष्ठेत। अद्यैवागमिष्यामीति बुध्वा राजपुरुषनिर्बंधादिना यदानुपस्थाय चेत्प्रवसेत् तदा तत्र
स्थ एव एतयैवाग्नीनुपतिष्ठेत। एतयेत्येवंमंत्रमुक्त्वा भक्षयेदित्यादि वेदिव्यार्थः। एवकारः सर्वैतत्तन्मंत्रव्यावृत्त्यर्थः। पूर्वेण सहैकग्रंथमे

केयोजयंति। प्रवसन् काले विहाराभिमुख इहैव संन्निस्येतदग्न्युपस्थानं जपति। अनुपस्थाय प्रोषितोप्येतत्प्रवासोपस्थानं कुर्यादिति बौ
धायनस्त्वाह। अथेदं परोक्षोपस्थानं भवतीहैव संन्निस्ला दि। अग्निस्त्रिष्टुप्। इहैव संतत्र सतो वो अग्नयः प्राणेन वाचा मनसा बिभर्मि।
तिरो मा सन्तमायुर्मा प्रहासीज्ज्योतिषा वो वैश्वानरेणोपतिष्ठे। हे अग्नयः इहैव देशे सन् अहं तत्र गृहविशेषे सतो वर्तमानान् युष्मान् प्रा
णेन वाचा मनसा बिभर्मि धारयामि॰ देशान्तरस्थस्यापि मम प्राणाद्याह विद्विषयादूरदेशवर्तित्वेन तिरोभूतं सन्तमवस्थितं मा मायुर्मा प्र
हासीत्। मा परित्यजतु। वैश्वानरेण सर्वमनुष्यहितेन ज्योतिषा युक्तान्वो युष्मानुपतिष्ठते। यत्र तत्र स्थितोप्यहं सेवे। समिधः कृत्वा प्रत्येति।
यथा ह वा इतं पितरं प्रोषितवासं पुत्राः प्रत्याधावंत्येवं ह वा एतमग्नयः प्रत्याधावंति स शाकलादारूणि वाहरंन्नेति पथैव तत्पुत्रेभ्य आ
हरंन्नेति ताहकृतदिति विज्ञायते। प्रोषितवासं प्रोषितवंतं इतं पुनरागतं स यजमानः शाकलान् भिन्नानि काष्ठानि दारूणि तान्येवाभि
न्नानि यथैव तत्पुत्रेभ्य आहरंन्। यथा तत्र पिता पुत्रेभ्यः फलान्याहरंन्नित्यर्थः। अर्थवाद प्रदर्शनं आदरार्थं। आरादग्निभ्यो वाचं
यच्छति। पूर्वव्याख्या। यद्येनं राजा पिताचार्यो वान्तरेणाग्नी स्यादकृद्दिर्दर्शनेनेन माद्रियेत। किं पुनरन्यान्। एवमत्र कृद्दिर्दर्श्येवाग्यम
नियमात् गमनदशायां वाग्विसर्गो थकृद्दिर्दर्श इत्यनुसंधातव्या॰ विश्वादानीदया सजेत्यग्न्येति। अभ्यागच्छत्यग्न्यगारं। विश्वदानी
मित्यत्रैव व्याख्याता। वामदेवो अनुष्टुप्। नमस्ते अस्तु मीढुषे नमस्त उपसद्वने। अग्ने शुंभस्व तन्वः संम्मारय्या सृज॰ हे अग्ने मीढुषे व

षयितृतमाय उपसमनेसदासंन्निहितायतुभ्यंन्नमोस्तु। तन्वः त्वदीयामदीयावातनूः श्रुंभस्वशोभय। मांचधनेनसंयोजय। अग्नीन्स
माधेहेतिसंप्रैष्यशेषः व्याख्यातो मंत्रः। ज्वलन्तउपतिष्ठते ऋक्। पश्वूंन्नः देहीत्याहवनीयमभिप्राण्य अग्नेसहस्राक्ष भूयास्मेत्या
हवनीयं। अभिप्राणमुपर्युच्छ्वासः उपतिष्ठत इत्यनुषंगः। वामदेवो यजूः पशूंन्नः शंस्या जूगुपः स्तान्नः पुनर्देहि। हे शंस्य स्तोव
३९ व्याहवनीय अस्मदीयान्पशून्त्वमजूगुपः। पोषितवान्। तानस्मभ्यंपुनर्देहि। अग्नेसहस्राक्षश॰ रायईशिषे तस्मैसहस्र।
धारस्यपयसस्तस्यनोरास्वतस्यतेभक्षीयतस्यतेवयंभूयिष्ठभाजोभूयास्म। हे अग्ने विराड्रूपत्वेन सहस्राक्षशतमूर्धन्त्वदीयाः प्रा
णाः शतमपरिमिताः। अपानाः सहस्रसंख्याः त्वंचसहस्रसंघस्यधनस्यैशिषे ददासि। तथाग्नियोनिलादपामनुप्रवाहस्यपय
सश्चैसितासि। तस्यनोरास्वतद्धनमस्मभ्यंधेहि। तस्यतेभक्षीयत्व यंतत्वयाभक्षीमहि। किंचवयंतेत्वदीयस्यधनाश्चेग्नेभूयि
ष्ठभागिनोभूयास्म। प्रजांन्नः देहीतिगार्हपत्यमभिप्राण्याग्नेगृहपतइतिगार्हपत्यं ऋक्। यजूः प्रजांन्नोनर्याजूगुपः स्तान्नः पुनर्देहि राम
।पूर्वेणव्याख्यातं। अग्नेगृहपतइत्यादिशतंहिमावायूराधांसीत्संपृचानावसंपृचानौतन्वः। हेगृहपतेअग्नेत्वंवायूश्चराधांसीत्वांसं ३९
पृचानोधनान्येवसंयोजयन्तौतन्वः स्तनूः शरीराण्यसंपृचानौ असंकोवयंतौरक्षतामित्यर्थः। शेषंदर्शपूर्णिमासयोर्व्याख्यातं। अ
न्नंनः देहीत्यन्वाहार्यपचनमभिप्राण्यान्तराग्नीतिष्ठं जपति। यथाप्रवत्तदुपस्थानेतदेतत्। इमंमेवरुणेतिजपत्वति। यजूः। अन्नंनो

बुध्याजूगुपः त्वं नः पुनर्देहि। निगदव्याख्यातं। अजूगुपतमभ्यराक्षीदिति मंत्र ॥ संनमति। अन्नतिमां नो वरुणेति मंत्रेण गोपायतमभिरक्षतमिति प
दद्वयं अजूगुपतमभ्यराक्षीदिति विपरिणमति। मंत्रस्त्वत्रैव व्याख्यातः। ममनामप्रथमं जातवेदो॰ पुनस्त्वे। हे जातवेदः मम देवदत्तादीनां तव वृत्रा
दीनामित्येवं येनामनी विपरिवृत्तान्योन्यं वाससी विपर्ययेनाव सानाविवेदानीं आवांचरावः इत्त ऊर्ध्वं तेन मनी त्वं चाहं च पुनरतियथायथं
त्वदीयं वृत्राद्रिनाम तवैव मदीयं देवदत्तादिनाम ममैव यथा भवति तथा विपरिवृत्त्यापरिदधावहै। एवं सत्यायुरभिवृध्येद्विर्धनादि संपत्साप्र
शस्तजीवनं च भवति। त्रिष्टुप्। नमोग्नये प्रतिविद्धाय नमो॰जे। अषा॰ गंधर्वः। अप्रतिविद्धाय केनचिदताडिताय अनाधृष्टाय केनाप्यति
रस्कृताय सम्राजे संभृतदीप्तये अग्नये नमोस्तु। स चायमग्निरषाढः शत्रूणां सोढुमशक्यः वृहद्वयाः अपरिमितान्नः विश्वजित्सर्वस्य जेतास
सहंत्यः स्वयं सहिष्णुः श्रेष्ठो गंधर्वः संगीतकलाविद्यास्वतिकुशलः। अनुष्टुप्। त्वं पितारो अग्ने दे॰ माधाः। त्वमेव पितापालको येषां देवानां
ते त्वं पितारः। त्वां प्राप्ताः आहुतयो येषां देवानां ते त्वामाहुतयः। त्वयि हुताः सन्तो देवान् तर्पयंतीत्यर्थः। त्वमेव विशेषेण वाचनप्रख्यापयिता
येषां तेन द्विवाचनाः। हे अग्ने मां दीर्घायुषा संधाः संयोजय। गौपत्येन गोस्वामित्वेन संयोजय। सुहिते सुष्ठु हिते पुरुषार्थे माधाः मास्थापय।
अयमग्निः श्रेष्ठतमो यं॰ र्थं। अयमग्निराहवनीयः श्रेष्ठतमः। श्रेष्ठानां मध्ये अतिशयेन श्रेष्ठः भगवत्तमः भगवतामैश्वर्यवतां मध्ये अति
शयेन भगवान् स भगवत्तमः। सहस्रसंख्याकस्य दातॄणां मध्ये अतिशयेन दाता। तादृशस्याग्नेः प्रसादात् अस्मै यजमानाय सुवीर्यं शोभनं।

सामर्थ्यमस्तु। प्रजां मे देहीति गार्हपत्यमभ्युपान्य अंन्नं मे देहीत्यन्वाहार्यपचनमभ्युपान्य पशून्मे देहीत्याहवनीयमभ्युपान्य पूर्ववद्विराट्क्र
मैरुपतिष्ठते। अगूपइति मंत्रं संन्नमति। अभ्युपानमग्नेरुपरिनिरुच्छ्वासः। विराट्क्रमेषु गोपायेत्यस्याः जूगुपइति संन्नामः। प्रजां मे नर्ये
त्यादयस्त्रयो निगदमारभ्याताः। विराट्क्रमस्ताधाने। अग्न्युपस्थानवदत्र समिधो दिशां चोपस्थानं। अस्मिन्काले ग्न्युपसमिस्थानवद्दिं
धानास्तेत्यादिभिः समिध आदध्यात्। प्राची दिगित्यादिभिर्दिशश्चोपतिष्ठते। मंत्रास्तत्रैव व्याख्याताः। नवमी चेदतिप्रवसे मित्रो जनान्या
तयतिप्रजानन्नितिभिश्चोपस्थायमनो ज्योतिर्जुषतामित्याहुतिं जुहुयात्। अध्वर्युरिति शेषः। जुहोतिचोदनत्वात्तदंगत्वाच्चोपस्थानस्य। त
था मनो ज्योतिर्जुषतामित्यध्वर्युराहुतिं जुहोतीत्येवमस्यापाठः। भारद्वाजस्त्वाह। प्रोषित आहुतिं जुहोतीति। तथा तत्रासेमेष्टिं विधायाह।
सैषा संवत्सरमतिप्रवसत इति। विश्वेदेवास्त्रिष्टुप्। मित्रो जनान्यातयति प्रजानन्। द्विधेम। मित्रो देवः प्रजानन्प्राणिनां कर्मपाकं विद्वान्
सर्वान्नृपानकनिवृत्तौ यत्नवतः करोति। तथा पृथिवीं द्यामपि दाधार। समित्रः कृष्टीः मनुष्याननिमिषा आलस्यरहितानभिचष्टे। रक्षाप राम
यति। बोधयतीति किमितिहे मनुष्याः सत्याया वितथा कर्मफलाय घृतवयुक्तं हव्यं देवेभ्यो विदधेम हीति। अग्निरग्निष्टुप्। मनो ज्योतिरित्यादि ४०
याइष्टाउ०घ्नेन। या उषसः प्रातःकालोपलक्षिताः आहुतयः याश्च निम्रुचः अस्तकालोपलक्षिता आहुतयः इष्टाः यथा कथंचिद्धुताः ताः
सर्वा अनेन भृतेन हविष्या संदधामि। अविच्छिन्नाः करोमि। शेषं दर्शपूर्णमासयोर्व्याख्यातं। समिध आहुतिमुपस्थानमित्येवमनुपूर्वाण्ये

केसमामनंति। समिदाधानाद्युपस्थानयोर्मध्यमनुमत्याहुतिरिति शेषः। समानमन्यत्समिदाधानानंतरं मनुमत्याहुतिः सैनतो मेथ्योपस्था
नंततो द्विगुपस्थानमित्यन्ये। तदाहुनीग्नी रूपस्थेयः। के हि श्रेयां संउधुप्तं नोधयिष्यती अभयं मे अस्तिति त्येव प्रतिब्रूयात्। प्रवत्स्यदुपस्था
नमागतोपस्थानं चाधिकृत्य वाजसनेयिनः समामनंति। तत्राहुः ब्रह्मवादिनः नैनमग्निंसा दिनाविधिनाग्निरुपस्थेयः को हि श्रेयां
संसृप्तं वोमध्ये वोधयितुमर्हतीति तस्मादप्रा विष्कृतमेवाग्निं प्रति अभयंकरे त्येवं मंत्रमेव ब्रूयादित्यध्याहार्यः। प्रवत्स्यदागतोपस्थाने उ
भेअप्यधिकृत्य वाजसनेयिनः समामनंती त्यर्थः। तथा चाह सत्याषाढः। कः श्रेयासं विपुप्तं वोधयती त्यप्रादुष्कृत्यानामेवागतोपस्थानं
स्यादभयंकरेत्यादि। सत्यागतोपस्थाने मंत्रसंन्नामं च दर्शितवान्। यथाऽभयंकराभयंमे काषीदिति। तत्रचोपस्थानमधिकृत्ये तिवचना
दुपस्थानादन्येगमनप्रत्यागमनधर्मावाग्यताभिप्रजजनसमिदाहरणादयः स्तत्र तत्र भवंत्येव। नवरात्रिप्रवासे तु मनस्वत्याहुतिरागा
मी विहरणकाले भवति। प्रादुष्करणप्रतिषेधात्। सौत्रं यजुः। अभयंकराअभयंमे कुरु। स्वस्तिमेस्त्व भयंमे अस्तु हे। अभयंकर गार्हपत्या
ग्ने मह्यं प्रवासिने अभयं कुरु। सदा मह्यं मंगलमभयं चास्तु। नमो वोस्तु प्रवत्स्यामीति। वह्न्युचास्तु द्व्योः प्रवत्स्यदागतोपस्थाने योः हवि
मौ मंत्रौ समामनंति समानमित्तरस्सूत्रेण। त्रिष्वपि चैतेषु कल्पेषु प्रवत्स्यदागतोपस्थानयोः सहशिष्टत्वाद्य एव कल्पः प्रवत्स्यदाग्नितः एवा
गमैतयाश्रपत्नीयद्दन्नुसंधातव्यं। सौत्रेयजुषी। नमो वोस्तु प्रवत्स्यामि। हे अग्नयो युष्मभ्यं नमो वो स्तु। अहं प्रवत्स्यामि। स्वस्तिमेस्त्वित्यर्थः।

नमोवोस्तुप्रवत्स्यामीतिनिगदव्याख्यातं। गृहामा॰ गृहेघनइतिगृहातभ्येतिअग्न्यगारातूगृहानूप्रतिगच्छति। यत्रपुत्रदाराः प्रवसंति। सोत्राः
पंक्तीः। गृहामाविभीतमामेपिद्धंमूर्जंविभ्रतएमसि। ऊर्जंविभ्रद्वसुमनाः सुमेधागृहानैमिमनसामोदमानः। हेगृहाः यूयंमाविभीतमाच
कंपत्त। युष्मानूर्जमंन्नंविभ्रतएवाहंएनसिप्राप्नोमिप्राप्तिरेवप्रपंचाते। ऊर्जंधारयंनूवसुमनः शोभनमेधांमनसामोदमानश्चगृहानूप्रा
प्नोती। स्यर्थः। अनुष्टुभः। एषामध्येतिप्रवसंन्येषुसौमनसोवहु। गृहानुपह्वयामहेतेनोजानतुजानतः। प्रवसंनूयजमानोयानूगृहानूअ।
ध्येतिएषुचगृहेषुसौमनस्यवानूवहुरभिवृद्धिमांश्चवर्त्तते। तानूगृहानूवयमुपह्वयामहेसामीप्येनाह्वयामहे। केचगृहाः एवंजानानस्मानू
स्वकीयत्वेनजानतु। उपहूताभूरिधनाः सखायः स्वादुसंमुदः अरिष्टाः सर्वपूरुषागृहानः संतुसर्वदा। एवमस्माभिरुपहूतागृहान्नो स्मा
कंसर्वदावहुधनासखीवदनुकूलाः स्वादुपदार्थवत्वेनसंमोदहेतवोअदुखदाः संतु। पुत्रभृत्यादिसर्वपुरुषयुक्ताश्चसंतु। उपहूताइहगा
वउपहूताअजावयः। अत्तोन्नस्यकीलालउपहूतागृहेषुनः। इहास्मदीयेषुगृहेषुगावउपहूतावर्त्तंतां। तथाअजावयश्चवर्त्ततां। अथो। राम
न्नस्यकीलालः सारश्चोपहूतोवर्त्ततां। क्षमावयः शंयोरितिप्रविशतिअर्कं। सोत्रंयजुः। क्षेमायवः शांत्यैप्रपद्येशिवꣳशग्मंꣳशंय्योः शंय्योः। ४१
हेगृहाः युष्मानहंप्राप्तः परिरक्षणार्थमनिष्टनिवारणार्थंचप्राप्नोमि। ततोमेशिवंयंगलंशर्म्मंशक्तिवलंसयोगश्चास्तु। अभ्यासआदरार्थः।
ऊर्जंविभ्रत्संविशामीतिप्रविश्यजपतिसंविशंन्वाप्रविष्टमात्रोजपति। गृहानागामीतिलिंगात्। संविशंन्विषीदंवासुमनाः संविशामीति

लिंगात् भावः। सत्याषाढस्तत्राह। न तद्रागतः कल्हं करोतीति। सौत्रस्त्रिष्टुप्। ऊर्जं बिभ्रद्वसुमनाः सुमेधा गृहानागां मनसा मोदमानः सुवर्चाः।
इरां वहतो॰ शामि। हे गृहाः वो युष्मदर्थे अन्नं धारयंतं नू सौमनस्यवान् मनसा मोदमानश्चाहं गृहान् प्राप्तवानस्मि। ये गृहाः इरामन्नमस्म
दर्थं वहं तो घृतमुक्षमाणाः घृतसिक्ताश्च वर्तंते तेषु गृहेष्वहं सौमनस्यवाननुपविशामि। एवं केवलस्य यजमानस्य प्रयाणमुक्तं। अथ सप
त्नीकस्य वक्ष्यते। पत्न्यास्तु केवलायाः प्रवासो नेष्टः। पत्नीवदस्याग्निहोत्रं भवतीति वचनात्। यदि यजमानः प्रवसेदित्यादिवत् प्रयाणानु
ज्ञानुपलंभाच्च। किमिदानीं दैवात्प्रवासं भवेद्लुप्यते वाग्निहोत्रं कएवमाह। किंतु गणस्तु लुप्यते कर्मगतात्। पत्न्या मदर्शितं चैतत्। अस्मा
भिर्दर्शपूर्णमासयोर्यो वा कश्चिद्विद्यमानाया मित्यत्रमनुनासूचितो यमर्थः। यद्विनापि पत्न्या कदाचित् कदाचिदग्नयो भवंति यथा यथा
तिथिमधिकृत्योक्तं। उपस्थितं गृहे विद्याद्भार्यायत्राग्नयो पिताइ इति। यदा तु विनाग्निभिः सहोभौ प्रवसतः पत्नीयजमानश्च तदाग्निहोत्रलो
पः पुनराधानं वस्मर्यते। यथाछंदोगपरिशिष्टे कात्यायनः। असमक्षं तु दंपत्योर्होतव्यं नत्विगादिना। द्वयोरप्यसमक्षं तु हुतमप्यहुतं भवे
त्। दिति। तथा विहायाग्नीन् सभार्यश्चेत्सीमामुल्लंघ्य गच्छति। होमकालात्ययेतस्य पुनराधानमिष्यत इति च। यानि तत्र गंधर्ववाक्यानि प
त्न्याः प्रवासेतद्दितरेण पुनराधानं कार्यमित्येवं जातीयकानितानि तेषां माकाशगतितादुपेक्षणीयानि। अत्र प्रयोगः॥ प्रवसंन् यजमा
नोग्नीन् समाधेहीति परिकर्मिणमग्निहोतारं वा संप्रेष्यते नैव विहृत्य प्रवलीकृतेष्वग्निषुपश्भून्नः शंस्येत्याहवनीयं प्रजां नो नयेति गार्हप

समंन्नंनोबुध्येत्यन्वाहार्यपचनमुपस्थायगार्हपत्याहवनीययोरंतरातिष्ठंनूइमांनोमित्रावरुणेतिजपित्वार्यर्वमित्यन्वाहार्यपचनंनर्य
प्रजामितिगार्हपत्यंशंस्यपशूनित्याहवनीयं।सभ्यसभामितिसभ्यं।अहेबुध्नियमित्यावसथ्यं।सोत्रपाठेनब्राह्मणपाठेनचोपचस्थाय
पंचधाग्नीनितिसर्वानग्नीनुपस्थायाप्यासिलावानव्याग्नीनुसमाधेहीतिपूर्ववत्संप्रेष्यते।नप्रवल्हीकृतेष्वग्निषुयद्वासिनसंप्रेषोविनाप्र
42 कृप्रवल्हेष्वग्निषुप्रजांमय्येतिगार्हपत्यमन्नंमेबुध्येत्यन्वाहार्यपचनप्रपशून्मेशंस्येतिममनामप्रथममित्याहवनीयमुपस्थायवाग्य
तोमाप्रगामेविद्याम्यांनिर्गत्यगच्छनूअच्छिद्रिर्दर्शेवाचंविसृजेदच्छेवआगमिष्यामीतिराजपुरुषादिप्युद्याद्वाग्निमुपस्थानादिकंम
कृत्वाप्रवसेत्तद्राइहैवसन्नितितत्रस्थएवसर्वानग्नीनुपतिष्ठेत॥अथवेशांतरेवसन्अग्निहोत्रकालेग्न्यायतनाभिमुखोयथापूर्वम
ग्न्युपस्थानंजपति।यद्वाइहैवसन्निस्येवजपति।अथप्रत्यागच्छन्नुसमिधःकाष्ठानिवाकाष्ठशकलान्वादायाच्छिद्रिर्दर्शेतूवाग्यतआचा
र्यपितृराजादीनपिअंतरागतानानाद्रीयमाणोग्निसमीपंगत्वाकृतपादशौचावमनोविश्वदानीमाभरंतनमस्तेस्त्विस्यंतिवाग्यगा
रंप्रविश्यपाग्नीन्समाधेहीतिसंप्रेष्यतेनविहृत्यप्रवल्हीकृतेष्वग्निषुपशून्मःशंस्याजुगुपइत्याहवनीयमभिप्राण्याग्नेसहस्राक्षभूया राम
स्मेत्युपस्थायप्रजांन्नोनर्यजुगुपइतिगार्हपत्यमहिप्राण्याग्नेगृहपतेतन्वइत्युपस्थायान्ननोबुध्याजुगुपइत्यन्वाहार्यपचनमभि ४२
प्राण्यांतराग्नीतिष्ठन्निमान्नोमित्रावरुणेत्यजुगूपतमम्पराक्षिरितिसन्त्रमध्यजपतिममनामतववेतिवतसृभिराहवनीयमुपस्थाय

प्रजां मे नर्य जुगूपइति गार्हपत्यं। अन्नं मे बुध्न्या जुगूपइत्यन्वाहार्यपचनं पशून्मे शंस्या जुगूपइत्याहवनीयमभ्युपान्यापवर्गयितुं मे जुगूप
इत्यन्वाहार्यपचनं नर्य प्रजा मे जुगूपइति गार्हपत्यं शंस्य पशून्मे जुगूप इत्याहवनीयं सप्रथ सभामि सभ्यं महे बुध्न्येत्यावसथ्यं। सौत्र
ब्राह्मणान्यतरपाठेनोपस्थायपचधाग्नीनिति सर्वानुपस्थायेधानास्त्विति अग्नेः समित्सोमस्य समिदसीति यमस्य समिदसी
ति चतुर्भिर्यथाधानमेकैकाग्नौ चतस्रः समिध आधाय प्राचीदिगिति षड्भिर्यथालिंगं दिशो पस्थाय गृहा मा बिभीतेति चतसृभिरा
ग्त्यगाराद्गृहा नभ्येमक्षरमायवइति प्रविश्य ऊर्जं बिभ्रदिति जपेदुपविश्यन्वेस्येतदानवरात्रप्रवासेष्य यदि नवमीमतिप्रवसेत् पूर्ववद्दिश उ
पस्थाय मित्रो जनान्यातयति प्रजाननिति मैत्रियोपस्थाय मनो ज्योतिरित्यध्वर्युणा ते मनसे ज्योतिष इदं न ममेति ब्रूयाद्यद्वा वा दिश उप
स्थाय मनो ज्योतिरित्याहुतीः सप्तां मैत्रियोपस्थानमपि वा समिध आधाय मनो ज्योतिरित्याहुतीः सप्तां मैत्रियोपस्थाय दिश उपस्था
य गृहा मा बिभीतेत्यादि यथापूर्वं कुर्यादिति॥ अपि वा संप्रेष्याग्निविहारादिकं विनासित्वान सिता वा प्रवत्स्यन्नभयंकरे स्थे वोपस्थाय यथ
थापूर्वं वाग्यमनादि पुनरग्न्यगारप्रवेशान्तं कृत्वा विना संप्रेमे विहरणादिकमभयंकरे स्थे वोपस्थाय गृहा मा बिभीतेत्यादि यथापूर्वं का
र्य। अथाहि प्रवासे होमकाले विहृत्य मैत्रियोपस्थाय मनो ज्योतिरित्याहुतिं जुहुयात्॥ अथवाभयंकरेति स्थाने नमो वो अस्तु प्रव॥
त्स्यामीति प्रवत्स्यन्नमो वोस्तु प्रावात्स्यमित्यागत उपतिष्ठेत समानमन्यत्समानं तन्त्रेणेति। प्रवत्स्यदागतोपस्थानानां तन्त्रमारभ्यासुगं

थिभिः॥ सूक्तिप्रसूनैः पुष्पातुपुमर्थान्पुरुषोत्तमः॥ ॥ इत्यापस्तंबीयाध्वरतंत्रस्वतंत्रव्याख्यायां प्रयोगरत्नमालायां षष्ठे प्रश्ने सप्तमः पटलः
॥ ॥ सगृहः प्रयास्यन् वास्तोष्पतीयं जुहोति। सदाराः प्रवत्स्यन् प्रवासगमिष्यन् वास्तोष्पतीयं वास्तोष्पते स्वाहैव संहोमं जुहोति। अहुतेया
43 नेषु भांडान्यारोपयंति। भांडानिकुटुंबोपयोग्येषु भांडशब्दः प्रसिद्धः। तो हुत एव वास्तोष्पतीयं यानेषु शकटेष्वारोपयंति कूर्मकराः याने
तु मिष्यंतइतिभावः। यथार्हतो सत्याषाढः। सर्वभांडयानेष्वादधातियान्या जिगीषंति तिन हीनमन्याहरेयुः। यत्तत्र हीनं महेत्तेनारोपि
तं तद्धोमात्परं नान्याहरेयुः। हीयते वपितुं न तु हीयत इत्यर्थः। यद्य नो वान्यं स्यात् पूर्वतं प्रहेयुरयो वोद्धरेयुः। अपययद्य नो भिरवान्यमाडंनेतव्यं
स्यात्॥ तमर्थयानेष्वारोप्यपूर्वहोमाद्धंतव्यदेशं प्रतिपुरुषा वहेयुः। अपहरेयुर्वा देशांतरगमयिता तत्रावस्थापयेयुः। पश्चात्तस्थाप
यितुमित्यर्थः। अथापरम्यारव्या। तत्रारोपितेषु मध्ये यद्दिपुरुषादिभिर्दुर्वहं॥ अनसेववा ह्यं भाडं स्यात् तमर्थपूर्वमेव प्रवहेयुः। अनसान
येयुः। अपोवोद्धरेयुर्वा यदनो वान्यादन्यत् पुरुषादेरशक्यमेनं न पर्वषु रूपाः सह नयेयुरिति। यत्र संहिता रात्रिर्वसेत्सं च सप्तनवदशवा राम
तत्र प्रयास्यं जुहुयात्॥ यत्र वास्तुनि वास्तं न वासेन व्यपेतसंहिता चरपंचोपररात्रिर्वसेत स्माद्वास्तुतः। प्रयास्यन् प्रथ्यप्रभृतिं जुहुयात्॥ ४३
न ततो र्वाग्वास इत्यर्थः। एवं सत्तापर रात्रिवासे ष्टमाप्रभृतीत्यादिद्रष्टव्यं॥ नवरात्रिवास्तो वा पुनरेत्यैकामुषिता प्रयास्यं जुहुर्यात्। यस्तु
कुचिद्वास्तुनि नवरात्रमुषिता ततोन्यत्र मछन् दशरात्रपक्षाश्रयणेनाहुत वास्तोष्पतीयेयो गता पुनरपि तस्मिन्नेव नवरात्रवास्तुन्या

गस्यैकां परां रात्रिमुषित्वा ततस्तस्मात् प्रयास्यन्भवति सोऽपि जुहुयाद्देववास्तोष्पतीयं। दशरात्रोषितत्वात्तत्रेति भावः। पूर्वत्र संहिता इति वचनाद
प्राप्तो होम इत्यारंभः। केचित्तु प्रदर्शनार्थमेतद्दिष्ठापंचापारादिकल्पेष्वपि च नूरात्रादिवास्तोपुनरेत्याहियोजयंति तदयुक्तं॥ प्रदर्शनार्थत्वे
प्रमाणाभावात्। तथा सत्यष्टरात्रिवास्तोपुनरेत्यहे उषित्वेत्यादिप्रदर्शनप्रसंगाच्च। दक्षिणो युक्तो भवति सव्यो युक्तोऽपि वाग्निष्ठस्य द
क्षिणो युक्तः सव्यस्य योक्त्रं परिहृतं सर्वेषु वा युक्तेषु त्रयोऽमी होमकालविकल्पाः। यदा सर्वेषां भाउवाहिनां मनसां दक्षिणो वाहो युक्तो भ
वत्ययुक्तः सव्यः तदैवेत्येकः यदाग्निष्ठष्ठस्याग्निवहिनो नसो दक्षिणं युक्तास सव्यस्यापि योक्त्रपरिहरणमात्रं कृतं न तु योक्त्रेण युक्तस्त
देति द्वितीयः सर्वेषां मनसां सर्वेषु युक्तेष्विति तृतीयः वास्तोष्पत इत्यनुहृत्योत्तरया गार्हपत्ये हुत्वा वक्षाणि संप्रक्षाप्यपप्रगरणीय्व
ग्नौ समारोपयते दये धार्यन्ते॥ अथ वास्तोष्पते प्रतिजानीह्यस्मानित्येतामनुद्रुत्य वास्तोष्पते शग्मयेत्येतया जुहोति। द्वाभ्यामेका
हुतिं जुहोतीत्यर्थः। नात्राहवनीयः प्रणीतेऽर्थाभावात्॥ ततो धार्यमाणानामग्नीनामवक्षाणानि अर्द्धदग्धानि काष्ठानि संप्रक्षिप्य
निशेषं दाहयित्वा तानग्नीन् पृथक्पृथक् आधानक्रमेण समारोपयेत् अध्वर्युरिति शेषः। जुहोतीमध्वर्युत्वात् उत्तरविधाने यजमा
नग्रहणात्॥ प्राजहितं समारोप्य शालामुखीयं गतश्रिय इति षष्ठि निर्द्देशाच्च॥ विश्वेदेवास्त्रिष्टुप्। वास्तोष्पते प्रतिजानीह्यस्मान्स्वा
वेशो अनमीवो भवा नः। यत्ते महे प्रतितन्नो जुषस्व शन्न एधि द्विपदे शंचतुष्पदे॥ हे वास्तोष्पते देवत्वमस्मान्प्रतिजानीहि अनुगृहाण॥

नोस्माकं स्वावेशः सुखी नीवासहे गोरनमी वीरगराहितसहे। तुभ्यमवयं तां प्रतिपदीमहे याचामहे। तन्नो स्माभ्यं प्रतिजुषस्व अस्मयनोस्म
दीयाय द्विपदे पुत्रादिरूपाय च तुष्पदे गवादिरूपाय च शं सुखं रूपसंनिधिः। वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातु
मत्या॥ आ नः क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः। हे वास्तोष्पते यया शग्मया बलवत्या रण्वया रमणीयया गातुमत्या
सन्मार्गवत्या संसदा वसत्या सक्षीमहि संगच्छेमहि॥ उत्तापि चावह तद्वीयक्षेमलब्धरक्षणे योगे चालब्धलाभे वरं वरणीयं वसु नोस्म
भ्यं आहारे त्वर्थः। तं सदा नोस्मान् स्वस्तिभिराशीर्भिः पाहि॥ उपर्यग्न्यावरणी धारयं जपत्ययं ते योनिर्ऋत्विय इति प्रत्यग्न्यग्नेऽग्नेअ
रणी धारयं जपति अयं ते योनिरिति व्याख्यातं। अपि वा यजमान एवात्मनू समारोपयते आत्मन् आत्मनि॥ या ते अग्ने
एहीति हस्तं प्रताप्य मुखायाहरेत्॥ नू ह्लीहं हस्तं प्रताप्य मंत्रेण मुखं प्रत्याहरेत्॥ यथा न हूत उष्मा तः प्रविशति आरोहात्मानमिति
लिंगात्॥ धार्यग्न्यनेक तेत्रापि पूर्ववदेव क्रमः विश्वे देवा तिशक्करी॥ या ते अग्ने यज्ञिया तनूस्तये ह्यारोहात्मात्मानं॥ अच्छा वसूनि
कृण्वन्नस्मे नर्या पुरूणि॥ यज्ञो भूत्वा यज्ञमासीद स्वां योनिं जातवेदो भुव आजायमानः सक्षय एहि॥ हे अग्ने तव या यज्ञिया यज्ञसा राम
धनभूता तनूः तया एहि आगच्छ आगत्याभिमुखेन आत्मा ममात्मभूतः आत्मानं मामिदानीमारोह॥ किं कुर्वन्। अस्मे अस्मभ्यं पुरूणि ४४
बहूनि नर्याणि नर्याणि नृभ्यो हितानि वसूनि कृण्वन् ददत् किं च यज्ञो यज्ञसाधनको भूत्वा यज्ञं यज्ञसाधकं स्वां योनिं आमासीद मयि वस

हे जातवेदो भुवः स्वयोनेरजायमानः पुनर्जायमानः सन्निवासए हि आगच्छ वा स उपारोह॥ दुरोण इति लौकिकेऽग्नावुपावरोहयन्ति॥ वासो रा
त्रिवासो अथ वसतिर्वा सो रात्रिरिति पर्यायः॥ यथोक्तमाश्वलायनेन॥ दध्यो दुग्धेन वा सेऽग्निहोत्रं जुहुयादिति। तत्र प्रणयनप्रैकाल एवात्म
समारूढानग्नीस्तेनैव क्रमेण लौकिकेऽग्नावुपावरोहयति मुखे वा निलेनार्पयति मंत्रोच्चारणमेवोपावरोहस्यानुष्ठानार्थ इत्यपरं॥ उपाव
रोह इत्यात्माधानेऽग्न्या स्थ्यातः। अरण्योर्वोपावरोहमंथेत्॥ अनेन मंत्रेण तस्य तस्याग्नेररण्योरुपावरोहं ततस्ततो मंथेत्॥ यदार
ण्योः समारूढस्याग्निर्वर्त्तमान एवं मंत्रं जपेत्॥ यदारण्योः समारूढस्तदा मथित्वां जातवेदो मात्रेऽग्नावुपावरोहणमंत्रं जपेत्॥ समारू
ढवचनस्यारणीस्थाग्निप्रदर्शनार्थत्वान्निर्वर्त्तमानता विशेषाच्चारण्योरुपावरूढस्य मंथनेविभवत्येवनिर्वर्त्तमानजपः। इदं श्रेयो०
स्वाहेत्यवसिते जुहोति॥ अवसितेगंतव्यदेशप्राप्त्या पुनस्स्वदेशप्राप्त्या वा प्रोषिते यजमाने विहृत्याहवनीयमिदंश्रेय इति जुहोति॥
अध्वन्यहोत्रसमाहारमाह॥ भारद्वाजः। तस्माद्धायावरधर्मेण भयाध्वान्ते ध्वन्यापत्सु वार्धमासायार्धमासायाग्निहोत्रं जुहुयात्॥ प्र
दिवसीयं चतुर्दशचतुर्गृहीतान्यन्नयत्येकासमित्समकृद्धोमः सकृत्पाणिनिमार्जनमेवं प्रातरेता — नू विकारः शेषप्रकृतिदुदग्नीत्समा
रोपयधारयते वोपवसथादौ तूपवसथो देहनितु न धारयत्सूर्ध्वं द्वादशाहमनिर्मथ्यावसथादि प्रतिपद्यते॥ यदि समारूढाभवंतीति॥ त
था जननमरणयोरापत्स्वर्धमासायाग्निहोत्रं जुहोतीति तिच॥ वामदेवः शांकरी॥ इदं श्रेयो वसानयदागां स्योनं मेधावा पृथिवी अभू

तां॥ अनमीवाः प्रदिशः संतु मह्यं गोमद्धनवदश्ववत्पुरुषवद्धिरण्यवत्सुवीरवत्स्वाहा। मम मदर्थं द्यावापृथिव्योरपोने सुखसंपाद-
यित्र्यावभूतां तथा प्रदिशः प्रकृष्टाः प्रधाना दिशो मह्यं अनमीवा रोगरहिताः संतु तत्प्रसादादहं यद्वसानं संस्थानं आगाम प्राप्तवान
स्मि। तदिदं स्थानं श्रेयः श्रेयःसाधनमस्तु तदेव प्रपद्यते॥ गोमद्गवादियुक्तं धनवद्धान्यादियुक्तं। अश्ववदश्वगजादियुक्तं पुरुष
45 वद्दासादियुक्तं हिरण्यवत्स्वर्णादियुक्तं। सुवीरवत्सुपुत्रादियुक्तं वास्तु॥ स्वाहा इदमाज्यं स्वाहुतमस्तु। अत्र प्रयोगः। यजमानः। स
दारः प्रयास्यन् प्रतिपदि सायं चतुर्दश्यां चतुर्गृहीतानुन्नय त्वेका समित्सकृद्धोमः सकृत्पाणिनिमार्जनं सकृदुपस्थानमिति विकृ
त्योत्तरत्र यथापूर्वमग्निहोत्रं हुत्वा द्वितीयायां प्रातरेवमेवाग्निहोत्रं जुहुयादित्येवं कृतपक्षहोमः शक्तश्चेत्कृतपक्षहोम एव॥ गृहो
पकरणपदार्थेषु सर्वेषु परिचारकैः शकटेष्वारोपितेषु अधिकेषु च पूर्वशकटैः पुरुषैर्वा गंतव्यदेशं प्रापितेषु पश्चान्नेतुं वान्यत्र
स्थापितेषु सत्सु सर्वेषां शकटानां दक्षिणे वा गयुक्ते सव्ये वा युक्ते यद्वाग्निवाहिनः शकटस्य दक्षिणे युक्ते सव्यस्य योक्तृपरिहरण राम
मात्रे कृते यद्विवा सर्वशकटानां सर्वेषु युक्तेषु प्राणानायम्य देशकालौ स्मृत्वा वास्तोष्पतीयं होष्यामीति संकल्प्य अथाध्वर्यूणां वा ४५
स्तोष्पते प्रतीत्यृचं वास्तोष्पते शग्मयेति गार्हपत्ये जुहुयात् हुते वास्तोष्पतय इत्युक्त्वा सर्वेष्वग्निष्वपक्षाणां निर्निःशेषं दाहयित्वा
थाध्वर्युणाग्ने रूपर्यरणी धृत्वा यं ते योनिर्ऋत्विय इति जपित्वा समारोपितेध्वाग्ये स्तप्र त्यगेव देहे अरणी धारयित्वाधानक्र

मेणसमारोपितेष्वग्निषु॥ यद्विवायजमानएवाग्नीन्हस्तंमताप्ययपातदूष्मामुखांतःप्रविशति। तथायातेअग्नइति। मुखंप्रत्याहर
ते॥ धार्याग्निंश्चेदाधानक्रमेणैवमात्मनिसमारोप्यसदारःसारणीयज्ञपात्रएकंशकटमारुह्यकांचिद्वसतिंगत्वाथाकृतपक्षहोमः।
कृताकृतपक्षहोमोनग्न्यायतनंनिर्मायप्रणयनकालेपरेणगार्हपत्यंलौकिकमग्निमाधायतत्रोपावरोहजातवेदइत्युपावरो
ह्यन्निधार्याग्निस्तत्तदायतनसंनिहितलौकिकाग्निषुक्रमेणमुखानिलेनमंत्रोच्चारणमात्रेयोवोपावरोत्यायतनेतिधायजय
ति। यद्यहातंतमग्निंतत्तदरण्योःपूर्ववदुपावरोह्योपावरूढेचाग्नौयथायोगमरणीमथित्वाजातमात्रेउपावरोहेतिमंत्रंजपित्वायतनेनिधाया
कृतपक्षहोमश्चेदग्निहोत्रंजुहुयात्॥ अथयत्रवास्तोवीपस्थंभवेत्तत्रदर्शपूर्णमासौकुर्यात् अथैकत्रवास्तोपंचसप्तनवदशरात्रिर्वत्स्या।
मीतिनिश्चित्यव्यवधानेनतावतीरात्रीरुषित्वाथषष्ठादिदिनेततःप्रयास्यन्पूर्ववद्वास्तोष्पतीयंहुत्वागच्छेत्॥ यद्येकत्रदशरात्रपक्षमासत्रि
स्त्रनवरात्रीमुषित्वाथवास्तोष्पतीयंगत्वापुनरेकेनत्रैकांरात्रिमुषित्वाततःप्रयास्यन्प्राग्वद्वास्तोष्पतीयंहुत्वागच्छेद्यधिस्वदेशन्यत्रवाप्रतिष्ठि
तोयजमानोध्वर्युणाविहृत्याहवनीयमिदं श्रेयइतिहुनेद्यां पृथिवीभ्यांयदिग्भ्यइदंनममेतिवदेदिति॥ ॥सहदारप्रवासांताग्निहोत्रो
क्तसुगंधिभिःसूक्तिप्रसूनैःपुष्पातुपुमर्थान्सुरूपोत्तमः॥ ॥अथाग्रयणमारभ्यते। नानिष्ट्वाग्रयणेनाहिताग्निर्नवस्याश्नीयात्॥
यत्रनवसस्यानांमग्रपाकोदेवान्नीयतेतदाग्रयणंनामनित्यकर्मतेनानिष्ट्वासर्वमेवनवसस्यंनाश्नीयात् यद्यप्ययकोद्रवादितदपिनाश्नी

यादेवनवसस्येति सामान्यनिर्देशात्॥ नवानां फलानां निष्टवीति लिंगाच्च। आश्वलायनस्तु प्रागप्याग्रयेणान्नं वै हुताग्निहोत्रस्याशनम
नुजानाति। यद्वा हासस्यं नाश्नीयात्॥ अग्निहोत्रमहुत्वा यदा वर्षस्य तृप्तः स्यादथाग्रयणेन यजेतेति व्रीहियवानां श्यामाकानामित्यग्र
पाकस्य यजेत॥ यागस्तासामेव ओषधीनां यदाग्रपाके न भवति नान्यासामित्यर्थः। अग्नेः पच्यत इत्यन्यपाकः। प्रथमपक्वमन्नमि
तियावत्। अमावास्यायां पौर्णमास्यां वा यजेतेत्यनुषंगः। यदीष्ट्यादिविधिसिद्धस्यापि पर्वणो विधानमामावास्यतंत्रत्वादाग्रयण
स्यापि मावास्यैककालत्वभ्रमनिरासार्थं। अमावास्यापौर्णमासीशब्दाभ्यां च प्रतिपत्संबद्धयोः संधिमानहोरात्रमुच्यते॥ तंत्रे वतयो
र्मुख्यत्वे तु क्षैं कृतात्॥ अतः स एव तावद्विकृतीनां यागकालः॥ नास्तु प्रकृतिसंनिपाते तदनुरोधेन नेतव्याः। यथोक्तं सत्याषाढभारद्वाजा
भ्यां दर्शपूर्णमासयोर्विकृतीश्च संनिपाते तंत्र दर्शपूर्णमासौ बलीयांसाविति तत्र मविरोधगतिः। यदा संधिमद्दहरुपवसथं करोति त
था विकृतेष्वपि प्रकृतेरुपवासः। यदा यजनीयं तदा प्रकृतेष्वपि विकृत्या याग इति॥ सत्याषाढस्तु काम्येष्टिं प्रकृत्याह। अमावास्यां पौर्णमा राम
सीं वा संस्थाप्य यजेतेति॥ अनुमत्याग्रयणस्योत्तरत्र विधास्यति। तेनं च पर्वणोः समुच्चायः। आमावास्यतंत्रं॥ ऐंद्राग्नस्य मुख्यत्वादेवा ४६
सेद्धेः पौर्णमासविकाराणां हविषां भूयस्त्वात्। पौर्णमासतंत्रत्वशंकापनयनार्थ आरंभः तेन च भूयस्त्वान्मुख्यत्वं बलवदिति ज्ञापितं भव
ति। सप्तदश सामिधेन्यः। व्यक्तं। निर्वपणकाले आग्नेयमष्टाकपालं निर्वपति पुराणानां व्रीहीणां संबंधिनं व्रीहिमयमित्यर्थः॥ यथादौ।

तेनादांतं संयुनक्ति नाहकृतदिति विज्ञायते। यथादांतेन वल्लीवर्द्देन सहाकृतमन्यं वल्लीवर्द्दं योजयति। कर्षकः। प्राटको वा तादृगेतं नवानां हवि
षां पुराणेन सह निर्वपणमित्यर्थः। अत एवोवर्षं तत्ववचनात् दर्शपूर्णमासयोरन्वाधीयमाने आग्रयणेष्टयगाग्नेयं नेच्छंति तत्र दांतानर
संभवदाग्रयणहविष्ट्वाचाग्नेयस्य॥ तत्रालिंगमाग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थीभ्य इति॥ भारद्वाजस्त्र। स तत्राग्रयणे पिशानवान्ये
द निर्वपेन्नाग्नेयमिति। येनयज्ञेन त्सं कुर्यादेवतत्राग्नेयमष्टाकपालमिति विज्ञायते।। न केवलमाग्रयणे किंतु सर्वत्रैवेष्टि। मात्रे एवह्नि
मिच्छति। तत्राग्नेयं मुख्यं समानतंत्रं च निर्वपेदित्यर्थः। नवानामितरा एष्वैंद्राग्नं द्वादशकपालं मग्नी इंद्रं वा वैश्वदेवं पयसि चरुं सौम्यं श्या
माकं चरुं द्यावापृथिवीमेककपालं। शामाकमपि नवानामेव पुरस्तात्सौम्या द्यावापृथिव्यमेककपालमेके समामनंति। अक्तं। निरुप्तं स्नेह
विरूपसंनमप्रोक्षितं भवत्यर्थं वान्यानी जुहोति। शतायुधाय शतवीर्यायेति निरुप्तं हविरित्यादि। गुरुमात्रकरणमाग्रयणं निरुप्ये
ता आहुतीस्त्रिब्राह्मणव्याविरव्यास ये ति द्रष्टव्यं। सूत्रं चेतरव्याख्यातमाधाने अग्न्यान्योभद्रान्न इत्यंतः। अग्निस्त्रिष्टुप्। शतायुधाय श
तवीर्याय शतोतये भिमातिषाहे। शतं यो नः शरदो अजीतानिंद्रो नेषदति दुरितानि विश्वाय इंद्रो नोस्मान् शतं शरदः शत संख्याका
न्संवत्सरानजीतान्नेषत् केनाधिव्याधितस्करादिनाय पापीडानभवामस्तथा नेतुं समर्थः। किं कृत्वा विश्वादुरितान्यतिअस्मदीयानि
सर्वाणि पापान्यतिक्रम्य तस्मा इंद्राय नमोस्त्वित्यध्याहारः। कीदृशाय शतायुधाय वज्रमनुराधने कायुधाय शतवीर्याय अनेकविज

यायशतोनयेनानाविधास्मद्रक्षणाय अभिमातिषाहे। पापाद्यहितामिसविते॥ येचरः पथयोदेवयाना अंतराद्यावापृथिवी वियंति। ते
षांयो अज्यानिमजीतिमावहात्तस्मै नोदेद्यावापृथिवी अंतराद्यावापृथिव्यो मध्येयेचत्वारः पथयोमार्गा वियंतिविविधंप्रवर्त्तंते। की
दृशाः देवयानः देवानां पितृब्रह्ममनुष्यलोकगमनहेतवः। तेषामार्गाणां यइंद्रः अज्यानिं कदाचिदपिहानिरहितां अदितिरक्षः प्रभृ
तेरनुपद्रवं आवहसंपादयतु॥ तस्माइंद्राय हे सर्वेदेवा इहकर्मणि नोस्मान्परिधत्त अयंयजमानः। सर्वेषुमार्गेषु रक्षणीयइत्येवं
मस्मानिंद्राय समर्पयत॥ ग्रीष्मोहेमंतउतनोवसंतः शरद्वर्षाः सुवितंन्नो अस्तु॥ तेषामृतूनां शतशारदानां निवातएषामभये
स्याम। योग्रीष्माख्यऋतुः सनोस्मान्प्रतिसुवीतमस्तु शोभनगतिप्राप्तोस्तु। कालो चिनाभोग्यपद्रव्यप्रदोस्ति त्यर्थः। एषहेमंतादि
षुयोज्यां शतशारदानामस्मदायुषाशतसंवत्सरसंबंधिनां तेषां ग्रीष्मादीनामृतूनां अनुग्रहान्नुवयं निपातवताद्युपद्रवरहिते अ
भयेभयरहिते स्थाने स्यामसुखेनावस्थिता भवेमः। इदुवत्सराय संवरिवत्सराय संवत्सराय कृणुतान्नृहंनमः। तेषांवयं सुमतौय
ज्ञियानां ज्योगजीता अहतास्याम॥ प्रभवादिसंवत्सराणां पंचके चतुर्थ इदुवत्सरः द्वितीयः परिवत्सरः। प्रथमः संवत्सरः एतत्त्रयकृ राम
त्स्नस्यापिकालस्योपलक्षणं। हे ऋत्विग्यजमानाः इदुवत्सरादिरूपाय कालाय वृहंनमः कृणुत असंतभक्तिपुरःसरं नमस्कुरुत॥ ४०
यज्ञियानां यज्ञनिष्पादकानां तेषा संवत्सरविशेषाणां सुमतौ अनुग्रहबुद्धौ सत्यां वयं सर्वैर्ज्योंक्चिरं अतीताः केनापि अवशीकृताः।

अमारिताश्चस्याम ः भवेम ः। भद्रां नः श्रेयः समनैष्ट देवाः त्वयावसेन समशीमहि त्वा। स नो मयोभूः पितो आ विश स्व शं तोकाय तनुवे स्योनः।
हे देवाः भद्रात् कल्याणात् अस्मात्कर्मणः साधनभूतात् श्रेयोधिकं प्रशस्तं फलं नो अस्मान् समनैष्ट सम्यक् प्रापयत॥ हूयमाना आज्या
त्वयावशेन अधीयेन रक्षणेन वयं त्वां॥ समधीस्त्वयावसेन समशीमहि सम्यग्व्याप्नुयां॥ हे पितो नतरूपाज्य त्वं मयोभूः सुखस्य भावयि
ता सन् नो अस्मान् आ विश स्व प्रविश तोकाय अस्मदपत्याय शं सुखं कुरु। तनुवे शरीराय स्योनः सुखप्रदो भव॥ पुरस्ताद्वा स्विष्टकृतः
नारिष्टेभ्य उपरिष्टाज्जुहोत्यागंतुकत्वात्॥ आग्रयणं निरुप्येति यागानुवादोयं। न निर्वापमात्रस्येति भावः। प्रोक्षादि कर्म प्रतिपद्य
तेव्यक्तं॥ एवमुलूखलमुसलं प्रतिबीजं वा। अत्रो लूखलमुसलमात्रग्रहणाद्वयोरेकता न अविकल्पनान्येषां ततः शूर्पादीन्येकै
कान्येव भवंति। स साषाढस्त्वा ह एकमुलूखलं मुसलं शूर्पं कृष्णाजिनं चेति प्रदर्शनार्थमेतदपि भवतामित्यन्ये। भारद्वाजस्तु ह त्रीणि।
शूर्पाणि प्रयुनक्ति। त्रीण्येकलूखलानि द्वे दृषदाविति। तत्र शूर्पैकत्वप्रदेशभेदेन निर्वापोत्थापे विवेकपरापावनेतुसामर्थ्यात्॥ पात्रां
तरे चैवैकैकस्य बीजस्य भवतः। तथा दृषद्यधिवापः पर्यायेण। पात्रे कृष्णाजिनयोः प्रस्कंदनं संवापश्च प्रदेशभेदेनेत्यादि द्रष्टव्यं॥ बी
जसंस्कारेषु च विभवंतां तंत्र त्वमितरेषां मावृत्तिश्च यथायथमनुसंधातव्येत्याह भारद्वाजः। आनंतिकभावादेकैकं बीजमपवर्जयो।
दिति। सर्वेषु हविष्कृतावहनमंत्रः यदा वद्धा तार्थो हि विकृन्मंत्रस्तदो लूखले कले च बीजे बीज आवर्त्तते॥ यदाद्वानार्प स्त्रदाप्सु लूखले

कृत्ते आवर्त्तते भिन्नकालत्वात्पात्रकर्मणः कांडानुसमयेनानुष्ठेयत्वात्॥ तथा च भारद्वाजः। अपि वैकस्मिन्नुलूखले पूर्वापरमवहन्
यात्॥ तत्र वपनप्रभृतयो विवेचनान्ता मंत्रा बीजे बीजेऽभ्यावर्त्तेरन्निति॥ यदा तूलूखलभेदस्तदा न हविष्कृताह्वानमावर्त्तते। कालाव्यपेतत्वात्॥
कोऽभ्यवायश्च तत्र कर्मणां समानजातीयस्य यतः प्रवृत्तिसिद्धेः। तथा चैकस्मिन्नूलूखलाजिनयोरेकलूखलेन्यतिवर्त्तयतीति प्रकृत्य भारद्वाजः।
सर्वाणि हवींष्योप्य हविष्कृतमाहुतिः सर्वाण्येव हत्य दृषदुपले समाहत्यानुपूर्वं सर्वाणि हवींष्युद्वपति पुरापुनाती विविनक्तीति तुषोप
वपनं॥ तुषोपवपनमपि सर्वेषु बीजेषु भवति। उलूखलभेदे च सर्वेषां तुषाणां प्रतिपाद्यत्वात्॥ तत्र सर्वे तुषाः समाहृत्य। ततः प्रतिपादनीयाः
विभुत्वाद्भारद्वाजश्चाह। सर्वेषामंततस्तुषानुपवपतीति। प्रक्षालनं निनयनमप्येतेन व्याख्यातं। उत्तममोप्यवाचं विसृजते हविष्कृदाहृतेति तूत्त
मं बीजमोप्यः यो हविष्कृतेन वाचं विसृजते इह हविष्कृताह्वानेन तदनुसारेणेत्यर्थः। उपवेषणादीनामपि पूर्ववत्तंत्रावृत्ती प्रवृत्तिः। चरुपुरोडा
शधर्मीश्च यथायथं प्रत्येतव्याः। एषोऽन्येषां नानाबीजानां समवेतानां कल्पः। अन्येषामप्यस्मिन् तंत्रे समवेतानां नानाबीजानामेकमुलू राम
खलमसलमित्यादि पक्ष एव कल्पः प्रयोगः। अलंकरणकाले आज्येनैककपालमभिपूरयतीत्यर्थः। आविः पृष्ठं वा कृत्वासादयति। तद ५८
यथा तं मा विः पृष्ठं प्रकाशपृष्ठं कृत्वा तदभिपूर्य ततो हवींष्यासादयतीत्यर्थः। तथा च [illegible]॥ प्रदेशांतरे यथा आविः पृष्ठं वा कृत्वाव्याहृतीभि
र्हवींष्यासादयतीति। अथापराभ्यारभ्या उद्वासनकाले पार्श्वांतर उद्वासितमेककपालमाज्येनाभिपूर्याविः पृष्ठं वा कृत्वा तेनैव पात्रेण सह

सादयति॥ तथा च सत्याषाढः। अथान्यस्मिन्पात्रे एककपालमुद्वास्येत्यादि। उपप्रचरणकाले उद्धृत्य बर्हिषदं कृत्वा। जुह्वामुपस्तीर्य। आश्रा-
यमानीयाभिर्याभिः पांसुप्रचरति। प्रचरणकाले धृतादेककपालमुद्धृत्य बर्हिषदं कृत्वा कृत्वा ततो जुह्वामुपस्तीर्य तत्र कृत्स्नं पुरोडाशं निधा-
यास्मिन्नवृते आश्रावयित्वा शाययमाज्यं पश्चादानीय सकृदभिघारयति उपांशु प्रचरति द्विरभिघारणमेके॥ तद्युक्तं॥ आशये
नैव चतुरवदानसिद्धे कृत्स्नं वै स्वानरमवदाय द्विरभिधार्ये स्यान्यत्र दर्शनाच्च। सर्वहुतमपर्यावर्तन्नाजुं प्रतिष्ठितं न हस्तेन जुहुयात्।
सर्वहुतमितिविस्पष्टार्थं अथवा यथा स्कन्नः सर्वो हुतो भवति तथेत्यर्थः अपर्यावर्तयन् यथा हूयमानो हुतस्सन्न पर्यावर्तेत॥ तथा स्क-
कृपार्श्वेन शनैश्रावयेदिति। न तपिदध्य दिवा जुहुयादित्यर्थः। विष्म दुरिते ष्वंगारेषु स्थापनात्। नो भवति। विपर्यायदहुतत्रैवापरि-
स्फस्य प्रतिष्ठितं॥ यथोक्तहोमप्रकारे सौकर्यापेक्षि हविस्तेन च्यावयेदपीति हस्तप्रतिषेधः यदि हुतः पर्यावर्तेत स्रुचो ग्रेण कल्पये-
त्॥ कल्पयेद्यथास्थानं प्रतिष्ठापयेत्। हुत इति वचनादहुतस्य पर्यावर्तने यद्येककपालः स्कंदेत परिवार्तेत अनेन विधिना कल्पयेत्।
न पाणिना सकार्यान्तरापेक्षायामपि न पाणिना कल्पयेत्॥ वरेदत्ते कल्पयितव्यः। कल्पयिष्यमाणो ध्वर्यवे वरो देय इत्यर्थः। अथा-
दायाभिधार्य पुनर्होतव्य इत्येके। अपि वा नैव कल्पयितव्यः। किंतु उद्धृत्य स्रुच्याधाय पुनराश्रावणादिविधिना होतव्यः। अपि
वा नैककपालं कुर्वीताज्येन द्यावापृथिवी यजेत उभयोरपि पक्षयोः वैशेषिकमेवाहुत्यानुमंत्रणं न प्राकृतमिति हशितं याजमाने॥

येप्राचीनमेकाष्टकायांवत्साजायंतेषांप्रथमजंददातित्वासः श्यामाकेचरौनिमित्तभूतेतयोऽश्वाभिमर्शनादूहः प्रकृतावेवदर्शितः। भद्रान्न।
श्रेयः समनैष्टदेवाइतियजमानभागंप्राश्नाति। प्रत्याम्नानुप्राकृतमंत्रोनिवर्तते। भद्रान्नइत्तिमंत्रोऽत्रैवाज्यानिहोमेप्रारव्यातः। सर्वे
षांवाभक्षाणांमंत्रवतांप्रत्याम्नायस्यात्॥ नकेवलंयजमानभागमात्रस्यैवकिंतुयेयजमानस्यैवकर्त्विजांवांमंत्रवतोभक्षाः। इडाप्रा
49 शित्रादिविषयास्तेषांसर्वेषामपिमंत्राणामप्ययंप्रत्याम्नायस्यात्। अग्निः प्रथमः विश्ववर्षणिरिति श्यामाकानांयजमानभागं
एषगनेनमंत्रेणप्राश्नातिसर्वेषांवेलादिपूर्ववत्। विश्वेदेवा अनुष्टुप्। अग्निः प्रथमः प्राश्नातुसहिवेदयथाहविः। शिवा अस्मभ्यमोष
धीः कृणोतुविश्वचर्षणिः। अग्निर्देवः सर्वेभ्याभक्षयितृभ्यः प्रथमः सन्निमंभागंप्राश्नातुहियस्मात्कारणात्सोऽग्निर्यादृशंहविस्त
द्वेदसर्वशरीरगतः। सोऽग्निरस्मभ्यंओषधीर्व्रीह्यादिरूपाः सुखयित्रीः करोतु। सिद्धमिष्टिः संतिष्ठते। प्रकृ। अत्राश्वलायनः। अथव्री
हियवानांधाय्येविराजावग्नींद्राविद्राग्नीवाविश्वेदेवाः सोमोयद्दितत्रश्यामाकोद्यावापृथिवी। आघायेअग्निमिंधते। सुकर्माणः।
सुचोदेवयंतोविश्वेदेवासआगतः। येकेचज्मामहिनोअहिमायामहीद्यौः पृथिवीचनः प्रपूर्वजेपितरानव्यसीभिरिति। सोमयास्ते राम
मयोभुवः यातधामानिदिवियापृथिव्यांमितिच। अयमर्षः। शरद्विव्रीहीणांवसंतेयवानांचाग्रयणेष्टौसामिधेनीषुपृथुपाजास्त्वं ४९
सवाधइतिधाय्येप्रेद्धोअग्नेइमोअग्नइतिविराजोसंयाज्येमवतः। वैराजंतंत्रमित्येवोक्तेधाय्याविराण्मात्रविकारसिद्धोधाय्याग्रहणं।

क्किंस्येनवृधन्वंतोरपिप्रापणार्थं अथा येसुकर्मण इत्यग्नींद्रस्या। विश्वेदेवासः। येकेचेति विश्वेषां देवानां महीद्यौः प्रपूर्वज इति द्यावापृथि
व्योः सोमपास्तेयाते धामानीति सोमस्य याज्यानुवाक्ये इति। अग्नेरिंद्राग्न्योश्चोक्ता दर्शपूर्णमासयोः। अत्र केचिन्नानातंत्ररूपामाके
ष्ट्यवांतरेडाभक्षणधर्मे समानतंत्ररूपामाकावीतरेडायामिच्छंति। एतेन भक्षितेणो भक्षान्सर्वत्रेति वचनात्॥ तत्र चाश्वलायनः। अवां
तरेडायां नित्यं जपमुक्त्वा सव्येपाणौ कृत्वोत्तरेणाभिमृशेत्। प्रजापतेस्त्वा० चतुष्पद इति। प्राश्याचम्य नाभिमालभेत नामोसिप्रा
णाइंद्रियेत्येतेन भक्षितेणो भक्षान् सर्वत्र नवभोजने इति। अयमर्थः। इडेभागमिति जपित्वा सव्येपाणौ विडां कृत्वा प्रजापतेत्वेति द
क्षिणेनाभिमृश्य भाद्रोन्न इति प्राश्याचम्य तत्रस्थ एवामोसिप्राणेति नाभिमालभेतानेन विधानेन भक्षितेणो किंकं वेदिकं वा।
नवं भक्ष्यं भक्षयेयुरिति। अन्ये तु नवानवहविरंतरेडासंभिन्नायाः रूपामाकेडायाः पृथक्कर्तुमशक्यत्वात्। भिन्नतंत्ररूपामाकधर्म
प्राप्तावुपदेशातिदेशयोरभावात् प्रकृतिधर्मेण निराकांक्षत्वाच्च यथाप्रकृति भक्षणमित्याहुः॥ यदत्र युक्तं तद्ग्राह्यं अथान्नस्य मं
त्रार्थः। आ यो वृधन्वता विडेभागमिति च दर्शपूर्णमासयोर्व्याख्याताः। विशवधाने। त्रिशोको गायत्री। आघा ये अग्निमिंधते स्त
णंति बर्हिरानुषक्। येषामिंद्रो युवा सखा। येनरः आघा आसमंतात् त्वा ये प्रानस्त्वाग्निमिंधते ये वा दर्शपूर्णमासादौ अनुषक्
आनुपूर्व्येण बर्हिरास्तृणंति। येषां च युवा इंद्रः सखा स्तुस्यस्तोत्रभावेन बंधः। ते सर्वे अग्नींद्रानुग्रहात् समृद्धा भवंतित्यर्थः। वाम

देवस्त्रिष्टुप्। सुकर्माणः सुरुचो देवयंतो योनदेवा जनिमा धमंतः। शुचंतो अग्निं वव्रधंत इंद्रमूर्वं गव्यं परिषदंतो अग्मन्॥ गृत्समदो
गायत्री। विश्वेदेवास आगत शृणुता म इमं हवं। एदं बर्हिर्नि षीदत॥ हे विश्वेदेवाः आगच्छत आगत्य मे मदीयमिमं हवमाह्वानं शृणुत इदं ब
र्हिरास्तृत्य हविःस्वीकर्तुं निषीदत॥ ऋजिश्वा त्रिष्टुप्। ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे। ते अस्मभ्यमिषये वि
50 श्वमायुः क्षप उस्रा वरिवस्यंतु देवाः। मेधातिथिर्गायत्री। मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां। पिपृतां नो भरीमभिः। ये यं मह
ती द्यौया च पृथिवी ते उभे नोस्मदीयं इमं यज्ञं मिमिक्षतां फलपुष्ट्यासेक्तुमिच्छतां ततो भरीमभिः हे रणे शक्तिभिर्नोस्मान् पिपृ
तां पूरयतां। वसिष्ठस्त्रिष्टुप्। प्रपूर्वजे पितरा नव्यसीभिर्गीर्भिः कृणुध्वं सदने ऋतस्य। आ नो द्यावापृथिवी दैव्येन जनेन यातं म
हि वां वरूथं। पूर्वजे प्रथमोत्पन्ने द्यावापृथिव्यौ पितरा माता पितृसमाने हे ऋत्विग्यजमाना ऋतस्य सदने यज्ञस्य स्थाने नव्यसीभिर
तिशयेन नूतनाभिर्गीर्भिः मंत्ररूपाभिर्वाग्भिः कृणुध्वं द्यावापृथिव्यौ प्रकर्षेण स्तुध्वं। हे द्यावापृथिव्यौ दैव्येन देवसंबंधिना जनेन स राम
ह नोस्मान् प्रत्यायातं तेन वां युवयोः संबंधि वरूथं॥ यज्ञगृहं मही पूज्यमस्तु। गोतमो गायत्री। सोम यास्ते मयोभुव ऊतयः संति दा ५०
शुषे। ताभिर्नोविता भव। हे सोम दाशुषे हविर्दत्तवते यजमानाय मयोभुवः सुखं भावयितुं समर्थाः ते त्वदीया या ऊतयो रक्षणप्रका
राः संति ताभिरूतिभिर्नोस्माकं अविता रक्षको भव। त्रिष्टुप्। या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु। तेभिर्नो विश्वैः

सुमना अहेडन्नू राज न्सोम प्रतिहव्या गृभाय॥ हे सोम राजन् ते तव द्दिविषत्थिव्या दिषु वयानि धामानि स्थापनानि संतितेभि विश्वस्यै
सर्वैर्युक्तः सुमनस्कः क्रोधरहितः सन्नोस्मदीयानि हव्यानि हवींषि प्रतिगृहाण। वामदेवो यजुः। प्रजापतये त्वा ग्रहं गृह्णामि महं
श्रियै मह्यं यशसे मह्यमन्नाद्याय॥ हे इडे गृहं गृह्यमाणं त्वां प्रजापतिं प्रीत्यै गृह्णामि॥ तथा मह्यं मम श्रियै यशसे अन्नाद्याय च गृ
ह्णामि मह्यमाद्वृतिरादराष्टिः। त्रिष्टुप्। भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावसेन समशीमहि त्वा। स नो मयोभूः पितर्वा विशेह शंको
चतुष्पदे इहास्मिन्लोके नोस्मदीयाय द्विपदे च तुष्पदे च॥ शं सुखप्रदो भव। शेषमाज्या निहोमे व्याख्यातं। वामदेव स्त्रिष्टुप्॥ अ
मोसि प्राण तदृतं ब्रवीम्यमासि सर्वान सि प्रविष्टः। स मे जरां रोगमपनुद्य शरीरादमाम एधि मामृधाम इंद्र। हे प्राण त्वं मम साहि
सवानूस रवासि न तत्सत्यं ब्रवीमि किं च त्वं मा साहित्यमेवासी यत प्राणरूपेण सर्वाण्याणि नः प्रविष्टो पि। स त्वं मे शरीरा जरां रोगं
वापाकृत्य मम अमा सह एधि वर्धस्व। हे इंद्र स वैश्वर्ययुक्त प्राणं मे मह्यं मामृधाः मादुत्स्व स्व। आपस्त्वं वस्क॥ सप्रलवदितिद्वे
धाय्ये च तस्र आज्यभागयोः दशाहविर्षां द्वे स्विष्टकृत इति अयमर्थः सप्रलवदितिपार क्षुद्रस्यानुवाकस्यादित स्त्रिवाक्ये द्वे धा
य्ये भवतः ततः परा स्त्रिवाक्याः स्त्रत स्तोप्रहियवा ग्रयणयो राज्यानुवाक्यास्तत्रचादितो द्वे आग्नेयस्य परे द्वे सोमस्य शपामाकेष्यां
तु सद्दे तौ इत्कः॥ याज्यास्त जुषाण इत्येव सर्वत्र। एते वाज्यभागयो द्वे द्वे याज्यानुवाक्ये इत्यन्ये। न वस्य सोमतेवयं मिति त्रिवाक्यापु

रोनुवाक्यानवंहविरितिवतुर्थीक्तायाज्यासोमस्यनवंस्तोमंस्प्रुचिन्नुस्ते। ममित्यैंद्राग्नस्य अग्निरिंद्रयज्ञंनइत्याग्नींद्रस्य। विश्वानूदेवा
नूएवंवर्हिरिवैश्वदेवस्य। इमेनुद्यावा। इमेधेनूइतिद्यावापृथिव्यस्य। विष्टोहव्य। त्वमग्नेइतिस्विष्टकृतइति। अन्नस्यमंत्रार्थः। वि
श्वदेवागायत्री। सप्तत्वंदितिदर्शपूर्णमासयोर्मीरव्यातानवंन्नस्तोममग्नयेदिवः श्येनायजीजनं॥ वसोःकुविद्वनातिनः।
नुक्षिप्रंनवमभिनवंस्तोमंस्तोत्रंवदिवोद्युलोकस्यप्राप्तौ। श्येनायश्येनस्यानीयायाग्नयेजीजनंजनयामि। तथावसोर्वसु
51 धनंकुविद्वलंनोस्मभ्यंवधनानिददातु। स्वारुहायस्यश्रियोदृशौरयिवीरवतोयथा। अग्नेयज्ञस्यचेततः। यज्ञस्याग्नेयज्ञंप्र
थममेवचेततःप्रकाशतोजानतोवायस्ययजमानस्यवीरवतोविक्रांतपुरुषवतारयिर्यथाधनमिवश्रियःसमृद्धयस्वारु
हअनन्यनिरपेक्षादृशेदृश्यंतेसोयमग्निरनुग्रहइत्यर्थः। अदाभ्यःपुरएता अग्निर्विशांमानुषीणांतूर्णीरथःसदानवः।
अदाभ्यहुकेनाप्यनुपहिंस्यपुरएतासुकर्मसुपुरोनिहितःमानुषीणांविशांप्रजानांतूर्णीस्तारयितासिरथोरंहणःसदासर्वदा
नवोनूतनोयमग्निरिज्यतइत्यर्थः। नवंसोमायवाजिनेआज्यंपयसोजनि। जुष्टंशुचितमंवसु। नवमभिनवंवाजिनेएनवतेसो राम
मायजुष्टंसेव्यं। शुचितमंपूततमंवसुसर्वेषांसवितृआज्यंपयःसकाशात्॥ अजनिजायते। तत्सोमायदीयतइत्यर्थः। नवंसोम ५१
जुषस्वनःपीयूषस्येहतृप्णुहि। यस्तेभागऋतावयं। हेसोमऋतावाग्रयणकालेतेतवयूयंभागस्तंनोस्मदीयंनवमभिनवंपीयू

षेस्यपीयूषसद्दृशमिस्कं कर्मणि जुषस्व ॥ सेवस्वेत्यर्थः ॥ सनो राय इत्यस्य नवस्य सोमस्य मते वयमासुमतिं वृणीमहे ॥ सनो रास्वसहस्रिणः ॥ हे सोम नवस्या भिनवः श्यामाकवतः सहस्रिणः सहस्रसंख्याकधनप्रदस्य ते तव सुमतिं कल्याणबुद्धिं वयमावृणीमहे । स त्वं नो स्मभ्यं रास्व देहि । अनुष्टुप् । नवं च हविजुषस्व नः । आ लुभिः सोम भृतमं तदंग प्रतिहर्य नः राजन्त्सोम स्वस्तये । हे सोम अनुभिः कालेन भृतमं संपन्नं नवं अभिनवं नोस्मदीयं इदं हविर्जुषस्व । हे राजन् नोस्मदीयं तद्धविः स्वस्तये अस्मदिष्टप्राप्तये प्रतिहर्य प्रतिगृहाण ॥ नवं च स्तोमं नवं च हविरिंद्राग्निभ्यां निवेदय । तज्जुषेतां च सचेतसा । हे अग्ने नवं स्तोत्रं नवं हविरिंद्राग्निभ्यां निवेदय । समर्पय । तवचसचेतसा समानचित्तौ तद्धविर्जुषेतां सेवतां ॥ त्रिष्टुप् ॥ स्तुवित्रुस्तोमं नवजातमद्येंद्राग्नी वृत्रहणा जुषेथां ॥ उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा ॥ हे वृत्रहणा पापनिवारकौ इंद्राग्नी युवां तु क्षिप्रं स्तुविस्तुहि स्तोत्रं नवजातमागमय एं इह विश्वेदानीं सेवेथां ॥ हि यस्मात् युवां सुहवा स्वाह्वानौ अवोवामुभौ जोहवीमि आह्वयामि । तौ युवां उशते कामयमानाय यजमानाय वाजमन्नं सद्यो धेष्ठ धत्तं ॥ गायत्री । अग्निरिंद्रो नवस्य नः अस्य हव्यस्य तृप्यतां । इह देवौ सहस्रिणौ । सहस्रसंख्याकह विर्धनवंता वग्निरिंद्रश्च । देवाविह कर्मणि नोस्मदीयस्यास्य हव्यस्य दानेन तृप्यतां ॥ अनुष्टुप् ॥ यज्ञं न आ हि गच्छतां वसुमंतं च सुवर्विदं । अस्य हव्यस्य तृप्यतां ॥ अग्निरिंद्रो नवस्य नः अग्निरिंद्रश्च देवौ वसुमंतं हविः संपन्नसुवर्विदं स्वर्गस्य फलं लंभयितारं ॥ नोस्मदीयं यज्ञं हि सिद्धं आगच्छतां शेषं पूर्वेण व्याख्यातं ॥ गायत्री ।

विश्वान्देवाꣳस्तर्पयत हविषो स्य नवस्य नः। सुवर्विदो हि। जज्ञिरे। हे देवाः स्वर्गस्य लंभयितारः जज्ञिरे। हे ऋत्विग्यजमानास्तावन् विश्वान्
देवान्नोस्मदीयेस्याह विषः प्रदानेन तर्पयत। त्रिष्टुप्। एदं बर्हिः सुष्टरीमा नवेन अयं यज्ञो यजमानस्य भागः। अयं बभूव भुवनस्य ग
र्भः। विश्वे देवा इदमेधागमिष्ठाः। आ समन्तादेदं बर्हिः सुष्टरीमशोभनास्तरणं नवेन हविषा क्रियमाणो यं यज्ञो यजमानस्य भागो भ
जनीयस्वर्गादिः किंचायं यज्ञो भुवनस्य गर्भः। वृष्ट्यादिद्वारा सुखसाधनत्वात्॥ किं बहुना विश्वे देवा इदं हविरादानुमर्घं बवन्नह निश्रा
गमिष्ठा आगंतारः। इमे नु द्यावापृथिवी समीची तन्वाने यज्ञं पुरुपेशसं धिया। आ स्मे पृणीता भुवनानि विश्वा प्रजां पुष्टिममृतं नवे
न। समीची परस्परसंगतवत्यौ इमे द्यावापृथिव्यौ नु क्षिप्रं धिया प्रज्ञानेन यज्ञं पुरुपेशसं बहुविधद्रव्यदेवताभेदां तन्वाने विस्तारयं
त्यौ नवेनाग्रयणं हविषा अस्मै यजमानाय विश्वा भुवनानि सर्वाणि भूतजातानि प्रजां पुष्टिममृतत्वं चा पृणीतां। समंतादाहृत्य संपा
दयतां॥ इमे धेनू अमृतं ये दुहाते पयस्वत्युत्तरामेतु पुष्टिः। इमं यज्ञं जुषमाणे नवेन समीची द्यावापृथिवी घृताची। नवेन हविषोप
लक्षितमिमं यज्ञं जुषमाणे सेवमाने समीची घृताची घृष्टिरूपोदकं मसुवत्यौ धेनू॥ प्रीणयित्र्यौ य इमे द्यावापृथिव्यावमृतं घृष्टिरूपेणो राम
दकं दुहाते क्षरतेः। तयोरनुग्रहात् पयस्वत्युदकवती पुष्टिः सस्यादिसमृद्धिः उत्तरामेतु अतिशयेनोदेतु॥ अनुष्टुप्॥ यविष्ठो हव्यवा ५२
हनः। चित्रभानुर्घृतासुतिः। नवजातो विरोचसे अग्ने तत्तन्महित्वनं॥ हे अग्ने त्वं युवतमो हविषां वोढा चित्रदीप्तिर्घृताभिवर्धितो नवज

न्माचसंविलो वसेनत्वत्वलुत्तदमर्हत्वं। त्वमग्ने देवा नोऽभ्यो भागे देवनमीयसे। स एना विद्वान्यक्ष्यसि नवं स्तोमं जुषस्व नः। हे अग्ने त्वं देवता
भ्यो भागप्रदानेन नीयसे न परिच्छिद्यसे॥ नीरूद्र वइत्यर्षः। सत्वमिदमस्मै देयमिदमस्मा इति विद्वाग्ने त्तिन देवता यक्ष्यसि। स त्वं नो स्म
हीयं नवं हविः स्तोमं स्तोत्रं च जुषस्व अत्र यजमानो विश्वेषां देवानामित्ति वैश्वदेवं हुतं यावापृथिव्योरहं देवयज्यया योभयोरित्ति भूमान
मिति वा। द्यावापृथिव्यं हुतमनुमंत्रयते। वामदेवो यजूंषि। विश्वेषां देवानामहं देवयज्यया प्राणैः सायुज्यं गमेयं॥ द्यावापृथिव्यो
रहं देवयज्ययोर्लोकयोऽत्रीध्यासं। द्यावापृथिव्योरहं देवयज्यया भूमानं प्रतिष्ठां गमेयमिति वा द्यावापृथिव्योरहं देवयज्ययानेन
देवयागेनाहं महिमानं प्रतिष्ठां च गच्छेयं। अत्र प्रयोगः। शरद्यान्तौ हृष्यां सश्यत्तां पौ अमावास्यां पौर्णमास्यां वा प्रतिपत्सं धिमस्या
प्रकृतेरन्वाधानदिनं चेत् प्रागन्वाधानात्॥ यागदिनं चेत्तद्यागानंतरं मपरेण गार्हपत्यं सहपत्न्या पवित्रपाणिः प्राणानायम्य
देशकालौ संकीर्त्य आग्रयणेन यक्ष्य इति संकल्पयेत्॥ विद्धदसीत्यादि अध्ययज्ञायइमामूर्जं पंचदशी प्रथमामित्तिवा। यथा
योगं आग्रयणीयं हविः आमावास्यं तंत्रं व्रतोपायनादि सप्रदशसामिधेन्यः ततस्तात्रयो विंशतिधा वेदः यतः कूतस्त्रिदुपवे
षः समूहनादिपरिपरिस्तरणां कर्मणो वामित्यादि एकविंशतिकपालानिद्देस्या त्पौ स्फ्यश्च द्वंद्व एकं। त्रीणि वा शूर्पाणि उलूखल
लानि मुसलानि वा द्वे दृषदौ उपले च। नान्वाहार्यस्थाली प्रातर्देहिपात्राणि व॥ पयश्चैत्पणयेत्। द्वे पवित्रकरणादि प्रणीते नेचे त्य

यस्तां वैश्वदेवपाकः तथा द्वयोः प्रणीतयोः प्रणीतयोर्दर्भाभिच्छादनां तपदार्थावृत्तिः। कस्त्वा गृह्णातिस त्वा गृह्णातु कस्मै त्वा गृह्णामि तस्मै त्वा गृ
ह्णामि पोषाय त्वा देवस्त्वा सविता पवयदेवेभ्य अग्ने यज्ञइमं यज्ञं नयाग्ने यज्ञपतिं धेहि ता निंद्रो वृत्रहणी तवृत्रतूर्ये प्रोक्षितमसि। ब्रह्मन्नपः प्रणेष्यामी
तिप्रैषः प्रणय यज्ञमित्यनुज्ञापनावर्तते॥ कस्त्वा प्रणयति स त्वा प्रणायतु पयो देवप्रणया दिव्यं सं सारयंतु नः। इदं महद् ह्नुतपष्ठा उदाकृ
सहस्रपोषं यजमाने न्यचक्रतु॥ एकाक्षरं पूर्दशमं विराड्यद्दिदं विश्वं भुवनं व्यानट्॥ तन्नो देवः तरसा संविदानस्व स्तियज्ञं नयनतु। ब्रह्मपू
53 तमसि कस्त्वा युनक्ति स त्वा युनक्तु विश्वेभ्यः पत्तुरस्ता त्वमस्य वंत्यक परिष्ठात्सर्वातमश्रयत्सन्नेन रश्मिपवित्रेण अश्रद्धां यज्ञमारभे। कस्त्वा
युनक्ति। पयः प्रणयनेभ्यूर्पनानात्वेवैषाय वः स्यपूवरकं शकृदं॥ तथा वा पात्रीति सो धा पात्र्यः। परिणाहा पक्षादनप्रोक्षणं निरस्य।
नानितंत्रेण। अग्नये जुष्टं निर्वपामीति पुराणाग्नीहिवोनिपः। द्वितीयस्मूर्पे इंद्राग्निभ्याम अग्नीद्राभ्यामिति वा। अथ विश्वेभ्यो देवेभ्यो न
वव्रीहि निर्वापः तृतीयस्मूर्पे सोमाय जुष्टमिति श्यामाक निर्वापः पुनर्द्वितीये द्यावापृथिवीभ्यामिति नवव्रीहि निर्वापः। यद्वा वैश्वदेवानं
तरमेव द्यावापृथिवीभ्यां अथ सोमायेति स्मूर्पैकत्वे वैषायत्वा प्रदेशों भेदेनैव निर्वापादि। अग्नेहव्यं रक्षस्वेंद्राग्नी हव्यं रक्षेथां अग्नींद्रौ हव्यं राम
रक्षेथामिति वा यथा निर्वापं विश्वेदेवा हव्यं रक्षध्वं। सोम हव्यं रक्षस्व अथ सोमा सूर्वं द्यावापृथिवी हव्यं रक्षेथामिति। यद्वाग्ने हव्यं रक्ष ५३
स्वाग्नय इंद्राग्निभ्याम अग्नीद्राभ्यामिति वा विश्वेभ्यो देवेभ्यः सोमाय द्यावापृथिवीभ्यामिति। द्यावापृथिवीभ्यां सोमायेति वा। प्रोक्षणीः।

संस्कारोनिर्वापानंतरमुपसादनानंतरं प्रोक्षणीः संस्कारानंतरं वा लौकिकाज्येनाज्यानिहोमः शतायुधायं। इंद्र। येचत्वारः। देवाः। ग्रीष्मी
हेमंतः। ऋतवः। इदुवत्सेराय। इदुवत्सर परिवत्सर संवत्सराः। भद्रान्नः। देवाः। यथा निर्वापं प्रोक्षणं। अग्नये वो जुष्टं प्रोक्षामि इंद्राग्नि
भ्यामग्नीद्राभ्यामितिवा। विश्वेभ्यो देवेभ्यः सोमाय द्यावापृथिवीभ्यामिति पात्रप्रोक्षणादि। एकं कृष्णाजिनं तत्रैकं त्रीणि वोलूखल
लानि यदेकं तदा। हविरावपनादि विवेचनांतं कांडानुसमयेन प्रतिबीजं प्रयोक्तव्यं। उत्तमोप्यवाग्विसर्गः। तत्र यद्येकं शूर्पं तदात्वा
तंडुलप्रस्कंदनांतं सर्वी वघातांते हृषदुपलाहननं॥ तं नानात्वेप्येकी कुलाहननं॥ तुषोपवपनं तुसर्वांते प्रतिबीजं वा। यदि नानोलू
खलानि तदा पर्यायेण सर्वा वघातांते हृषदुपलाहननं। पर्यायेणोद्वापः। परावपनं च। तुषोपवपनं तंत्रेण पर्यायेण विवेकः॥ प्र
स्कंदनं च पात्र्यां। अपोभय तंत्रेणावेक्षणं। फलीकरण प्रैषश्च। पर्यायेण फलीकरणं प्रक्षालनं च। संसृज्य तंत्रेण निनयनं॥ य
थाभगं व्यावर्तध्वमिति। चरुपुरोडाशीयानां नवानां विभागः। इदमिंद्राग्न्योर्द्यावापृथिव्योरिति वाभिमर्शनं पुरोडाशीयानां। इ
दं विश्वेषां देवानामिति चरव्याणां। कृष्णाजिनादानादि अग्नये जुष्टमधिवपामीति पुराणानां। इंद्राग्निभ्यामग्नीद्राभ्यामितिवा
वा जुष्टमधिवपामीति द्यावापृथिवीभ्यामिति नवानां यदेकाहृषत्तया प्रथमं पुरोडाशानामधिवापाः सर्वेषां प्रस्कंदनानि। अथ
नवानां। यदातेकः तदा पर्यायेणाधिवापः पेषणं प्रस्कंदनं च अपोभयत्र तंत्रेण पेषणं प्रैषश्च। प्रैषश्च पुनः क्रमेण पेषणं॥ घ

ध्याद्दानादिनिर्वपणक्रमेणकपालस्याश्युपधानं॥ ध्रुवोसीतिस्यास्योरासादनं। मर्दं स्वधिश्रयणादि एककस्यांचपवर्गायांपाश्याद्द्योर्वी
अग्नये जुष्टं संवपामीति। पुराणानांइंद्राग्निभ्यामग्नीद्राभ्यामिति। वाजुष्टंसंवपामीतिद्यावापृथिवीभ्यांमितिनवानांपिष्टान्युसूत्स
तंडुलानुत्सुनातिसमापोअद्भिरित्यादिसंयोम्यग्नये तेतिपुराणानांसंयोमीद्राग्निभ्यामग्नीद्राभ्यामितिवाद्यावापृथिवीभ्यामिति।
54 नवानां॥ मखस्यशिरोसीतिपुराणापिंडः तथानवानांपिंडंकृत्वातयथाभागंव्यावर्त्तेथामितिविभज्य। इदमिंद्राग्न्योरग्नीद्रयोरि
तिवाद्यस्य। इदंद्यावापृथिव्योरितिद्वितीयस्यनिर्देशः निर्वापक्रमेणाधिश्रयणं। वैश्वदेवस्यास्यांयजुरुत्सूतंप्रणीतंवापयोम
दंतीश्रानीयघर्मोसीतितंडुलावापः सौम्यस्यास्यांप्रणीतोदकंमर्दंतीश्रानीयघर्मोसीतितंडुलावापः। पुरोडाशप्रथनादिमंत्रे
णाभिघारणमाग्नेयस्य। तूष्णीमितरेषांपाक्षपस्तरणादि आर्द्रः प्रथस्वरित्यविकृतोमंत्रःश्रोरपिष्टपुतात्॥ उद्वासनकालेपा
त्र्याक्रोडंकृत्वातत्रस्यापितमेककपालंसर्वमाविष्टमाज्येनाभिपूरयति॥ यद्वापात्र्यंतर उद्वासितंतथाभिपूरितेनपात्रेणसहसा
दयतिप्रियेणेत्यासादनं। यज्ञोसीत्यादिभिर्यथायोगंमासन्नाभिमर्शनं। अपतमिंद्राग्नी अपतमाग्नीद्राविति वा॥ अपतंविश्वेदे राम
वाभुवनंतुदंता। ममाग्नइत्यादि। पृथुपाजास्तसवाधइत्या स्वलीयनीयेधाय्ये आपस्तंबीये तु सप्तनवन्नवन्नुक्तो ममाग्नयेइति॥ ५४
अग्निमावह। इंद्राग्नी आवह अग्नीद्रावावह विश्वान्देवानावह। द्यावापृथिवी आवहेतियथानिर्वापंदेवांआज्यपामित्यादिएवंस्वा

हामित्यादि। वार्त्रघ्नौ वृधन्वंतावाज्यभागौ वाश्वलायनीये। आपस्तंबीये सारुहायस्य। अदाभ्यः पुर इत्याग्नेयस्याज्यभागस्य याज्यानुवा
क्या। नवं स्तोममिति सौम्यस्य। यद्वा सारुहायस्येत्याग्नेयस्यानुवाक्या। नवं सोमायेति सौम्यस्य जुषाण इत्से वो भयो यो ज्ये इति।। अ
ग्नयेनुब्रूहि। अग्निर्मूर्धेत्यनुवाक्या। अग्निं यज। भुवो यज्ञस्येति याज्या।। इंद्राग्निभ्यामनुब्रूहि इंद्राग्नी अवसेति अनुवाक्या।
इंद्राग्नी यज।। गीर्भिर्विप्र इति याज्या।। अग्नीद्रेतु अग्नीद्राभ्यामनुब्रूहि आधायेअग्निमित्यनुवाक्य अग्नीद्रौ यज।। सकर्माण
इति याज्या। अग्नीद्राभ्यामिति अग्नीद्रयोरहं देवयज्ययेंद्रियाव्यन्नादो भूयासं विश्वेभ्यो देवेभ्योनुब्रूहि। विश्वे देवास आगतेत्य
नुवाक्या विश्वान्देवान्यज।। ये के च ज्मेति याज्या। विश्वेभ्यो देवेभ्य इदं।। विश्वेषां देवानामहं देवयज्यया प्राणैः सायुज्यं गमेयं। सो
मायानुब्रूहि। सोमयास्त इत्यनुवाक्या। सोमं यज। पा ते धामानीति याज्या। सोमायेदं। सोमस्याहं वृत्रहा भूयासं। अथ प्राग्वा सौम्या
देककपालं पाश्चा उद्धृत्य बर्हिषदं कृत्वोपांशु प्रचरेत्। जुह्वामुपस्तीर्य द्यावापृथिवीभ्यामनुब्रूहीति संप्रेष्य होत्रा मही द्यौः पृथिवी च
नृच्यमाने जुह्वां कृत्वा पुरोडाशं निधाय तस्मिन्पुरोडाशे शयस्य माज्यमन्वानीय सकृदभिघार्य द्यावापृथिवी यजेति संप्रेष्य हो
त्रा पूर्ववज्जेति वषट् क्रियमाणे यथा सर्वास्कन्नो हुतो भवति। यथा च हूयमाने हुतो वा न पर्यावर्त्तेत यथा समे स्वंगारेषु कुटिलं ज्वलं न
प्रतिष्ठितस्य भवति तथा हस्तादिना वा स्पृशन् जुहुयात् सार्वे नैष्कावयन् जुहुयात्।। यदि हुतः पर्यावर्त्तेत। यजमानेन दत्तं वरं प्रति।

ग्न्यस्त्कं वाग्नेर्णेनेवयथास्थानं प्रतिष्ठापयेत्॥ यद्विनोधृत्यस्त्कच्याधाया मिधार्यपुरैनराश्रावणादिविधिना जुहुयात्॥ अपिवानेकक
पालं कुर्वीनाज्येनैव द्यावापृथिवी यजेत द्यावापृथिवीभ्यामिदं न्नमम। द्यावापृथिव्यो इहं देवयज्यया भयोर्लोकयोर्त्रधासं। आप
55 स्तंवीयेतु आग्नेयस्योक्त एवयाज्यानुवाक्ये। नवं स्तोमं सुचिनु स्तोम मिंद्राग्नस्य। अग्निरिंद्रः। यज्ञं नय इत्याग्नींद्रस्य॥ वि
श्वान्देवान्स्येदं वर्हिरिति वैश्वदेवस्य नवस्य सोम॥ वैनें हविरिति सोमस्य इमे नु द्यावापृथिवी। इमेधनु इति द्यावापृथिव्यस्य इ
तरद्यथापूर्वं नपार्वणहोमः। नारिष्टादि। अत्रवा पूर्वोक्तप्रकारेणाज्याग्निहोमः। प्रेद्धो अग्न इति स्विष्टकृतः अनुवाक्या अयाड
ग्नेः प्रियाधामानि। अयाडिंद्राग्न्योः अग्नींद्रयोरिति वा। अयाड्विश्वेषां देवानां अयाट् सोमस्य अयाड् द्यावापृथिव्योरि
त्यादि। इमो अग्न इति याज्या। आपस्तंवीयेतु। यविष्ठोह ब्येसनुगाक्य त्वमग्न इति याज्या॥ आग्नेयस्य विरुज्यप्राशित्रं। इतरे
षाम विसज्य अग्नेस्त्वास्येनेति। भद्रान्नश्रेय इति वा प्राशित्रप्राशनं॥ इडावदानकाले श्यामाकयजमानभागं पृथगेव ध्रुवाया
उपो हति। प्राकृतमंत्रेण। भद्रान्न इति वा सर्वेषामिडाभक्षणं। आग्नेयस्य चतुर्धीकरणं। स्वस्वमंत्रेण भद्रान्न इति वा भक्षणं। द राम
क्षिणा का पूर्वस्मिन्संवत्सरे मातास्यायाः पौर्णमास्याः प्रागेव यजमानस्य गोषु ये वत्सा जातास्तेषां प्रथमजं वत्सं वासश्च ददाति ५५
ब्रह्मणि ब्रह्मणिस्थ ब्रह्मणो वां मा मा हिंसिष्टं महुतेमस्यं शिवे भवतं। अक्षीयमाणे तेद धतुः पृथिवीमंतरिक्षं दिवं च ताभ्यां वत्सवासो

श्यामतितराणि मृत्युं॥ ब्राह्मणा इमे वीवत्सवाससौ रुद्रायगामिति वत्सप्रतिग्रहः। देविदक्षिणेग्ना त्वाऽलंकृतं तन्नपसत्त्वात न्वतवरुक्मय
त्वावयं सोमायवाससत्तेनेति वासः प्रतिग्रहः। अग्निरिदं हविरजुषतावीवृधत महोज्यायोऽकृत। इन्द्राग्नी इदं हविरजुषेतामवीवृ-
धेतां महोज्यायोऽक्रातां। अग्नीन्द्रावितिवा विश्वेदेवा इदं हविरजुषंतावीवृधंत महोज्यायोऽक्रत। सोम इदं हविरजुषतावीवृधत महो
ज्यायोऽकृत। द्यावापृथिवी इदं हविरजुषेतां महोज्यायोऽक्रातामित्यादि। अग्नेरहमुज्जितिं। इन्द्राग्न्योरहमुज्जितिं। अग्नीन्द्रयोरह
मितिवा विश्वेषां देवानामहमुज्जितिं। सोमस्याहं द्यावापृथिव्योरहं। अग्नेः स्विष्टकृतोऽहमिति। भद्रान्न इति यजमानभागप्राश
नं। अग्निः प्रथम इति श्यामाकयजमानप्राशनं। सर्वमन्यद्दर्शप्रकृतीति। अपि वा मावास्यायां पौर्णमास्यां वाग्रयणेष्टिमन्वा
यातयेत्॥ अथापत्स्वनुग्रहार्थमाग्रयणस्यानुकल्पा उपदिश्यंते। तेषां चोत्तरोत्तरस्यानुकल्पानुकल्पतमापत्तारतम्यानुसार
तं वचोद्भूयं। तत्रानापद्यपि क्वचित् कस्मिंश्चिद्विशेषसामर्थ्याद्व्यवतिष्ठते तं विषयविशेषं तत्र तत्र कल्पे प्रदर्शयिष्यामः। तत्र यः क
दाचित्संपदा॥ एष आग्रयणेष्टिं निर्वप्तुं न शक्येतांत कुर्यात्॥ सह तां दर्शपूर्णमासयोरन्यतरतान्वायातयेत्॥ तदेकतन्त्रा एषा
ग्रयणहविषी अनुनिर्वपेदित्यर्थः तत्राज्याज्यादि वैशेषिकमप्यविरोधात्कार्यं॥ पुराणाग्नेयं तु नेष्यते॥ तथा च दर्शितं प्राग्द
क्षिणास्तृतसमुच्चीयंते वासः श्यामाक इन्द्रलिंगात्॥ भक्षणं तु न वस्यप्रथकृ तस्य भक्षणमंत्रभेदात्॥ अन्ने के चिदाग्रयणस्य का

म्पत्वमंगीकृत्यकाम्यस्य चसांगस्यानुष्ठेयत्वात् प्राकृतेस्थानित्वासायायोपपन्नांगसाध्यत्वादाग्रयणप्राधान्येन तत्तंत्रमेवानुष्ठेयमिति म
न्यं तेन तु चिंत्यं॥ अत्र प्रयोगः॥ शरदृतौ वृत्त्यासस्य तत्प्रोवमावास्यायादर्शसमानतंत्राग्रयणेन यक्ष्य इति पौर्णमास्यां वा पूर्णमासेन
समानतंत्रेणयक्ष्य इति संकल्पः। आमावास्यं तंत्रममावास्यायां पौर्णमास्यां पौर्णमासं तंत्रा विद्यादसीत्यादि यथा प्रकृति दर्शे एककविं
शतिकपालानि सोमयाजिनइ असोमयाजिनो द्वात्रिंशत्त्रयस्त्रिंशद्वा पौर्णमासे वैमृधसमानतंत्रे त्रिचत्वारिंशत्॥ केवले तु द्वात्रिंशत्सो
मयाजिनः। असोमयाजिनो वैमृधेनोद्वात्रिंशत्॥ इतरस्यैकविंशतिदेस्यास्त्याविन्यादि पूर्ववत्॥ अन्वाहार्यस्थालीप्रातर्दोहपात्रादि
शेषपयश्चैत्याग्रयणेयेदित्यादि पूर्ववत्॥ प्रकृतिदेवताभ्यो निरूप्याग्रयणदेवताभ्यो निर्वापः। पूर्ववत्तथासादनं। पूर्ववदाज्यानि होमः। निर्वापव
त्प्रोक्षणंपात्रप्रोक्षणादि पूर्ववत्॥ तथाग्नेनिर्वापदाधानादि प्राकृतावाज्यभागौ प्राकृतैः प्रचर्यपूर्ववदाग्रयणीयः प्रचर्यः पार्वणहो
मादि। अयाडग्निरित्यादि। यथावाहनं। प्राकृते संयाज्ये। प्राकृतमंत्रैः प्राशित्रादिप्राशनं ओदनवत्सवासांसि दक्षिणा॥ तत्र ब्रह्मन् ब्र
ह्मासीतिमंत्रः नवेयं स्थालीति नापि ब्राह्मणा अयमिति। अग्निरिदं हविरजुषतेत्यादि। आवाहनवत्संयज्ञपतिरित्येव यजमान
भागप्राशनं॥ सर्वमन्यद्यथापूर्वमिति अपि वामावास्यां पौर्णमासीं वा नवैर्यजेत। पूर्वकल्पस्याप्यशक्तौ दर्शपूर्णमासयोरन्यतमेव न
वैर्यजेत॥ तत्र तु सर्वस्यापि वैशेषिकनिवृत्तिः। यत्र क्रियादर्शपूर्णमासेष्टीनां यदा ताभ्यां संवत्सरमिष्टा तत ऊर्ध्वमन्यानि कर्माणि कु

रुक्तइति।तत्रायमेवपक्षोप्यवतिष्ठतेसामर्थ्यात्।अत्रनवैदर्शनयक्षे।पूर्णिमासेनेतियथायोगंमंतव्यः।पूर्वसूक्तःप्रयोगेदर्शपूर्णिमासाभ्यां
अपिवाग्निहोत्रंव्रीहिस्तंबंवायवस्तंबंवाग्रसितायस्याःपयस्यसासायंप्रातर्जुहुयात्॥व्रीह्याग्रयणकालेसव्रीहिस्तंबंयवाग्रयणका
लेयवस्तंबंवप्रातरेवग्रसयित्वामक्षणेनपिन्वायास्तस्याःपयसासायंजुहुयात्॥अपरेक्तःप्रातश्चतत्रव्रीहियवनियमाश्यामाका
नांनिवृत्तिः।अथयदादर्शपूर्णिमासयोरप्यक्रियायदासंवत्सरमग्निहोत्रंहुत्वापदर्शपूर्णिमासावारभतइति।तदायंविधिरुक्तरो
वासामर्थ्यात्॥उक्तोग्निहोत्रप्रयोगः।अपिवानवानांयवाग्वासायंप्रातर्जुहुयात्॥पूर्वेणायंपक्षोव्याख्यातः।तत्तुल्यविकल्पस्त
त्तुल्यप्रयोगश्च।अपिवानवानांगार्हपत्येगार्हपत्येस्थालीपाकंश्रपयित्वाहवनीयेजुहुयात्॥आग्रयणदेवताभ्यःस्विष्टकृच्चतुर्थी
त्यइतिवचनात्॥श्यामाकदेवतायाःसोमस्यनिवृत्तिः।स्थालीपाकवचनाच्चपार्वणप्रकृतिकोयजमानकर्तृकश्च।अथयथासंव
त्सरादौपवमानहविषामुत्कर्षआग्रयणिकापत्तिश्च॥तदायमेवपक्षःसामर्थ्यात्॥अत्रप्रयोगः।नवानांस्थालीपाकेनहोष्यामी
तिसंकल्पः।पत्न्यवहंतिगार्हपत्येयजमानःश्रपयित्वाभिधार्यप्राचीमुदीचीनंवोद्वास्यप्रतिष्ठितमभिधार्यकूष्मांडवदग्नेधनादि
आज्यभागांतेदर्व्यामुपस्तीर्यस्थालीपाकाद्धिरवदायसकृदभिधार्यैतेवंप्रत्याहुत्यववनूपद्धादर्व्यैकृसकृदवदायैतेवंप्रत्याहुत्यव
वनूइंद्राग्निभ्यांस्वाहेत्यानींद्राभ्यांहेतिवाविश्वेभ्योदेवेभ्यःस्वाहाद्यावापृथिवीभ्यांस्वाहेतिमध्येहुत्वादर्व्यांसकृदुपस्तीर्यसकृद

वदायद्विरभिघार्यदर्भैः सकृदवदायेत्येवं प्रदानानुगुणमवदायाग्नये स्विष्टकृते स्वाहेत्यग्नावीशानदेशे हुत्वा यथायोगमुद्दिश्य
त्यक्त्वा जयाद्युपहोमानंतरं वा साद्यनार्यं वर्हिर्दर्वीं हुत्वा गतश्चेत्पयोः प्रस्तरवत्कृत्वांमन्त्वाग्नौ प्रहृत्य शम्यापो स्योत्तरपरिषेचना
दिवरप्रदानांतं करोति। यद्वा जयाद्युपहोमेविर्निवकुर्यादिति। अपि वानवानां वतुः शरावमोदनं पक्त्वा चतुरो ब्राह्मणान् भोजयेत्।
57 पुरुषभोजनपर्याप्तयाहि एणमहताशतावेणचतुर्निरूप्य मोदनं लौकिकेग्नौ चतसृणामासां देवतानां मध्ये चतुरो ब्राह्मणान् भो-
जयेत्॥ अपयदो त्सृष्टाग्निर्यजमानस्तदा यमेव पक्षः सामर्थ्यात्॥ प्रयोगस्तु व्यक्तः॥ एवं यवैर्यजेत। वसंते यवानां मग्रपाकेना-
प्येवं व्रीह्याग्रयणस्य सानुकल्पस्य कृतत्वाजेतृतत्रसौ ल्वाहमारद्वाजः। नवैर्यवानामाग्रयणं विघतइ सौदुलो मिरिति। तथा विधे
क्रियायवेषुइसा श्वलायनः। तत्राग्नेय श्यामाकौ न भवतः। तत्र यवाग्रयणे पुराणाग्नेयः श्यामाकश्चरुर्न भवतः। यऊर्ध्वमेका-
ष्टकाया वत्साजायंते तेषां प्रथमजं ददाति। एतमुत्यं। सुदानवइतियजमान भानभागं प्राश्नाति॥ सर्वेषां वा भक्षाणां मंत्रवत्तां प्रत्या- राम
म्नायः स्यात्॥ पूर्ववद्व्याख्या विश्वेदेवा जगती। एतमुत्यं मधुना संयुतं यवं सरस्वत्या अधिमनावचर्कृषुः। इंद्र आसीत्सीरप- ५०
तिः शतक्रतुः कीनाशा आसन्मरुतः सुदानवः। मधुना मधुरसेन प्रणीतो दकेन संयुतमप्सुदतमेवैनमयंयवमग्रयणपुरोडा-
शानयवभागं प्राश्नामि। इंद्रोयः सरस्वत्यानघः अधिमयोस्यन्यते। सर्वैज्ञातयइतिमनुस्तिरं अथनातिरे अनवर्कृषुः कर्षणे

नोत्वादितवतः कथंशतक्रतुर्बहुकर्मेंद्र इसीरपतिः कृषिप्रयोक्तासीत्। तदा सुदानवः शोभनदानामरुतो देवाः कीनाशाः आसन्। सि
द्धमिष्टिः संपद्यते। व्यक्तं। अत्र प्रयोगो वसंतेन वा नां मग्नपाकेन पुराग्नेयं श्यामाकचरुं चांतरेणाव्रीह्याग्रयणस्य सानुकल्पस्य प्रयो
गवत्॥ आपस्तंबीये। स्वारुह्य यस्य श्रि अदाभ्यः पुरएते त्याग्नेयस्य। नवं सोमाय॰ नवं सोमेति सौम्यस्य याज्यानुवाक्ये। यद्वा
अदाभ्य इत्याग्नेयस्य। नवं सोमेति सौम्यस्यानुवाक्येयोज्ये। जुषाण इ से वो भयोः। एतमु त्यमिति। यजमानभागप्राशनमिति
शेषः। यदि नानातंत्रं श्यामाकेष्टिं कुर्वीत श्यामाकसस्ये। श्यामाकानुद्धर्तवे इति संप्रेष्यति॥ यावीह्याग्रयणे श्यामाकचरुरुक्तस्तया
दिष्ट्यक्तं तंत्रं कुर्वीत तदार्षी सुश्यामाकसस्येपक्के सति श्यामाकानुद्धर्तवै उद्धार्थ हरतेति कर्मकारान् यजमानः। संप्रेष्यति। श्यामक्र।
स्य इत्यपि संप्रेषावयद्भूतिनभ्यमितव्यं। विपर्यस्येवोत्तरत्व्यक्तत्वात्॥ यथा वेणयवेषुपक्केषु वेणयवानुद्धर्तवा इति संप्रेष्यतीति
तस्याः सप्तदशसामिधेन्यः। सप्तदशपमवचनमन्यान्नादे। सर्वस्यापि विशेषस्य प्रदर्शनार्थं निवृत्यर्थमित्यन्ये। तंत्रं तस्याः पौर्ण
मासमग्नीषोमीयविकारत्वात् सद्वंतावाज्यभागौ विराजौ संयाज्ये। सद्वंतौ। त्वमग्निमयो भुवइति सद्वंतौ प्रेद्धो अग्न इमो अग्नेइति
विराजौ। व्यक्तं। विश्वेदेवा गायत्री। त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः। त्वया यज्ञं वितन्वते। हे अग्ने त्वं सप्रथाः सर्वतः प्रथितोसि।
जुष्टो होता, तेन देवैः सेवितः वरेण्यो वरणीयः तया होत्रा यजमानाय यज्ञं वितन्वते॥ सो मया स्तद्भ्स्वत्र व्याख्याता। प्रेद्धो अग्ने इमो

अग्नइस्याधाने। वासोदक्षिणादधिमंथो मधुमंथो मधुपर्कोमिधुग्लुंपो बभ्रुर्वा पिंगलः। वाससः पुनरुपादानमुत्तरैर्विकल्पार्थं सर्पिरा
दिसंयुक्ताः सक्तवो मंथाः। दधिसंयुक्तौ मंथो दधिमंथः। तथा मधुमंथः। दधिपुतं मधुत्तं घृतयुतेवा धानाः सक्तुयुक्तानि वा क्तानि मधु
पर्कः। अनिम्नोतितमधुर्मधुकोशो मधुग्लुंपः मधुशर्करायाः बभ्रुः कपिलः पिंगलः। पिंगाक्षः। एवं द्विरूपा गौर्वैस्यर्पः। वा चेन्नमि
तिदधिमंथादिप्रतिग्रहः। सिद्धमिष्टिः संपद्यते। व्यक्तं। अत्र प्रयोगः। वर्षान्तेश्यामाकसस्येषु पक्वेषु यजमानः श्यामाकानुद्धृत्वा
58 इति संप्रेष्यामावास्यायां पौर्णमास्यां वा प्रतिपत्संधिमत्यां यथापूर्वमाग्रयणेन यक्ष्ये विद्धदसीत्यादि अघापज्ञाय। इमामूर्जं पंचद
शीप्रथमामित्तिवा। आग्रयणीयं हविः पौर्णमासं तंत्रं सहैस्त्रदशसामिधेन्यः ततस्तांत्रयो विंशतिपात्र प्रयोगकाले चरुस्थाली।
स्फ्यश्च द्वंद्वं। नान्वाहार्यस्थालीपवित्रकरणादि। सोमाय जुष्टं निर्वपामि। सोमहव्यं रक्षस्व। सोमायेतिवा। यथापूर्वमन्यानिहोमोन
वा। सोमाय वो जुष्टं प्रोक्षामीत्यादि प्रक्षालनेन यवानंतरं। धृष्टादानादि ध्रुवोसीति स्थाल्यासादनं॥ तंडुलो स्वनादि। तूष्णीमभि
धारणं। आर्द्रः प्रथस्नुरित्यविकृतः प्रियेणेत्यासादनं। अयं यज्ञ इत्याद्यासन्नाभिमर्शनं। अयं वेद इत्यादि। यथापूर्वं धाये। सोममा
वह। देवां आज्यपां इत्यादि वार्त्रघ्नावा स्वलायनीये आपस्तंबीयेतु। तमग्ने सप्रथा सोमयास्त इत्याज्यभागौ। सोमयास्ते। यातेधा
मानीत्याश्वलायनीये। आपस्तंबीयेतु॥ नवस्यसोमते। नवं हविरितियाज्यानुवाक्ये। नपार्वणहोमो नारिष्टादि प्रेद्धो अग्नेसि

ष्टकृदनुवाक्याइमो अग्नइतियाज्या। अविरुज्यप्राशितं। भद्रांनइतिवाप्राशितप्राशना। आश्वलायनीये। अवांतरेकायांइळेभागमितिजपि
त्वासर्वेषाणाविळांतोह्नः प्रजायवेत्वेतिदक्षिणेनपाणिनाभिमृश्यभद्रांनइतिप्राश्याचम्यतत्रस्थएवोमोसिप्राणेतिनाभिमालभेत॥ आ
पस्तंबीयेतुयथा॰ प्रकृतिप्राकृतमंत्रेणभद्रान्नइतिवासर्वेषामिडाभक्षणंनचतुर्धाकरणं। वासोदधिमंथोवामधमंथोवामधुपर्कोवा
मधुग्लुप्सोवावभ्रुपिंगलगवोवादक्षिणा अहुतमस्यशिवंभव। अक्षीयमाणंतद्धाधारमंष्टपिवीमंतरिक्षंदिवंचतेनवासस्सातिनराति
मृत्स्कं ब्राह्मणाइदंदधिवोवासः। देविदक्षिणेग्नास्त्वाकं तेनपसस्त्वातन्वतवरूत्रयस्त्वावयंसोमायवासः। दिवंचतेनदधिमंथेनेत्वा
दिवभ्रुपिंगलगवे स्मंतंयथायोगंब्राह्मणा अयंवोदधिमंथः इत्यादिचवाचेन्नमितिदधिमंथादिप्रतिग्रहः। रुद्रायगामितिवभ्रु
पिंगलस्यप्राकृतमंत्रेणाग्निः प्रथमइतिवायजमानभागप्राशनंसर्वमन्यथाप्रकृतीतिहरितयवशाकशमीधान्यानांनवानांफ
लानां अतिष्ठेपिप्राशनेयथाकामीपूर्वेणानिष्ठापिग्रयणेत्वनेनप्रागाग्रयणात्सर्वस्याशनंप्रतिषेधंतत्रकेषांचिद्दशनमनेन
विज्ञायते॥ हरितयवानासस्यविशेषः। तथाशाकः शमीधान्यानिकोशधान्यानितेषांकदल्यादिफलानांचनवानां आग्रयणेनिष्ठेपि।
यथाकाममक्षणंभवति। वेणुयवानामिष्टिमेकेसमामनंति। वेणवेवैणवं तंडुलैरथाग्रपतांकेच्छिद्धिधीयतेवेणुयवेषुपक्वेषुवैणवय
पाऊद्धर्तवाइतिसंप्रेष्यति। श्यामाकसंप्रेषणायव्याख्यातः। तस्याएतदेवतंत्रमेषादेवतायत्नुश्यामाकेष्वामुक्तंसप्तदशासामिधेन्या

दितदेवास्याश्चरुः तंत्रं देवता अपि तत्रत्याः सोम एवेत्यर्थः। आग्नेयी मैत्रावरुणी प्राजापत्या च। इष्टिरिति शेषः। अत्र प्रयोगस्तावत्सौम्या
याः श्यामाकेष्टिप्रयोग एव। वैणयवप्राकृतौ आग्नेय्यादीनां तु देवतादेशेषु सोमस्यानेयथायोगं तन्त्रं देवतावापः। अग्निर्मूर्धा भुवो
यज्ञस्येत्याग्नेयीज्यानुवाक्ये। आनो मित्रावरुणाय हव्यं हविष्ठमिति मैत्रावरुण्याः। प्रवाहवे त्वापस्तम्बीयया ज्या। प्रजापतेन त्वत्। तवेमे
59 लोका इति प्राजापत्ये। सद्दवे पुत्र इति आपस्तम्बीयया ज्या। सर्वमन्यद्यथापूर्वमिति अथ सर्वस्याग्रयणस्य होत्रविकारमाह सप्रत्न
वदिति द्वेधाय्ये च तस्य आज्यभागयोर्देशाह विषां द्वे स्विष्टकृतः। व्याख्यातं प्रथमाग्रयणे सह मंत्रार्थेन। व्रीहिभिरिष्ट्वा व्रीहिभिरेव
यजेतायवेभ्यो। दर्शपूर्णमासयोर्व्रीहीनू यवान्वति व्रीहियवयोः सर्वकालविकल्पः प्राप्तः। इदानीं शारदांतरेयो विनिवेशः पक्षे यव
बाधश्च प्रदर्श्यते। व्रीह्याग्रयणेनेष्ट्वा व्रीहिभिरेव दर्शपूर्णमासौ यजेतायवाग्रयणादेवं यवाग्रयणादारभ्य व्रीह्याग्रयणाद्यवैः।
अपि वा व्रीहिभिरेव यजेतोभयोः कालयोः यत एते सूपचरितमाः। सुखेनावहन्यंते पिष्यंते च। न यववद्दुःखेनेत्यस्मात् व्रीहिभिरेव य
जेत। दर्शपूर्णमासाविति वचनान्नाग्निहोत्रार्थेषु तंडुलपुयवनियमः। दर्शपूर्णमासाभ्यामेवत। द्वैकारांश्च व्याख्याताः वर्षासु राम
श्यामाकैर्यजेत शरदि व्रीहिभिर्वसंते यवैर्यथर्तु वेणयवैरिति विज्ञायते इति विज्ञायते। यद्यपि नानातंत्राण्यंश्यामाकेष्टिस्तदानव ५९
र्षासु यजेत नतः शरदि केवलैर्व्रीहिभिर्गृह्यंते तेनोभयोः शरदि तंतो वसंते यवैः वेणयवैस्तत्र यथर्तु यजेत। तेभ्यः नियते कालः।

निष्पन्नयोर्यस्मिन्नेव यजेते त्यर्थः॥ इत्याग्रयणतंत्रोक्तिमंत्रव्याख्यासुगंधिभिः। सूक्तिप्रसूनैः पुष्पात्तु पुमर्थान्पुरुषोत्तमः॥
अग्निहोत्रप्रयोगाद्य आग्रयणसुदुस्त्वलः॥ षष्ठप्रश्नोपाकृतोयमग्निहोत्राभिधानवान्॥ ॥श्री इत्यापस्तंबीयाध्वरतंत्र
स्वतंत्रव्याख्यायां प्रयोगरत्नमालायां षष्ठः प्रश्नेष्टमः पटलः॥ ॥समाप्तश्च षष्ठः प्रश्नः॥ ॥शुभमस्तु॥ ॥श्री

60 ११६ त्रुटितानि आधानविषयाणि ६२

राम
६०